शास्त्रसंदेश-३५

# स्तोत्रसंदेशमाला

## श्रीपार्श्वनाथजिनस्तोत्राणि-१

९



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३५

# स्तोत्र संदेशमाला-१

## श्रीपार्श्वनाथजिनस्तोत्राणि-१

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૯

**श्रीपार्श्वनाथजिनस्तोत्राणि-१**


આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૪૦ + ૪

સ્તોત્ર : ૯૬ શ્લોક : ૧૫૧૦


**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.


ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...! અનુમોદનીય...! અનુકરણીય...!




## સ્તોત્ર સંદેશમાલાના
## ભાગ ૯-૧૦ ના
## દ્રવ્ય લાભાર્થી




## શ્રી મહારાષ્ટ્ર ભુવન જૈન ધર્મશાળા
## પાલીતાણા

આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની
શાસ્ત્ર સંદેશ હાર્દિક અનુમોદના કરે છે.
ટ્રસ્ટીગણ ના અમો
આભારી છીએ.

*શાસ્ત્રસંદેશ, સુરત*







*સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

<u>*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*</u>

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | आनन्दनं सम[सुरा]सर- | पू.आ. श्री जिनराजसूरि | १ |
| २ | देववर्माङ्गजं पिष्टदुष्टाङ्गजं | पू.आ. श्री जिनेश्वरसूरि | २ |
| ३ | स्फुरत्केवलज्ञानचारुप्रकाशं, | पू.आ.श्री सोमसुन्दरसूरि | ६ |
| ४ | स्फूर्जन्नागफणामणीगणसमु- | पू.आ.श्री सोमसुन्दरसूरि | ११ |
| ५ | जयश्रियां सङ्गममाप्तुमिच्छव: | पू.आ.श्री मुनिसुन्दरसूरि | १३ |
| ६ | जयश्रियं सर्वरिपून् जिगीषतां | पू.आ. श्री मुनिसुन्दरसूरि | १५ |
| ७ | जय श्रीस्तम्भनाधीश ! | पू.आ. श्री मुनिसुन्दरसूरि | २१ |
| ८ | जय श्रीमन्नागहृदपुरवराल- | पू.आ. श्री मुनिसुन्दरसूरि | २६ |
| ९ | जयश्री: संश्रयेद् यस्य | पू.आ. श्री मुनिसुन्दरसूरि | ३० |
| १० | जयश्रिया प्राप्तसुखप्रकर्षा | पू.आ. श्री मुनिसुन्दरसूरि | ३५ |
| ११ | समस्तकल्याणनिधानकोशं | पू.आ. श्री मुनिचन्द्रसूरि | ४० |
| १२ | नमामि श्रीपार्श्वं कलिगिरि- | पू.आ.श्री मुनिचन्द्रसूरि | ४१ |
| १३ | स्वामिन् ! नमन्नर-सुराऽ- | पू. आ. श्री सोमतिलकसूरि | ४३ |
| १४ | आर्त्तनामोदरं कृत्वा हुङ्कारं | पू.आ.श्री वादिदेवसूरि | ४६ |
| १५ | आयाति नित्यं परमारमारमा | पू.आ. श्री माणिक्यसुन्दरसूरि | ४७ |
| १६ | जिनं नौमि जीरापुरीसुन्दरीये, | पू. आ. श्री जिनहर्षसूरि | ४८ |
| १७ | विश्वव्यापियश:प्रभावविभवं | पू. आ. श्री जिनसुन्दरसूरि | ५१ |
| १८ | जीरिकापुर पतिं सदैव तं दैवतं | पू.आ.श्री जिनप्रभसूरि | ५६ |
| १९ | त्वां विनुत्य महिमश्रिया महं | पू.आ.श्री जिनप्रभसूरि | ५७ |
| २० | श्रीपार्श्व पादानत नागराज | पू.आ.श्री जिनप्रभसूरि | ५९ |
| २१ | पार्श्वं प्रभुं शश्वदकोपमानं | पू.आ.श्री जिनप्रभसूरि | ६० |
| २२ | श्रीपार्श्व:श्रेयसे भूयादलिताल- | पू.आ.श्री जिनप्रभसूरि | ६१ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २३ | का मे वामेय शक्तिर्भवतु तव | पू.आ. श्री जिनप्रभसूरि | ६५ |
| २४ | अधियदुपनमन्तो यात्रिका: | पू.आ.श्री जिनप्रभसूरि | ६९ |
| २५ | श्रीपार्श्वं भावत: स्तौमि | पू.आ.श्री जिनप्रभसूरि | ७१ |
| २६ | श्रीपार्श्वं परमात्मानं त्रैलो- | पू.आ.श्री जिनप्रभसूरि | ७२ |
| २७ | जयामल श्रीफलवर्द्धिपार्श्व | पू.आ.श्री जिनप्रभसूरि | ७३ |
| २८ | श्रीफलवर्द्धिपार्श्व-प्रभुमोंकारं | पू.आ.श्री जिनप्रभसूरि | ७५ |
| २९ | नमस्यद्गीर्वाणाधिपति-नृपति- | पू.आ.श्री जिनवल्लभसूरि | ७६ |
| ३० | पायात् पार्श्व: पयोदद्युतिरुपरि | पू.आ.श्री जिनवल्लभसूरि | ८३ |
| ३१ | देवाधीशकृतानते ! शुभगते ! | पू.आ.श्री जिनवल्लभसूरि | ८४ |
| ३२ | समुद्यन्तो यस्य क्रमनखमयूखा | पू.आ.श्री जिनवल्लभसूरि | ८६ |
| ३३ | विनयविनमदिन्द्रं मन्मनोऽ- | पू.आ.श्री जिनवल्लभसूरि | ९१ |
| ३४ | शक्ति-शूलेषु-मुसल-हल- | पू.आ.श्री जिनवल्लभसूरि | ९४ |
| ३५ | चक्रे यस्य नति: सदा किल | पू.आ.श्री जिनवल्लभसूरि | ९५ |
| ३६ | पदद्वयासक्तनखप्रभूता, | पू.आ.श्री जिनचन्द्रसूरि | ९७ |
| ३७ | कल्याणकल्पद्रुमभद्रसालं | पू.आ.श्री जयकीर्तिसूरि | ९८ |
| ३८ | सुरासुरस्वामिसमूहसेव्यं सर्वार्थ | पू.आ.श्री विजयकीर्तिसूरि | १०२ |
| ३९ | प्रणमदमरमौलिस्मेरकोटिर- | पू.आ.श्री जयसिंहसूरि | १०६ |
| ४० | षट्पत्तनपुटभेदनमण्डन- | पू.आ.श्री जिनभद्रसूरि | ११० |
| ४१ | आनन्दभन्दवनपल्लवने वसन्तं | पू.आ.श्री जिनसमुद्रसूरि | १११ |
| ४२ | जगद्गुरुं जगद्देवं जगदान- | पू.आ.श्री जिनपतिसूरि | ११४ |
| ४३ | वन्दारु वृन्दारकवृन्दवन्द्य- | पू.आ.श्री जिनदेवसूरि | ११७ |
| ४४ | श्रीस्तम्भनं पार्श्वजिनं निरञ्जनं | पू.आ.श्रीजिनसोमसूरि | ११८ |
| ४५ | श्रीवामेयं विधुगधुसुधासार- | पू. आ. श्री लक्ष्मीसागरसूरि | १२० |
| ४६ | सच्चक्रसच्चक्रधरादि ऋद्धि- | पू.आ.श्री जयशेखरसूरि | १२३ |
| ४७ | भो भो भविकलोका भाग्या- | पू.आ.श्री जयशेखरसूरि | १२५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४८ | अश्वसेन कुलकमल मरालं, | पू.आ.श्री जयशेखरसूरि | १३० |
| ४९ | यस्त्रैलोक्यगतं ततं गुरुतमः | पू.आ.श्री रत्नसिंहसूरि | १३२ |
| ५० | प्रभुं जीरिकापल्लिवल्लीवसन्तं, | पू.आ.श्री महेन्द्रप्रभसूरि | १३४ |
| ५१ | पूर्वं पामरपुङ्गवेन सकलं | पू.आ. श्री धर्मघोषसूरि | १४२ |
| ५२ | किञ्चिद् गुरूणां वदनारविन्दान्, | पू.आ.श्री धर्मघोषसूरि | १४४ |
| ५३ | वरमन्त्र (धर्म) कीर्तितविद्या- | पू. आ. श्री धर्मघोषसूरि | १४९ |
| ५४ | विध्वस्ताखिलकर्मजालविल- | पू.आ.श्री धर्मघोषसूरि | १५० |
| ५५ | कस्तूरीतिलकं भुवः परिभव- | पू.आ.श्री धर्मघोषसूरि | १५२ |
| ५६ | श्रियायुतं पार्श्वजिनेश्वरं वरं, | पू.आ.श्री विबुधविमलसूरि | १५५ |
| ५७ | जय प्रभो ! त्वं नवखण्ड- | पू.आ. श्री रत्नशेखरसूरि | १६२ |
| ५८ | पार्श्वः श्रियेऽस्तु भास्वान- | पू.आ. श्री रत्नशेखरसूरि | १६३ |
| ५९ | श्रीचारूपमहातीर्थ-स्थितं | पू.आ. श्री ज्ञानविमलसूरि | १६४ |
| ६० | अम्भोधिवीचिचयचुम्बित- | पू.आ.श्री ज्ञानसागरसूरि | १६५ |
| ६१ | विश्वेश्वरं विश्वजनेशपूज्यं | पू.आ.श्री कल्याणसागरसूरि | १६८ |
| ६२ | वामेयं मरुदेशभूषणतरं | पू.आ.श्री कल्याणसागरसूरि | १७० |
| ६३ | जयति जगति चन्द्रः पार्श्वनामा | पू.आ.श्री कल्याणसागरसूरि | १७२ |
| ६४ | कल्याणगेहं गुणरत्नराजं | पू.आ.श्री कल्याणसागरसूरि | १७४ |
| ६५ | विबुधादिराजैर्नतपादपद्मं | पू.आ.श्री कल्याणसागरसूरि | १७५ |
| ६६ | गौडिपुरप्रभुपार्श्वममन्दं दर्शन- | पू.आ. श्री कल्याणसागरसूरि | १७७ |
| ६७ | श्रीकरं कष्टहर्त्तारं विधिवाद- | पू.आ.श्री कल्याणसागरसूरि | १७९ |
| ६८ | कामौघकर्त्तारमशेषदेवाधी- | पू.आ.श्री कल्याणसागरसूरि | १८० |
| ६९ | देवाधिदेवं कृतपार्श्वसेवं | प.आ.श्री कल्याणसागरसूरि | १८१ |
| ७० | विबुधमानवमानसनन्दनं | प.आ.श्री कल्याणसागरसूरि | १८२ |
| ७१ | भविकाम्बुजभासनभानुनिभं | पू.आ.श्री कल्याणसागरसूरि | १८४ |
| ७२ | ॐ नमो देवदेवाय नित्यं | पू.आ. श्री मेरुतुङ्गसूरि | १८६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ७३ | सेढीतटस्तम्भनकप्रतिष्ठः | पू.आ.श्री नयचन्द्रसूरि | १८७ |
| ७४ | सर्वत्रापि भवद्भूत-भावि- | पू.आ.श्री हेमचन्द्रसूरि | १८८ |
| ७५ | श्रीणां पदं सपदि दुर्विपदं | पू.आ. श्री भुवनसुन्दरसूरि | १८९ |
| ७६ | श्रियः क्रीडागेहं रुचिरुचिर- | पू.आ.श्री भुवनसुन्दरसूरि | १९५ |
| ७७ | श्रियोऽभिवृद्धिं विजयोत्सवांश्च | पू.आ.श्री भुवनसुन्दरसूरि | २०१ |
| ७८ | सकलभविकचेतः कल्पना- | पू.आ.श्री विद्यासागरसूरि | २०८ |
| ७९ | यः श्रीपादं तवेश श्रयति | पू.आ.श्री विद्यानन्दसूरि | २१० |
| ८० | श्रीसद्म पद्मापतिपूजिताङ्गं, | पू.आ.श्री भावप्रभसूरि | २१७ |
| ८१ | श्रीमत्कान्तिकलापमङ्गल- | पू.आ.श्री भावप्रभसूरि | २१८ |
| ८२ | कुवलयालिकुलायरकज्जल | पू.आ. श्री सोमदत्तसूरि | २१९ |
| ८३ | त्वमेव जगतां धाता, त्वमेव | पू.आ. श्री पद्मसुन्दरसूरि | २२० |
| ८४ | त्वं स्वयंम्भूः परं ज्योतिः | पू.आ. श्री पद्मसुन्दरसूरि | २२२ |
| ८५ | शान्तानम्रोकरक्षा रतिपरवचन | पू.आ. श्री शिवसुन्दरसूरि | २२५ |
| ८६ | श्रीस्तम्भन ! स्तम्भनपार्श्व ! | पू.आ. श्री तरुणप्रभसूरि | २२६ |
| ८७ | नत्वोपासितचरणं कमठेन | पू.आ.श्री कविकुलप्रभसूरि | २२८ |
| ८८ | योगात्मनामप्यरं परंपरं | पू. आ.श्री जयसागरसूरि | २२९ |
| ८८ | योगात्मनामप्यरं परंपरं | पू. आ.श्री जयसागरसूरि | २२९ |
| ८९ | ॐ नमो भगवते श्रीपार्श्वनाथाय | पू.आ.श्री अजितसिंहसूरि | २३० |
| ९० | श्रीशंखेश्वरपुरवरसमलङ्करणं | पू.आ.श्री पार्श्वचन्द्रसूरि | २३१ |
| ९१ | प्रमुदितमुदितसूरसमभासं, | पू.आ.श्री पार्श्वचन्द्रसूरि | २३२ |
| ९२ | जगन्मण्डले मल्यमालाभिधाने | पू.आ.श्री पार्श्वचन्द्रसूरि | २३३ |
| ९३ | यो देवमर्त्यासुरनागवृन्दै, | पू.आ.श्री पार्श्वचन्द्रसूरि | २३४ |
| ९४ | मनोर्तिहर्त्रे शिवसौख्यदात्रे | पू.आ.श्री पार्श्वचन्द्रसूरि | २३६ |
| ९५ | फलवर्द्धिपुरीसंस्थं, पार्श्वं | पू.आ. श्री पार्श्वचन्द्रसूरि | २३८ |
| ९६ | इक्ष्वाकुवंशोदधिपूर्णचन्द्रं, | पू.आ.श्री पार्श्वचन्द्रसूरि | २४० |

पू.आ. श्री जिनराजसूरि (प्रथम) विरचितम्

# १. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

आनन्दनं सम[सुरा]सुर-मानवानां,
सञ्जीवनं शुभधियां सुरमानवानाम् ।
सौभाग्यसुन्दरतया भुवनाभिरामं,
श्रीपार्श्वनाथवदनं विनुवामि कामम् ॥ १

प्रातः पदार्थपटलीविहितावतारं,
पश्यन्ति वो जिनमुखं मुकुरानुकारम् ।
कल्याणकारणमनन्त-मनोविशुद्धि-
स्तेषां भवेदिह मनोभिमतार्थसिद्धिः ॥ २

आलोकिते तव विभो ! वदने दिनेश-
नैशन्तिशा जगति मोहमयी विलेशे ।
पुण्यप्रकाशरचितेन तमोव्ययेन-
सर्वर्तुसौहृदयुजा कमलोदयेन ॥ ३

सल्लोचनेषु घनतापभिदा रसालैः
सारैः सुधामिव कुरन्नयनांशुजालैः ।
देवत्वदान(व?)सुधांशुरसौ निशान्त,
आलोकि सेवकजनैः सुकृतीनकन्तैः ॥ ४

लावण्यकेलिलहरीललिते नवीने,
वक्त्रे सुधासुरससुन्दर ! तावकीने ।
तृष्णातिरेकतरले नयने निलीये-
होनन्ततापकलुषे त्यजतां मदीये ॥ ५

विस्मेरलोचनदले कमलानिवासे,
निःसीम-सौरभभरे सुगुणावभासे ।
दृष्टिः सतां जिनपते ! वदनारविन्दे,
नालीयते कथममन्दवचोमरन्दे ॥ ६

दूर्वकन्नयनचन्दनचारुक्षिप्रं(?)
राजद्विजालिरुचितन्दुलजालदीप्रम् ।
सन्मङ्गलं दिशतु पुण्यफलाधिगम्यं,
जैनेश्वरं वदनमक्षतपात्ररम्यम् ॥ ७

नीलोत्पलामलदलायतनेत्रमानं,
सद्दन्तभा कुसुमदामविराजमानं ।
पुण्यश्रिया लवणिमाम्बुभृदा सुलम्भः
स्यान्मे शिवाय जिन ते मुखपूर्णकुम्भ ॥ ८

एवं मया वदनवर्णनया विभादे,
हर्षाञ्चितेन विहिता विनुतिः शुभाले ।
याचे दयेव जिनराज दयां निधेहि,
दृष्टिं प्रसादविशदां मयि सन्निधेहि ॥ ९

पू.आ. श्री जिनेश्वरसूरिसूत्रितम्

(यमकालङ्कारमयं)

## २. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(स्रग्विणी)

देववर्माङ्गजं पिष्टदुष्टाङ्गजं
कृष्णरम्याङ्गजं कर्मवल्लया गजम् ।

निर्जरैः संस्तुतं श्रेयसे संस्तुतं
भीतिनिर्दारकं स्तौमि निर्दारकम् ॥ १

देहिकां लोचनं पाप्मतो मोचनं
कामसङ्कोचनं कायगोरोचनम् ।
दुर्गतित्रोटकं दुर्मतिच्छोटकं
धूतविस्फोटकं व्यापदां स्फोटकम् ॥ २

नीलरत्नावलीविग्रहं विग्रहं
ध्वंसमानं स्फुरत्कुग्रहं कुग्रहम् ।
पार्श्वनाथं स्तुवे कामदं कामदं
देवदेवं मुदा भामदं भामदम् ॥ ३

उत्करं यो व्रते दत्तविद्रावणं
सर्वदा सर्वदारिद्र्यविद्रावणम् ।
तं महामो महामोहसन्त्रासकं
त्रासकं विद्विषां पार्श्वमत्रासकम् ॥ ४

शर्मदं कर्मदन्तीन्द्रपञ्चाननं
स्तौमि राकाशशाङ्कावजैत्राननम् ।
श्रीजिनं श्रीजिनं नादिनां वादिनां
शुद्धबुद्ध्या सुराचार्यसंवादिनाम् ॥ ४

सारवक्षस्तटं रत्नराजिस्फुटं
सद्गुणैरुद्धटं तेजसाऽत्युत्कटम् ।
कीर्त्तिभाजं नमामो नमामोदकं
तीर्थराजं स्मराम स्मराम प्रभुम् ॥ ६

नागराजध्वजं प्रह्वशक्रव्रजं
देहिनां दर्शितप्राञ्चमुक्तिव्रजम् ।
संश्रयामो जिनं सन्मतं सन्मतं
श्र्यश्वसेनस्य वाऽऽनन्दनं नन्दनम् ॥ ७

मोहनं मोहनद्या वहं भिन्दते
दर्पकन्दर्पकन्दं समुच्छिन्नते ।
साध्वसं साध्वसं तोषदं शोषदं
विघ्नते विघ्नतेस्त्वा नमस्तीर्थराट् ! ॥ ८

जीवराजीवराजीवराहस्करो
पुष्पकोदण्डकोदण्डनिर्जित्वरः ।
धूततीर्थाधितीर्थाधिनाथः सुखं
रात्वसौ भाग्यसौभाग्यवृद्धिप्रदः ॥ ९

भीमदं भीमदं संहरन्तं नृणां
सत्क्रमं सत्क्रमं विक्रमं बिभ्रतम् ।
सूरसं सूरसङ्काशतेजःपदं
शुभ्रभाः शुभ्रभाः कीर्त्तिमर्चे जिनम् ॥ १०

यो विजिग्ये तपःकामठं कामठं
दुर्गतिद्वारसम्पातकम्पातकम् ।
तं नमामो मुनीपावनं पावनं
तीर्थपं क्रोधविध्यापनं ध्यापनम् ॥ ११

(भुजङ्गप्रयात)

जगद्भावलक्षं वलक्षं यशोभिः
प्रभाराशिवाशंशिवासं जिताशम् ।
सुधामाङ्गमव्याधिमाधिच्छिदं
नमामोऽनमामोदमीशं दमीशम् ॥ १२

वरीयः समाधिः समाधिप्रमोष-
स्त्रिलोकीमहोदो महोदोषशोषः ।
नमद्युक्षमेशक्षमेशः स पार्श्वः
तनोतु प्रमोदं प्रमोदश्चितं नः ॥ १३

शमीशः शमीशः कुबोधान्यकान्ते
महीयोमहीयो भृशं व्यातनोतु ।
समेऽतः समेतः श्रिया कष्टकूप-
प्रपातात् प्रपातात् प्रभुः पार्श्वनाथः ॥ १४

मलानामलानाय बोभूयमानः
शमानाशमानाय मालोयमानः ।
घनानां घनानां रुचिं प्रास्यमानः
स्वकान्त्या स्वकान्त्या नितोऽव्याज्जिनो माम् ॥ १५

सुखाने ! सुखानेकधाम्नां कधाम्नां
भवाने भवानेतृकोऽपि च्छिदेऽर्हन् ।
प्रमाद प्रमादक्षयाय क्षयाय
व्रजस्य व्रजस्य प्रधानस्य लब्ध्यै ॥ १६

क्षमाद क्षमादस्वपादप्रसादभ्रमादभ्रमादप्रणाश प्रणादम् ।
महाना महानागदङ्कार ! सार ! प्रभो !
मे प्रभोमे दिश त्वं जिनेन्द्र ! ॥ १७

मनोभूषणं भूषणं विश्वविश्वे महःपूषणं पूषणं मोहवृत्ते ।
समध्यासितं ध्यासितं नम्रदेवं
रमाराजितं राजितं नौमि देवम् ॥ १८

द्युसन्मौलिसन्मौलिपृष्ठाङ्घ्रिपद्मः
सुकल्याणकल्याणसिंहासनस्थः ।
समाधानमाधानदक्षो मतक्षो
रमा रातु मारातुरत्वच्छिदेऽर्हन् ॥ १९

योगतो योगतो निर्वृतिं निर्वृतिं
नीरतो नीरतोषप्रदस्तीर्थपः ।
साधितः साधितव्याधिनाशोऽवता
दानतो दानतोशाब्धिभिर्वै बुधैः ॥ (स्रग्विणी) २०

इति जिनेश्वरसूरिनुतो गुणैरमलसत्क्रम ! देहि शिवालयम् ।
त्वमिह पार्श्व ! कृतप्रणतप्रभा
रम ! लसत्क्रम ! देहि शिवालयम् ॥ (द्रुतविलम्बित) २१

पू.आ.श्री सोमसुन्दरसूरिविरचिता

## ३. ॥ श्रीस्तम्भनपार्श्वनाथपञ्चविंशतिका ॥

(भुजङ्गप्रयात)

स्फुरत्केवलज्ञानचारुप्रकाशं,
फणामण्डपाडम्बरोद्द्योतिताशम् ।
महाकर्मपङ्कौघनाशे दिनेशं,
स्तुवे स्तम्भनाधीशपार्श्वं जिनेशम् ॥ १

प्रभो ! सद्गुणश्रेणिलक्ष्मीनिवासं,
भवन्तं प्रदत्तान्तरारिप्रवासम् ।
जगद्वन्द्यपादाम्बुजं कोऽस्तहासं,
जनः स्तोतुमीष्टे लसद्देवदासम् ॥ २

महानन्दलीलाविलासैकगेहं,
तथापि प्रभो ! किञ्चन त्वां स्तुवेऽहम् ।
महाभक्तिरागेरितो नीलदेहं,
जिनाऽज्ञोऽपि भव्यावलीपूरितेहम् ॥ ३

जय त्वं प्रभो ! प्राप्तसंसारतीर !,
स्फुरत्पापधूलीप्रणाशे समीर ! ।
महामानमायावनीसारसीर !
ज्वलत्क्रोधदावानले मेघनीर ! ॥ ४

अहं त्वां निरीक्ष्याद्य जज्ञे कृतार्थः,
सनाथीकृताशेषभव्याङ्गिसार्थ ! ।
तथा धन्यभावो ममाद्येश ! जातः,
सदा सेवकीभूतदेवेन्द्रजात ! ॥ ५

ममाद्याऽभवन् नेत्रयुग्मं पवित्रं,
महादोषमालातृणालीलवित्रम् ।
यतो दृष्टमेतद्गुणश्रेणिपात्रं,
त्वदीयं मया भाग्ययोगेन गात्रम् ॥ ६

वचः स्यात्तदेवात्र लोके प्रधानं,
भवन्तं स्तुते यद्गुणानां निधानम् ।

मनोऽपि प्रशस्यं भवेदेतदेव,
त्वमानन्दतो ध्यायसे येन देव ! ॥ ७

सदा देवलोके सुरेशा भवन्तं,
मुदाऽभ्यर्चयन्त्यद्भुतज्ञानवन्तम् ।
तथा पन्नगा नागलोके स्तुवन्ति,
प्रभो ! मर्त्यलोके नरेन्द्रा नुवन्ति ॥ ८

प्रमोदेन येनार्च्यसे नाथ ! नित्यं,
विहाय प्रभाते समस्तान्यकृत्यम् ।
असौ संसृतौ नो घनं बम्भ्रमीति,
क्षणात् सिद्धिवध्वा समं रंरमीति ॥ ९

जिन ! त्वां जनो यः सदा तोष्टवीति,
त्रिलोकीस्तुतोऽसौ क्रमाद् बोभवीति ।
तव ध्यानतः स्वं च यः पोपवीति,
स्वकर्माणि सर्वाण्ययं लोलवीति ॥ १०

मनो यो विधत्ते तव ध्यानवश्यं,
जनोऽयं मनोऽभीष्टमाप्नोत्यवश्यम् ।
लभेताऽथवा कामितं को न कल्प-
द्रुमं संश्रितः पुण्यलक्ष्म्येकतल्पम् ? ॥ ११

महामोहमिथ्यात्वघोरान्धकारे,
प्रभो ! दुष्षमाकालरात्रिप्रचारे ।
मया भाग्ययोगेन दीपोपमान-
स्त्वमद्याऽसि दृष्टो गुणैर्दिप्यमानः ॥ १२

तवाऽऽलोकनादेव मे देव ! कष्टं,
समग्रं जिन ! स्तम्भनाधीश ! नष्टम् ।
प्रभातेऽथवा भानुबिम्बेऽपि दृष्टे,
तमोजालमुर्व्यां किमु स्थातुमीष्टे ? ॥ १३

गुणागार ! संसृत्यरण्यान्तराले,
भवानन्यतीर्थावलीवृक्षजाले ।
मयेतस्ततो भ्राम्यता सार्थनाथ !,
शिवाध्वन्यवापे भवौ(यौ?)घाग्निपाथः ॥ १४

सुपर्वद्रुमस्वर्गवीकामकुम्भ-
स्फुरद्देवरत्नादिका अप्यदम्भ ! ।
न भावा विभो ! दुर्लभाः किन्त्वपापं,
त्रिलोकीतले शासनं ते दुरापम् ॥ १५

तथाभव्यताऽऽदित्यकान्तिप्रयोग-
प्रबुद्धेषु विध्वस्तरागादिरोग ! ।
सतां मानसाब्जेषु खेलत्सहेलं,
प्रभो ! भृङ्गसि श्यामलाङ्गाऽनुवेलम् ॥ १६

त्वदीयोरुमाहात्म्यवन्नाममन्त्र-
स्मृतेरप्यनन्ताद्भुतज्ञानसत्र ! ।
करिव्याघ्रसिंहोरगारातिभूता-
दिभीतिः क्षणात् क्षीयतेऽतिप्रभूता ॥ १७

भवापारवारांनिधौ विश्वनेत-
र्महादुःखनीरेऽन्तरङ्गारिजेतः ! ।

नृणां मज्जतां तारणायोरुकाष्ठ-
तरण्डायते शासनं ते गरिष्ठम् ॥ १८

चरीकर्त्ति तेऽर्चां जनो यो वरिष्ठा-
म्बरीभर्त्ति भक्तिं च चित्ते पटिष्ठाम् ।
नरीनर्त्ति कीर्त्तिर्जने तस्य वर्यं,
सरीसर्त्ति वा चिन्तितं सर्वकार्यम् ॥ १९

प्रसर्पत्प्रभावस्य तेऽल्पस्वभावा,
विभो ! नैव साम्यं श्रयन्तेऽन्यदेवाः ।
प्रभाभ्राजमानस्य भानोः किमेते,
लभन्ते तुलां तारका अप्यनन्ताः ? ॥ २०

स्वचित्ताऽऽलवालप्ररूढा वरेण्य-
क्रियातोयपूरेण सिक्ता शरण्य ! ।
तवाज्ञामहाकल्पवल्ली जनानां,
फलैः पुम्फुलीतीप्सितैः सज्जनानाम् ॥ २१

सदाऽचीचरद्देवराजैः स्वदास्यं,
तथाऽचीकरद्यो महेशेन लास्यम् ।
जनेऽवीवृतत् स्वा(त्वा?)मिहाज्ञां च कामं,
त्वमर्हन्नजैषीस्तमप्याशु कामम् ॥ २२

विभो ! कल्पवृक्षोऽस्यभीष्टार्थदाने,
सुधाम्भोदसि क्षेमवल्लीविताने ।
दिनेशायसे भव्यराजीवचक्रे,
त्वमिन्दूयसे वा सुदृग्दृष्टिचक्रे ॥ २३

अदीपिष्ट भूमौ भवानीश ! विश्वं,
स्वतोऽबोधि सज्ज्ञानयोगेन विश्वम् ।
अपूरिष्ट कीर्त्त्या समस्तं त्रिलोकं,
तथाऽतायि सूक्ष्मेतरं जीवलोकम् ॥ २४

श्रीस्तम्भनाभरण ! पार्श्व ! भवन्तमेवं,
प्रातः स्तुते प्रतिदिनं घनवासनो यः ।
वश्याः श्रयन्ति भगवन् ! मनुजाधिराज-
श्रीदेवसुन्दररमाशिवसम्पदस्तम् ॥ (वसन्ततिलका) २५

पू.आ.श्री सोमसुन्दरसूरिविरचितः

## ४. ॥ श्रीनवखण्डापार्श्वनाथस्तवः ॥

(शार्दूलविक्रीडितम्)

स्फूर्जन्नागफणामणीगणसमुद्भूतप्रभूतप्रभा-
भारोद्भासितभूमिमण्डलमहं मन्दोऽपि मोहोदयात् ।
स्वामिंस्त्वां नवखण्डपिण्डिततनुं श्रीपार्श्व ! विश्वेश्वरं,
घोघासन्नगरप्रधानवसुधालङ्कारभूतं स्तुवे ॥ १

नागैः संवलितान् निधीन् नव तव स्वामिन्नमून् सङ्गतान्,
मूर्तौ खण्डमिषाद्विभिन्नवपुषोऽप्येकात्मतामागतान् ।
मन्येऽहं यदि चैतदेवमिह न स्यात् तत्कथं प्राणिना
मेतेभ्यः परमा रमा निरुपमाः स्युः सर्वदा शर्मदाः ॥ २

स्वर्गस्थानि मतान्यमूनि सुमनोनाथस्य नाऽहिप्रभोः,
पातालालगितानि पन्नगपतेर्नो स्वर्गभूमीभुजः ।

सञ्चिन्त्येति विधिर्न्यधान्नव सुधाकुण्डानि भूमण्डले,
मन्ये त्वत्तनुखण्डमण्डलमिषात्तुल्ये तयोः श्रीविभोः ॥ ३

चञ्चच्चारुनवोरुखण्डवपुषस्त्वत्तोऽनिशं सेवकी-
भूयाऽऽप्तं नवभिर्ग्रहैरिह महास्वामिन् महीयो महः ।
जाने तेन विहायसि प्रसृमरस्वज्योतिरस्तापर-
ज्योतिर्मण्डलभाः प्रभान्ति भुवने प्रत्यक्षलक्ष्या अमी ॥ ४

विश्वेऽस्मिन्नधुना कलौ विरसतामाप्ते समस्ते विभो !,
लक्ष्याः खण्डमिषान्निराश्रयतया शृङ्गारमुख्या रसाः ।
त्वद्रूपे न्यविशन्नमी शममये श्रित्वा स्वयं शान्तितां,
नो चेत्तद्भविनो विभिन्नरसिनस्तोष त्वयीयुः कथम् ? ॥ ५

विष्वग्दोषाकलुषपरमब्रह्मरूपैकमूर्त्ते !,
स्वामिन् मूर्त्तिं त्वमसमतमज्योतिरुद्योतिताशाम् ।
स्वीयां बिभ्रन्नवनवमहाखण्डरूपस्वरूपां,
स्वस्मिन् नाविर्जनयसि नवब्रह्मगुप्त्यात्मकत्वम् ॥(मन्दा.) ६

मन्ये नूनं त्वया यद्रिपुबलमखिलं रागदोषादिमुख्यं,
जिग्ये देवाऽन्तरङ्गं समरभुवि महातेजसाऽप्येककेन ।
तेनाङ्गेष्वेषु जातान्यभवत च नवस्वप्यमूनि क्षतानि,
प्रत्यक्षं वीक्षितानि क्षितिमुकुटमहावीरतां व्यञ्जयन्ति ॥ ७
(स्रग्धरा)

नवभ्यः खण्डेभ्यः स्वयमयमुपादाय धरणे-
र्विधाताऽणून् सारान् व्यधित नियतं किं किल तनुम् ।

अभूवंस्तेनाङ्गे तव नव विभागाः पृथगिति,
प्रभो ! मन्ये यस्मात्क्वचिदपि न हीदृक् परवपुः ॥ ८

(शिखरिणी)

इति प्रातर्भक्त्या प्रतिदिनमधीते तव नवं,
स्तवं यः श्रीपार्श्व ! प्रथितनवखण्डाभिध ! विभो ! ।
नवोदग्रग्रैवेयकमुखमहासौख्यविभवं,
विभुज्यासौ भुङ्क्ते ननु नवभवान्तः शिवसुखम् ॥ ९

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## ५. ॥ साहपुरश्रीपार्श्वनाथस्तवनम् ॥

(वंशस्थम्)

जयश्रियां सङ्गममाप्तुमिच्छवः,
स्तुवन्ति यं सर्वसुरेश्वरा अपि ।
जगत्त्रयत्राणकरं तमानुमः,
पार्श्वप्रभुं साहपुरे कृतस्थितिम् ॥ १

यथा निशायां प्रसृतांस्तमोभरान्,
निहन्तुमेवोदयते दिवाकरः ।
दुःखोत्करान् नाथ ! तथोद्गतान् जग-
त्यपासितुं प्रादुरभूस्ततोऽव माम् ॥ २

वृथैव ताम्यन्ति जनाः समीहया,
सुसम्पदामौपयिकैरनेकशः ।
तासां परं ह्यौपयिकं वशीकृतौ,
त्वन्नाममन्त्रप्रणिधानमेककम् ॥ ३

दुरासदास्ता जगदीह्यमानाः,
सुखश्रियः प्राणिषु तावदेव ।
यावन्न लब्धा तव पादसेवा,
कल्पद्रुमाप्तौ हि सुदुर्लभं किम् ॥ (उपजातिः) ४

भवन्ति ते स्नानजलेन सिक्ता,
ग्रस्ता महाऽऽमैरपि दिव्यदेहाः ।
भजन्ति किं सिद्धरसानुभावात्,
सुवर्णभावं नहि लोहपिण्डाः ? ॥ (उपजाति) ५

त्राताऽमरेन्द्रादिजगत्त्रयस्य,
त्राणं कियन् मे लुठतस्तवांह्र्योः ।
धौताद्रिवृन्दस्य कियद् घनस्य,
प्रक्षालनं वा सिकताकणस्य ॥ (इन्द्रवज्रा) ६

प्रसरन्नभितोऽशिवोच्चयः,
प्रहतो यद्भवता किमद्भुतम् ।
अतिवर्षति दुर्द्धरोत्तरो-
न्नतवार्दे हि दवक्षयः कियान् ॥ (वैतालीयम्) ७

त्वयि रक्षति केऽप्युपद्रवा,
उचिते नाभिभवन्ति यज्जगत् ।
हरिणा हरिणारिपालितं,
वनखण्डं किमु भङ्क्तुमीशते ? ॥ (वैतालीयम्) ८

एवं जगद्रक्षणे दक्षिण ! स्तुतः,
पार्श्वप्रभो ! साहपुरावतंसक ! ।

निरस्य सर्वद्विषतो जयश्रियं,
सबोधिमारोग्यपदं च देहि मे ॥ ९

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ६. ॥ श्रीजीरापल्लीपार्श्वनाथस्तोत्रम् ॥

जयश्रियं सर्वरिपून् जिगीषतां
स्तुता यदाख्याऽपि तनोति मन्त्रवत् ।
स्तवीमि तं पार्श्वजिनं शिवश्रिये
श्रीजीरिकापल्लिवतंसमिष्टदम् ॥ (उपजाति) १

प्रसद्य मातः ! कुरु भारति ! स्थिरां
हृदि स्थितिं मे कविकल्पधेनुके ! ।
विधाय यत्पार्श्वजिनस्य संस्तुती-
र्जनो लभेतायमपीप्सितं फलम् ॥ (वंशस्थ) २

इहाप्यहीन्द्रो धरणः प्रसत्तिभाग्
यया तनोतीष्टसुखानि सप्रियः ।
परत्र चाप्याः शिवसम्पदोऽपि तां
न कः स्तुतिं पार्श्वविभोर्विधित्सति ? ॥ (वंशस्थ) ३

गुणाननन्तान् क्रमवर्त्तिवाग् न ते
भवाम्यलं स्तोतुमितीश ! वेद्म्यहम् ।
तथापि ते भक्तिरसैकवेदनं
वेद्यान्तरं पार्श्व ! विचारमस्यति ॥ (उपजाति) ४

अपारयन् वक्तुमयं जनः प्रभो !
सतोऽपि तेऽनन्ततयोज्ज्वलान् गुणान् ।

कथं परेषु स्तुवतोऽसतोऽपि तान्
कुतीर्थिकांश्चित्रकृतो न वन्दते ॥ (उपजाति/वंशस्थ) ५

(वंशस्थ)

अशेषतो नाथ ! ममैव न स्तवै-
र्न नूयसे किन्तु सुयोगिनामपि ।
न पूर्यते यः किल धूमरीकणैस्-
तथैव सिन्धुः स सरिद्गणैरपि ॥ ६

अथ स्वबोधावधि ते स्तुतिं वद-
न्नवाच्य एषोऽपि जनस्तदा तथा ।
यथेच्छमाक्रामतु खं सुपर्णसू-
र्बलानुरूपं मशकोऽपि का क्षितिः ? ॥ ७

ततः कृता या तव दिव्यदृष्टिभि-
र्महर्षिभिर्ब्रह्ममुखैश्च संस्तुतिः ।
तनोमि तामप्यहमल्पधीधनः
स्वशक्त्यपेक्षा हि फलार्थिनां क्रिया ॥ ८

अथास्त्यपि द्वारमिदं फलाय य-
ल्लवोऽप्यलं ते महिमाऽम्बुधेः स्तुतः ।
महाऽऽमयान् बिन्दुरपि प्रहन्ति वा
न किं सुधाया विधिनोपयोगभाग् ? ॥ ९

स्वशक्त्यशक्त्योरथ वौचिती न मे
विचारणे भक्तिवशस्य ते स्तुतौ ।
स्वयं भवान् भक्तजनेऽस्ति यत्प्रभुः
समग्रचिन्तास्पददानदीक्षितः ॥ १०

भवन्ति सर्वेष्टरमा वुवूर्षवो
जिहासवो दूरमुपद्रवाश्च यम् ।
स्पृहाऽपि तस्यैव तव स्तवे भवेत्
फलाय सत्कर्ममनोरथोऽपि यत् ॥ ११

सबोधिकारोग्यमुपेयमिच्छतां
स्तुतिं तवैवौपयिकं जगुर्बुधाः ।
इति प्रयत्नोऽत्र ममाप्ययं भवन्
कृतार्थतामृच्छतु ते प्रसादतः ॥ १२

भवत्यसाराऽपि हि गीरनन्तसद्-
गुणे प्रयुक्ता मम विस्तरीष्यते ।
सरित्पतिं प्राप्य भवेत् प्रसारिणी
सरित्तनीयस्यपि नाऽभितः किमु ? ॥ १३

सुसम्पदस्ताः शुभशक्तयोऽपि वा
त्वदेकभक्त्यव्यभिचारिहेतुकाः ।
ममाऽपि सैषोऽनुभवः स्फुरन् कथं
भिनत्ति ते पार्श्व ! नुतौ न मन्दताम् ॥ १४

महाऽऽमयाद्याऽखिलविघ्नभेदनात्
प्रमाणमारोहति ते स्तुतिः स्वयम् ।
विभिन्दती तीक्ष्णमुखेन यत्पटं
करोति सूच्येव हि मार्गमात्मनः ॥ १५

प्रयत्नभाजामपि ते स्तवेऽग्रतः
प्रवृत्तये स्युर्भवदिष्टसिद्धयः ।

सुखाकृताः शीतलवायुनाऽपि हि
श्रयन्ति तृष्णातरलाः स्वयं सरः ॥ १६

विभिद्य बाह्यान्तरविघ्नसम्मिलत्
कपाटयुग्मं परशुस्तव स्तवः ।
मनीषिणः केवलगोपुरे शिवा-
लये ध्रुवानन्दमये प्रवेशयेत् ॥ १७

पदं महिम्नां तव संस्तुतिं दध-
न्न दूयते दुःखभरैर्भवोद्भवैः ।
भृतां जलैः किं सरसीं समाश्रितः
प्रदह्यतेऽरण्यभवैर्दवाग्निभिः ? ॥ १८

तपांसि पुंसां ददते न तत्फलं
न यन्त्र-मन्त्रा न च योगसाधनाः ।
न चाऽपि देवान्तरपर्युपासनास्-
तनोति यत्ते स्तवनं मनोऽतिगम् ॥ १९

महोन्नता शुद्धपदस्थितिप्रदाऽ
वदातसोपानततिप्रनिर्मिता ।
दधाति निःश्रेणितुलां तव स्तुतिः
शिवालयारोहकरी मनस्विनाम् ॥ २०

स्तुमस्तमेकं धरणं फणीश्वरं
तवानुकम्पाफलभोगशालिनम् ।
भवान्तरे यं परमेष्ठिमन्त्रदः
स्वयं भवानन्वशिषज्जगद्गुरुः ॥ २१

दधाति लोलाश्रवसः स विंशतिं
शतानि चक्षुःश्रुतिराट् ततः किल ।
गुणांस्तव स्तोतुमवेक्षितुं श्रियं
प्रभावमाकर्णयितुं च सर्वतः ॥ २२

पद्मावतीयुक् त्वदुपास्तिलालसो
व्यनक्ति सम्प्रत्यपि तत्कृतज्ञताम् ।
तवोग्रभक्तिं च स भक्तपालनात्
फलानुमेया हि निदानशुद्धयः ॥ (उपजाति) २३

भयानि रोगोरग-वह्नि-विद्विषां
सदुर्जनानां प्रभवन्ति तेषु न ।
स्तुतिस्त्वदीया किल यैर्विधीयते
वृत्तिर्बुधैः स्वस्य जिनेश ! पालनी ॥ (उपजाति) २४

अकृत्रिमा बद्धगुणा स्तुतिस्तवाऽ-
नुभूयमाना स्वदतेऽधिकाधिकम् ।
न चर्व्यमाणा भजतेऽधिकाधिकं
किमिक्षुयष्टिः प्रसरद्रसात्मताम् ? ॥ २५

कृता परेषां तु विकल्पितैर्गुणै-
र्विचार्यमाणा विशरारुरेव सा ।
किमन्तरन्तः कदली प्रदर्शयेत्
समीक्ष्यमाणा न निजामसारताम् ॥ २६

जडा गुरूकृत्य परान् स्तुवन्ति यै-
र्जगज्जनिस्थेमवधादिकृद्गुणैः ।

वदन्ति तैरेव विडम्बकानमून्
मतत्वदाज्ञाः स्तवनार्हतामुचः ॥ २७

गतास्त्वदन्ये स्तवनीयतां गुणै-
र्न कल्पितैर्गौरवमापिता अपि ।
न वायुभिर्मूर्द्धसु भूभृतां गतान्यपि
त्यजन्तीह रजांसि लाघवम् ॥ २८

मृगास्त्वदन्येषु मरुस्थलेष्विव
स्फुरद्गुणाम्भोभ्रमविप्लुताशयाः ।
हहा ! तमोग्रीष्मखरातऽऽपार्दिता
वृथैव ताम्यन्ति शिवाशयाः स्तवैः ॥ २९

तव स्तवान्मुक्तिरमाऽप्यवाप्यते
प्रयास एव त्वपरस्य सर्वतः ।
ददाति रत्नाकरवन्मणिश्रियं
न चित्रनुत्याऽपि जलाशयान्तरम् ॥ ३०

स्तुतिस्त्रजं ते सुमनोमतामिमां
दधाति यः स्वे गुणगुम्फितां हृदि ।
स जीरिकापल्लिविभो ! विमुच्यते
कुकर्म्मभिः पार्श्व ! सुखैकभाजनम् ॥ ३१

एतज्जाति-भया-ऽऽमयादिविविधक्लेशैर्जगद् व्याकुलम्
तैरेव व्यथितैर्न शक्यमवितुं श्रीपार्श्व ! देवान्तरैः ।
त्वामेवेति बुधाः श्रयन्त्ययमपि स्तोतुं प्रवृत्तो जनः
सर्वेष्टा लभतां त्वदेकशरणः श्रेयःश्रियः शाश्वतीः ॥ ३२

(शा.वि.)

जीरापल्लिविभूषणं जिनमिति श्रीपार्श्वनाथं मुदा
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ३३
(शा.वि.)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ७. ॥ श्रीस्तम्भनपार्श्वनाथस्तोत्रम् ॥

जय श्रीस्तम्भनाधीश ! श्रीमत्पार्श्व ! जगत्प्रभो ! ।
तव स्तवनतः कुर्वे सर्वश्रेयःश्रियो वशाः ॥ (अनुष्टुप्) १

आरभ्येच्छामपि शुभफले ते स्तवे साभियोगा
मुक्त्यै सर्वेऽप्यमलसरसीवाम्बुने नाऽद्भुतं तत् ।
त्रैकाल्येऽपि ह्यपरनुतिषु क्लेशमात्रप्रदासू-
द्युक्तास्तीर्थ्या इव रविरुचिष्वर्णसेऽस्यै तु चित्रम् ॥ २
(मन्दाक्रान्ता)

कुशलः प्रकरोति कर्म तत्
प्रतिभात्यायतिसुन्दरं हि यत् ।
इति कस्य भवत्परान् प्रभो !
स्तुवतो नर्मपदं न कौशलम् ॥ (ललिता) ३

शिवसुखं ह्यपरे भवसङ्गताः
स्तुतिशतैरपि नो ददितुं क्षमाः ।
स्पृहयतोऽस्य तदेव तवैव तत्
समुचिता नुतिरर्थितदायिनः ॥ (ललिता) ४

चित्रं न देवेषु परं प्रबुद्धाः
स्तुवन्ति मत्वोडुषु सूरवत्त्वाम् ।
केऽप्याद्रियन्तेऽर्कधियेव भानि
देवान्तराण्याप्ततया नु चित्रम् ॥ (उपजाति) ५

विघ्नान् विनिघ्नन् स्वयमेव कर्त्तॄन्
शिवार्थिनः प्रेरयति स्तवस्ते ।
प्रीता न किं सौरभतोऽपि तापा-
र्दिता द्रुमं चन्दनमाश्रयन्ति ? ॥ (उपजाति) ६

इहाप्यमुत्रापि च पार्श्वनेतः !
श्रेयःसुखश्रीप्रतिभूः स्तवस्ते ।
जनाः परोक्तौपयिकान्तरैस्तद्
वृथैव ताम्यन्ति तदर्थिनः किम् ? ॥ (उपजाति) ७

प्रभुत्वसीमा ममतोद्धतैः परै-
र्नियोजिता येषु हरादिषु प्रभो ! ।
व्यडम्बयत्तान्मदनस्त्वमेव तं
जघन्थ तत्ते प्रभुताऽस्तसीमका ॥ (वंशस्थ) ८

मनांसि धावन्ति समग्रदेहिनां
प्रभो ! ग्रहीतुं कुशलानि सर्वतः ।
स्तुवे जिनैतान् कुशलांस्तु कांश्चन
त्वदागमाद्ये तदुपायवेदिनः ॥ (वंशस्थ) ९

सुनिश्चितानन्तहितं विहाय
त्वदीरितानुष्ठितिकर्म केचित् ।
सुनिश्चितानन्तभवार्त्तिदेषु
मिथ्यात्वकर्म्मस्वपि धिग् यतन्ते ॥ (उपजाति) १०

कथं रमन्ते न परेषु ते प्रभो !
प्रकल्पिताणुप्रभुतागुणेष्वपि ।
तवोपदेशासहना विकल्पनोद्-
भवेषु संसारसुखेषु ये रताः ? ॥ (वंशस्थ) ११

यथा निजानुष्ठितिसाधुकल्पिता
जिनेन्द्र ! मुक्तिः कणभक्षशिष्यकैः ।
भवद्गुणद्वेषभवार्त्तिपातिनां
न वच्मि तेषां सुलभां तु तामपि ॥ (वंशस्थ) १२

स्वसेवकानेव भवाम्बुराशा-
वर्हन् ! परे मज्जयितुं समर्थाः ।
प्रभुस्त्वतस्तारयितुं त्वमेता-
नेवेति तेभ्योऽधिकताऽस्तु का ते ? ॥ (उपजाति) १३

निरञ्जनाव्यक्तमगम्यमेकं
तीर्थ्याः स्वरूपं तव माऽनुभूवन् ।
श्रुत्वाऽपि ते नाथ ! गुणानतुल्या-
न्न देव ! तत्त्वं तु विदन्ति चित्रम् ! ॥ (उपजाति) १४

जानासि विश्वं न च ते परोऽस्ति
ज्ञाताऽर्च्यसे त्वं जगता न तेऽर्च्यः ।

त्वमर्थ्यसे मुक्तिसुखं सुरेन्द्रै-
रप्यर्थ्यमास्ते न हि तेन चार्थ्यः ॥ (उपजाति) १५

मनोदकं मोहमलाविलं मे
न केवलश्रीपरिभोगयोग्यम् ।
त्वद्ध्यानधीकातकचूर्णयोगात्
परां विशुद्धिं तदुपैतु नेतः ! ॥ (उपजाति) १६

अनन्तसङ्ख्यस्य भवद्गुणाब्धेः
स्वपापराशेश्च न यामि पारम् ।
ततो जगन्नाथ ! तथा प्रसीद
यथा तयोर्द्राक् तमुपैमि सम्यग् ॥ (वंशस्थ) १७

(उपजाति)

अनन्तपापैः पततो भवे मे
त्राता न कोप्यस्ति ततोऽतिखिद्ये ।
आराध्यसे यैस्तु यथावदेषा-
मेकोऽसि पातेति मनाक् प्रमोदे ॥ १८

बिभेमि घोराद्भवदुःखराशे-
र्मोहं च तद्धेतुमलं न हातुम् ।
त्रातुं ततोऽनन्यगतिं प्रभुर्मां
पार्श्व ! त्वमेकोऽसि कुरूचितं तत् ॥ १९

शरीरवप्रेषु मनोगृहेषु
प्रविश्य मोहारिकुलानि जीवान् ।
गृह्णासि कैवल्यपुरेऽत्र हेतु-
स्तवारिषड्वर्गमुचः कृपैव ॥ २०

चित्रं न तद्वर्णयितुं प्रभाव-
स्तवामरेन्द्रैरपि यन्न शक्यः ।
अनन्तमेतं यदनन्तशक्तिः
शक्नोति वक्तुं न जिनोऽपि पार्श्व ! ॥ २१

तव प्रभावाक्षयसेवधेर्नु
लवान् गृहीत्वाऽम्बुनिधेरिवाब्दाः ।
स्वर्धेनु-रत्न-द्रु-घटादयोऽर्थाः
प्रीणन्ति विश्वानि यथेष्टदानैः ॥ २२

घोरेऽधुना पार्श्व ! कलौ निदाघे
विघ्नातपार्त्तानि सतां मनांसि ।
कथं शमाप्स्यंस्तव मूर्त्तिरिषा
न चेत्सुधाकुण्डनिभाऽभविष्यत् ? ॥ २३

स्तवीम्यधिष्ठायकवर्गमेतं
नागाधिराट्तद्दयिताऽऽद्यमीश ! ।
तवांह्रिभक्तव्यसनापहारे
साहायकं यः सततं तनोति ॥ २४

इत्थं स्तम्भनकावतंस ! भगवन् श्रीपार्श्व ! विश्वप्रभो !
स्तुत्वा त्वां मुनिसुन्दरस्तव पदं याचेऽर्थिकल्पद्रुमम् ।
सप्ताप्याशु भयान्यपास्य सकलान्यत्राप्यमुत्राखिल-
क्लेशातीतमनन्तमव्ययपरानन्दं पदं देहि मे ॥ (शा.वि.) २५

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ८. ॥ नागह्रदभूषणश्रीपार्श्वजिनस्तोत्रम् ॥

जय श्रीमन्नागह्रदपुरवरालङ्कृतिमणे !
जिनेन्द्र ! श्रीपार्श्व ! त्रिभुवननुतानन्तमहिमन् ! ।
तव स्तोत्रं कुर्वे फणिफणमणीद्योतितपद !
प्रभो ! पद्मावत्यार्चित ! शिवफलं प्राप्तुममलम् ॥(शिखरिणी)१

सृजन्ति यं दिव्यदृशो महर्षय-
स्तवं विभो ! तेऽहमपीममाद्रिये ।
तिमिङ्गिलाद्या यमुपासतेऽम्बुधिं
भजेत यत्पूतरकोऽपि तं न किम् ? ॥ (वंशस्थ) २

(उपजाति)

गुणांस्तवैतान् भगवन्ननन्तान् न मन्यते कः सुविमर्शदर्शी ? ।
कालं ह्यनन्तं न बुधैरनन्तैर्ये गृह्यमाणा अपि यान्ति हानिम् ॥३

गुणाननन्तानपि ते यथा यथा
गृह्णन्त्यभिज्ञा निदधत्यथो हृदि ।
तथा तथा निर्गुणतां भजन्त्यहो !
स्वस्यापि सत्त्वादिगुणत्रयोज्झनात् ॥ ४

ध्रुवं गुणैस्ते युगपत्त्रिलोकी
भृता समग्रा कथमन्यथाऽमी ।
लभ्या लसन्तो नृसुराऽसुराणां
हृत्कर्णवक्त्रे परितः सदाऽर्हन् ! ॥ ५

उरीकृताः साधु निराश्रयास्त्वया
गुणा ह्यनन्ता अपि तायिनाऽखिलाः ।
यस्यास्पदं विश्वकृतो हरादयश्चिन्ता
पुनर्दोषगणस्य तस्य का ? ॥ ६

स्तुतः शिवायाऽपि भवान् भदन्त !
भवेन्न चार्थाय परोऽणवेऽपि ।
सर्वे हितायाऽपि तरुः सुराणां
सिक्तः फलायाऽपि न चाऽवकेशी ॥ ७

बुधा भवाद्बिभ्यति ये जनिस्थिति-
क्षयैः कथं नाथ ! तदेककर्मणः ।
भजन्ति तेऽर्हन् विधि-विष्णु-भैरवा
न तत्त्रयस्तत् शरणं त्वमेव नः ? ॥ (वंशस्थ) ८

मूर्त्तिः प्रभो ! ते नवखण्डरूपा
सुखश्रियो यज्जनयत्यखण्डाः ।
नताः स्मृता वा महितेति हेतोः
कार्ये गुणक्रान्तिमतं भिनत्ति ॥ ९

धत्से परानन्दमयं किलैकं रूपं त्वमर्हन्निह को विवादः ? ।
तेनैकतां येन हृदा दधाना बुधाः परानन्दमया भवन्ति ॥ १०

अन्तः कषायज्वलनेन देवाः सन्ति ध्रुवं तापमयास्त्वदन्ये ।
संस्पर्शमात्रादपि येन तेषां सतां लभन्ते हृदयानि तापम् ॥ ११

मुखं नु लावण्यसुधासरस्ते
विश्वोपकाराय चकार वेधाः ।

दृशस्त्रिलोक्या अपि यत्र मग्नाः
शैत्यं सदाऽऽनन्दमयं श्रयन्ति ॥ १२

अक्षय्यकोशस्त्वमनन्तशर्म्म-
श्रियां ध्रुवं विश्वजनोपकारी ।
दत्से त्रिलोक्याः स्मृतिवन्दनाद्यैः
सदैव ताः स्वेन च हीयसे न ॥ १३

त्वद्दर्शनेन प्रभवन्ति येषां नेत्रेषु हर्षाश्रुजलप्रवाहाः ।
तेषां प्रशाम्येद्भवदुःखदावः
कल्याणवल्ल्यश्च जिनोल्लसन्ति ॥ (इन्द्रवज्रा) १४

त्वद्दर्शनं नाथ ! कथं गृणन्ति
मनीषिणोऽभीष्टफलप्रदायि ? ।
लब्धे हि तस्मिन् सुधियां फलं स्यात्
सानिष्टसर्वेष्टनिवृत्तिरेव ॥ १५

जज्ञेऽश्वसेनाधिपतेरपीश ! युक्तं सुरेन्द्रैः स्तुतता पितुस्ते ।
क्षारोऽपि रत्नव्रजजन्मनाऽब्धिः
स्तूयेत रत्नाकर इत्यमर्त्यैः ॥ (इन्द्रवज्रा) १६

योषा सुरेखा त्रिदशेश्वरैः स्तुता
वामाऽप्यवामा जगतोऽपि साऽभवत् ।
प्रसूय या त्वां जिन ! विश्वबोधकं
रविं दिगैन्द्रीव सुखाचकार तत् ॥ १७

अचिन्त्यदानैर्लघिमानमर्हन् !
नीतास्तथा कल्पनगास्त्वयाऽत्र ।

यथा किलोत्पाट्य समीरणेन
क्षिप्ता रजोवन्निखिलाः सुमेरौ ॥ १८

चलाचलत्वं भविनो भजन्ते
यात्राकृते पार्श्वविभो ! तवार्हन् ! ।
सुखश्रियस्ते त्वचला लभन्ते
गुणाय दोषोऽपि हि ते प्रभावात् ॥ १९

स्वस्योदरे वा शिरसि स्थितान् वा
क्षमाभृतो मान्ति परेऽरिभीरून् ।
हृदि प्रविष्टः शिरसा धृतो वा
त्वं पासि तान् नाथ ! नवः क्षमाभृत् ॥ २०

तव त्रिलोक्यां महिमा चकास्ति य-
स्तदर्पिताकर्षवशात्समारति ।
समन्ततः पार्श्व ! नरा-ऽमरा-ऽसुरा-
स्त्वदर्चनार्थं भगवन्निहानिशम् ॥ (वंशस्थ) २१

न सम्प्रतिं तं नृपतिं स्तवीति कः
सुखाकृते येन जगज्जनाः सदा ? ।
श्रीपार्श्व ! विश्वेहितशर्मदायक !
त्वत्तीर्थकल्पद्रुमरोपणादिह ॥ २२

स्तभ्नात्याज्ञा तव हरि-करि-व्याल-वह्न्यर्णवादीन्
स्तोत्रं किं तद्वहति मघवाऽप्युत्तमाङ्गे यदेताम् ।
शम्भुर्धत्ते शिरसि सरितं जह्नुजां यां किमस्या
माहात्म्योक्तिः शिशुगणपदोल्लङ्घनाशक्यतायाम् ॥ २३
(मन्दाक्रान्ता)

एवं त्वं नुतपादपद्म ! मयका श्रीपार्श्वनाथार्थ्यसे
नागेन्द्रस्तुतसोमसुन्दरयशाः पद्मावतीपूजित ! ।
नाम्ना यन्मुनिसुन्दरत्वमविदां तादृक् तदेवाऽऽतनु
स्याद्वावारिजयश्रिया मम यतः श्रेयोऽचिराच्छाश्वतम् ॥ २४
(शा.वि.)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

## ९. ॥ फलवर्द्धिमण्डनश्रीपार्श्वनाथस्तोत्रम् ॥

जयश्रीः संश्रयेद् यस्य स्तोतॄन् द्वेधाऽरिनिर्जयात् ।
तं श्रीपार्श्वप्रभुं स्तौमि फलवर्द्धिविभूषणम् ॥ १

(मन्दाक्रान्ता)

आरोग्या-ऽऽयु-र्विभव-विभुता-भोग-सद्बुद्धि-रूप-
श्रेयः श्रेणि-प्रणय-विनयाद्याढ्यपुत्रादिलाभा ।
यत्पूजा स्वर्व्रततिजनुषां वर्णिका स्यात्फलाना-
मत्राप्याप्या स भवतु सतामिष्टकृत्पार्श्वदेवः ॥ २

साम्राज्यश्रीर्गतरिपुभया चक्रिणो वा समृद्धि-
र्देवेन्द्रादित्रिदशपदवी साऽपि चार्हन्त्यलक्ष्मीः ।
सम्पन्मुक्तेरपि च सुलभा ध्यायतो यत्पदाब्जं
स श्रीपार्श्वः सृजतु हृदये मे निवासं सदाऽपि ॥ ३

दत्सेऽत्रापि त्रिभुवनविभुस्त्वं पुमर्थत्रयाप्तिं
प्रेत्य त्रैधं हरसि कृतिनां सर्वसंसारदुःखम् ।

तेन त्राणं सकलजगतां त्वां त्रियोगीविशुद्ध्या
क्लेशव्यूहव्यपगमकृते नाथमेकम्प्रपद्ये ॥ ४

भूम्यन्तर्गतवर्यदेवकुलिकासंस्थां स्रवन्तीं पयो
दृष्ट्वा स्वां सुरभिं चमत्कृतमना ज्ञात्वा सुराऽऽदेशतः ।
श्राद्धो यत्प्रतिमां फणालिरुचिरां प्राचीकटद्धान्धलः
स श्रीमान् फलवर्द्धिभूषणमणिः पार्श्वप्रभुः पातु माम् ॥ ५
(शा.वि.)

देवादेशात्तव जिनपते ! कार्य्यमाणेऽत्र चैत्ये
श्राद्धाग्रण्या शिवकरयुजा तेन चाल्पर्द्धिनाऽपि ।
निष्पन्नेऽस्यादिमवरमहामण्डपेऽथाग्रतस्त-
त्सिद्ध्यै यावद् द्रविणविरहाज्जग्मतुस्तौ विषादम् ॥ ६

तावत्प्रातर्जिन ! तव पुरः स्वस्तिकं रूपकाणां
वीक्ष्यादायाऽमरवरगिरा प्रत्यहं चैवमस्मात् ।
द्रव्यादेतौ सकलमतुलं मण्डपैः पञ्चभिस्तं
प्रासादं ते कतिपयदिनैः कारयामासतुर्द्राक् ॥ ७

तत्पुत्रैः स्वागमनविषयोत्पन्नसन्देहचित्रै-
श्छन्नालोकादथ च विदिते तत्स्वरूपे तदादि ।
कालं ज्ञात्वा न धनममराः पूरयामासुरेवं
प्रासादोऽर्हंस्तव स तदियानेव तस्थौ विराजन् ॥(विशेषकम्)८

एकादशस्वब्दशतेष्वशीत्याऽ-
धिके ११८०ष्वतीतेष्वथ विक्रमार्कात् ।
प्रतिष्ठितं चैत्यमिदं यदीयं प्रभुः
स जीयात्फलवर्द्धिपार्श्वः ॥ (उपजाति) ९

(शार्दूलविक्रीडित)

बाहीकान्तरवैरिवारविजयी निस्सीममाहात्म्यभृ-
न्निर्वाणावधिसर्ववाञ्छितसुखश्रीदानदीक्षाचणः ।
स्वामिन्निष्प्रतिबिम्ब एव चरितैरेकोऽसि विश्वेऽप्यतो
नाधिष्ठायकदेवता इह परं बिम्बं सहन्ते किल ॥ १०

श्रान्तः कामितदानतः सुरगणः कल्पद्रुवर्गोऽपि वा
नेशुर्यत्र पुनः प्रभावविभवा मन्त्रौषधानामपि ।
एकोऽसीप्सितदस्त्वमेव भगवंस्तस्मिंश्चतुर्थे युगे
ग्रीष्मे शुष्यति यज्जलाशयततिर्वार्द्धिः पुनर्गर्ज्जति ॥ ११

धन्योऽहं जिन ! मे फलेग्रहि जनुः श्लाघ्या निशेषैव च
स्वल्पीयोऽपि तपो जपादि च निजं मन्ये सदुच्चैःफलम् ।
मूर्त्तिं नीलमणीमयीं दधदभूर्यत्सप्रसादोदितः
साक्षात्त्वं फलवर्द्धिमण्डन ! मम श्रीपार्श्व ! नेत्रोत्सवः ॥ १२

त्वं मूर्त्तिं विमलां दधन्निशि यथा स्वप्ने प्रसन्नः प्रभुः
साक्षाद्भाग्यवशादभूर्विजयितां मे भाविनीमादिशन् ।
अध्यक्षानुभवास्पदं भव तथा सद्यः प्रसद्याधुना
निर्देहोऽपि च जागरेऽपि भगवन् ! श्रेयःपदं स्यां यथा ॥ १३

देवानां किल कुम्भपादपमणींस्त्वन्मूर्त्तिकार्यं सृजन्
श्रीमत्पार्श्वविभो ! चकार विशदोपादानहेतून् विधिः ।
दृश्यन्तेऽत्र समग्रवाञ्छितमहादानादयस्तद्गुणा-
स्ते च क्वापि न साम्प्रतं नयनयोर्यद्गोचरं बिभ्रते ॥ १४

सौख्यं नैरयिकेष्वपि स्वजनुषा कृत्वा तथाऽब्दं भुव-
स्त्वं दारिद्र्यमपास्य वाञ्छितमणि-स्वर्णादिवर्षैः पुरा ।
प्रव्रज्योदितकेवलस्त्रिजगतो हृत्वोपदेशैर्भवा-
पायान् प्राप्तशिवोऽधुनाऽपि ददसे पार्श्वेहितानि स्मृतः ॥१५

विघ्ना ! नश्यत दूरमेव लघु रे रोगव्रज ! त्वं व्रज
क्षीणाऽस्याशु दरिद्र ! तेऽद्य विलयं यातोऽसि दुःखोच्चय ! ।
हे संसार ! तवाद्य पारमगमं कर्मौघ ! ते मोघता
यज्जज्ञे त्रिजगत्प्रियाकृतिचणः पार्श्वोऽद्य नेत्रातिथिः ॥ १६

नागेन्द्रस्तनुते सुखानि धरणः पद्मावती सम्पदो
वैरोट्या हरते च विघ्ननिचयं सर्वेऽनुकूला ग्रहाः ।
स्युर्देवाः सकलाः प्रसादविशदा दुष्टाः प्रणष्टौजसो
ध्यानाद्यस्य मनोऽधितिष्ठतु स मे श्रीपार्श्व ! विश्वेशिता ॥१७

ये शक्ता न तपो विधातुमतुलं शीलं न धर्तुं तथा
नो योगे प्रभविष्णवो वितरणे नो न व्रतादिष्वपि ।
तेषामप्यभिवाञ्छतां शिवसुखं भाग्यैर्हृदि त्वं स्थित-
स्तद्दाने प्रतिभूपदं प्रदधसे श्रीपार्श्व ! विश्वप्रभो ! ॥ १८

ते धन्या भुवनेषु संस्तुतिपदं तेषां जनुर्ज्जीविते
सर्वास्ते स्ववशा व्यधुः सुखरमाः पारत्रिकीरैहिकीः ।
नूनं ते च कटाक्षिताः परमया कैवल्यशर्मश्रिया
श्रीपार्श्वेश ! तव क्रमाम्बुजयुगं यन्मानसे तिष्ठति ॥ १९

यन्माहात्म्यमहानिधेः कतिपयांस्त्रैलोक्यकुक्षिम्भरे-
रादायेव लवान् सुरा-ऽमर-मणि-स्वर्धेनु-कुम्भादयः ।

पाथोदा इव वारिधेर्जलभरान् विश्वं प्रियाकुर्वते
रातु श्रीफलवर्द्धिसंस्थितिरयं श्रेयांसि पार्श्वप्रभुः ॥ २०

तं श्रीपार्श्वविभुं भजे त्रिभुवनाभ्यर्च्यांह्रिपङ्केरुहं
शीर्षे यस्य फणाः प्रभामणिकरोन्मिश्राः प्रसर्पन्ति खे ।
कर्मैधांसि जगत्त्रयस्य दहतः सेवाऽऽगतप्राणिनां
धूम्यायास्तुलयन्ति या हुतवहज्वालोज्ज्वलायाः श्रियम् ॥ २१

धत्ते कल्पलताः स्वमूर्त्तिशिरसि प्रोद्यन्मणीपल्लवाः
सप्ताहीन्द्रफणाच्छलात्त्रिजगतीभीतीः क्षिपन् सप्तधा ।
सप्तद्वीपसमिग्रदङ्गिनिकराभीष्टार्थदानाय यः
संसाराम्बुधिसेतवेऽस्तु विभवे पाश्र्वाय तस्मै नमः ॥ २२

शब्दातीतमनन्तसद्गुणमयं व्यावृत्तिमद्विश्वतो
यत्ते तत्त्वमनक्षषट्कविषयं देव ! प्रतिष्ठाचणम् ।
यत्तद्विप्रलपन्निह स्तुतिधिया न स्यां कथं वातकी
पूर्वाप्तानुगमात्तथाऽप्ययतिषि स्वामिन् ! फलार्थादिति ॥ २३

स्तुत्वेति पार्श्व ! फलर्द्धिविभूषणस्य
पादद्वयं प्रणतसन्मुनिसुन्दरं ते ।
याचे भवारिविजयश्रियमीश ! यस्यां
स्यां नित्यविस्फुरदनन्तसुखोदयात्मा ॥ (वसन्ततिलका) २४

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

# १०. ॥ प्रह्लादनपुरमण्डनप्रह्लादनविहार-श्रीपार्श्वजिनस्तोत्रम् ॥

(उपजाति)

जयश्रिया प्राप्तसुखप्रकर्षा लसन्ति यद्भक्तिभृतः सहर्षाः ।
प्रह्लादराजप्रथितप्रतिष्ठं स्तवीमि तं पार्श्वविभुं गरिष्ठम् ॥ १

तव स्तुतिं यां विभवो विधातुं न निर्जराणां प्रभवोऽपि पार्श्व ! ।
करोति यत्तामपि मादृशोऽत्र हेतुः प्रसत्तिर्भगवंस्तवैव ॥ २

प्रह्लादभूपालविहारचूडा-
मणिस्तुतिस्ते क्व जडः क्व हाऽहम् ? ।
अर्हामि यत्नं तदपीह यत्तां
कृत्वा लभन्ते पशवोऽप्यभीष्टम् ॥ ३

जनं सुरास्त्रातुमलं न तोषिता
अपि स्तवैर्नाथ ! भवाद्भवस्थिताः ।
न तोष्यसे त्वं त्वभवोऽप्यरागधीस्-
ततो गतिः का ननु बिभ्युषां भवात् ? ॥ (वंशस्थ) ४

"स्तवैर्न तुष्टा अपि पातुमीशते
सुरा भवाद् दुःखमयाद्भवस्थिताः ।
न तुष्यसि त्वं त्वभवोऽप्यरागधीस्-
ततो मतिः का ननु बिभ्युषां भवात् ? ॥ इति वा पाठः ५
(वंशस्थ)

अरोषतोषोऽप्यथवा त्वमेव मां कृतार्थयिष्यस्यत एव नूयसे ।
अरोषतोषा अपि नार्थितप्रदाः
किमर्थिनां स्युस्त्रिदशद्रुमादयः ? ॥ (वंशस्थ) ६

स्तुवन्ति मोहाऽस्तधियोऽत्र के न कान्
जिनेन्द्र ! देवान् विविधार्त्तिशान्तये ।
अयं त्वदुक्ताञ्जनशुद्धतत्त्वदृक्
स्तवीति विश्वार्च्य ! भवन्तमेव तु ॥ (वंशस्थ) ७

यदुग्रपित्ताद्युपदूषितेक्षणास्तृषा प्रधावन्ति मरीचिकाः प्रति ।
विशुद्धनेत्रास्तु महाजलाशयान्
प्रतीति भेदो गुणदोषजो ह्यवग् ॥ (वंशस्थ) ८

अभ्यस्यते यत्सुलभं भवे भवे
भवेत्तदेतत्कथमस्तु वास्तवम् ।
स्तुतिं तवाभ्यस्य न यत् पुनर्बुधाः
सृजन्ति कस्याऽपि गतास्त्वदात्मताम् ॥ ९

तव स्तुतिर्वन्दनमर्चनादि वा
सुखाय मुक्तेरिति वेद एव नः ।
इयं हि ते मूर्त्तिरपीक्षिता सतां
प्रदर्शयत्येव तदीयवर्णिकाम् ॥ (वंशस्थ) १०

न शस्यते कैर्धरणोरगाधिराड्
निधिर्महिम्नां स विशुद्धदर्शनः ।
तवोपकारानृणतां प्रयाति य-
स्त्वद्भक्ति-विघ्नाऽपहृतीष्टदानतः ॥ ११

पद्मावती स्वं तव पार्श्व ! भक्त्या
पवित्रयन्ती शिवदायशक्त्या ।
त्वदाश्रितान् शर्म परं नयन्ती
श्लाघ्येत शक्तैरपि युक्तमेतत् ॥ १२

तवांह्रिसेवां सततं सृजन्त्या
वैरोट्यया शासनपालनेन ।
यदर्ज्यते पुण्यमनेन तस्याः
शिवेन्दिरां वेद्मि करे लुठन्तीम् ॥ १३

जगत्प्रतीक्ष ! प्रतिपक्षतां तव
श्रितः श्रयन्ते प्रतिपक्षतां श्रियाम् ।
अतीतसंसारशमां पदं वशं
पदाम्बुजं ते दधतः स्वमानसे ॥ (वंशस्थ) १४

अतीतसंसारशमां च शर्म्मणां
पदं पदौ ते दधतः स्वमानसे । ॥ इति वोत्तरार्द्धपाठः

मुधैव दैवद्रुमरत्नकुम्भाः
कलौ न सन्तीति वदन्ति मुग्धाः ।
तवैव मूर्त्तौ खलु ते निलेल्युस्-
तदा न कार्यं हि करोति सैव ? ॥ (उपेन्द्रवज्रा) १५

(वंशस्थ)

मितंपचत्वं किमिदं तव प्रभो !
ममाथवा काऽप्यतुलाऽस्त्यनर्हता ।
यदक्षरानन्तसुखश्रियां निधेः
सतोऽशमप्यातनुषे न मेऽर्थिनः ॥ १६

मितम्पचत्वं घटते न ते निधिं
तमर्थिनां यद्वितरस्यविश्रमम् ! ।
अनर्हता मे यदि तत्क्षिपस्व तां
प्रसद्य सद्योऽत्र विभुस्त्वमेव हि ॥ १७

सपञ्चविंशे जिन ! योजने शते
गदादिपीडा विनिहंसि योऽङ्गिनाम् ।
स हंसि किं हृद्यपि मे स्थितो न ताः
कुकर्मभिश्चेत्क्षिप तानि ताश्च तत् ॥ १८

त्वयैव धत्ते त्रिजगत् सनाथता-
मनाथयं त्वामहमप्यतोऽर्त्तिभाग् ।
सुदुर्गदौघो द्विविधस्तथापि चे-
त्ततो हताशस्य ममास्तु कोऽविता ॥ १९

प्रभाववार्द्धौ तव मे मनोझषं
निमग्नमप्याः ! कुविकल्पजालकैः ।
कदर्थयेत् पार्श्व ! विमोहधीवरस्-
तदस्मि दुःखी विमनास्ततोऽव माम् ॥ २०

मया प्रपन्नोऽसि समग्रवाञ्छित-
प्रदस्त्वमेव प्रभुराप्तशेखरः ।
स्वसेवकं चेदुररीकरोषि मां
त्वमप्यवाप्नोमि तुलां तवैव तत् ॥ २१

त्वदंह्रिभक्तिं भगवन् दधज्जनः
श्रीपार्श्व ! दुःखैस्त्रिविधैर्विमुच्यते ।

इतीश ! शास्त्रश्रुतमानुभौतिकं
कुरुष्व मे चेद्दधसे कृपालुताम् ॥ (उपजाति) २२

अशुभायतिकर्मकारिणो
मतिमत्त्वं ह्यविगानमेति नो ।
भवभीतिकरान् परान् स्तुवंस्-
त्वदभक्तिः सदधीश ! किं सुधीः ? ॥ (वैतालीय) २३

ज्ञानमानधनदानवृद्धयः
कान्तिकीर्त्तिधृतिबुद्धिसिद्धयः ।
सम्भवन्ति भविनामिह स्तवात्
सर्ववस्तुषु तवैव वास्तवात् ॥ (रथोद्धता) २४

ततः स्तुतिं श्रीजगदीश ! पार्श्व !
व्यधामिमां मुग्धधियाऽपि तेऽर्हन् ! ।
समीहितं देह्यनयाऽपि मे द्राग्
कृपा कृपालो ! विदितेति हि स्यात् ॥ (उपेन्द्रवज्रा) २५

एवं पार्श्वजिनस्य ये विदधते प्रह्लादनाऽऽह्वे पुरे
श्रीप्रह्लादविहारभूषणमणेः सद्भक्तियुक्ताः स्तुतिम् ।
प्राप्यैते मुनिसुन्दरस्तवमयीं ज्ञानादिऋद्धिं परां
द्वैधद्वेषिजयश्रिया शिवपुरे राज्यश्रियं प्राप्नुयुः ॥(शा.वि.) २६

पू.आ. श्री मुनिचन्द्रसूरिविरचितं प्रबन्धगतम्

## ११. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तवनम् ॥

(उपजाति)

समस्तकल्याणनिधानकोशं वामाङ्गकुक्ष्येकमृणालहंसम् ।
अलङ्कृतेक्ष्वाकुविशालवंशं वन्दे सदा शङ्खपुरावतंसम् ॥ १

आराधितः श्रीऋषभस्य काले विद्याधरेन्द्रेण नमीश्वरेण ।
पूर्वं हि वैताढ्यगिरौ जिनं तं वन्दे सदा शङ्खपुरावतंसम् ॥ २

यः पूजितः पन्नगनायकेन पातालभूमौ भवनाधिपेन ।
कालं कियन्तं जिननायकं तं वन्दे सदा शङ्खपुरावतंसम् ॥ ३

य(स)दा जरासङ्घजयोद्यतेन कृष्णेन नेमीश्वरशासितेन ।
पातालतो बिम्बमिदं तदानीमानीय संस्थापितमेव तीर्थम् ॥४

जरार्तभूतं स्वबलं विलोक्य यत्स्नात्रपीयूषजलेन सिक्तम् ।
सज्जीकृतं तत्क्षणमेव सर्वं वन्दे सदा शङ्खपुरावतंसम् ॥ ५

पञ्चाशदादौ किल पञ्चयुक्ते एकादशे वर्षशते व्यतीते ।
निवेशितः सज्जनश्रेष्ठिनायं वन्दे सदा शङ्खपुरावतंसम् ॥ ६

काले कलौ कामगवी प्रणष्टा चिन्तामणिः कल्पतरुश्च नष्टः ।
धत्ते ह्यसौ तत्प्रतिहस्तकत्वं, वन्दे सदा शङ्खपुरावतंसम् ॥ ७

प्रभूतरोगेण विनष्टदेह आराध्य यं दुर्जनशल्यदेवः ।
चकार देहं मदनस्य तुल्यं वन्दे सदा शङ्खपुरावतंसम् ॥ ८

राज्यार्थिनां राज्यसुखप्रदाता सुतार्थिनां सन्ततिदायको यः ।
नेत्रार्थिनां लोचनदोऽस्ति नित्यं वन्दे सदा शङ्खपुरावतंसम् ॥९

इति स्तुतः श्रीमुनिचन्द्रसूरिणा कृपाकरः शङ्खपुरावतारः ।
प्रबन्धकादौ प्रणतासुभाजां प्रयच्छ नित्यं निजपादसेवाम् ॥१०

पू.आ.श्री मुनिचन्द्रसूरिविरचितम्

## १२. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(शिखरिणी)

नमामि श्रीपार्श्वं कलिगिरिशिरःकुण्डनिकट-
प्रदेशावस्थानाधिगतकलिकुण्डाभिधमहम् ।
तदासन्नायातक्षितिपबहुमानातिशयतः
स्वयं प्रादुर्भूतप्रतिममखिलोपद्रवहरम् ॥ १

त्वमर्च्यस्त्वं ध्येयस्त्वमनिशमुपास्यः सुकृतिनां
त्वमानम्यः सम्यक् किमिह बहुना त्वं च शरणम् ।
त्वमेवासि त्राता जगति कलिकुण्ड ! त्वदपरो
न कश्चित् क्षुद्रोपद्रवहरणदक्षः क्षतभयः ॥ २

सकारान्तं बीजाक्षरमध उकाराग्निमयुतं
कृतोर्ध्वाधोयान्तं द्विजपतिकलाबिन्दुकलितम् ।
निविष्टान्तर्नाम प्रणवयुगकोटीपरिगतं
ज्वलद्वज्रैर्युक्तं दिशि विदिशि चाष्टाभिरभितः ॥ ३

अधोवज्रस्याग्रात् परिवृतमकारादिभिरपि
द्विरष्टाभिर्वर्णै रइतिचरमैर्दक्षिणगमात् ।
अथोङ्कारं मायाक्षरमलवयस्याथ उपरि
रकारं तत्षष्ठस्वरशशिकलाबिन्दुकलितम् ॥ ४

चतुर्थं च प्राग्वत् प्रकटतरसंयोगरचितं
ततः पूर्वं दीर्घं ननु गरसमेतं तमथ च ।
सबिन्दुं लक्ष्मीं चान्ययुगजलधामाभिधमहो
परं तत्त्वं नीचैर्जनवशकरं नाम तदपि ॥ ५

चतुर्थी प्राग्वान्तमथ हुतभुक्तृप्तिवचनं
वरैर्वर्णैरेभिर्दशसहितषड्भिः परिगतं ।
परिज्ञातं तत्त्वं जयति कलिकुण्डाख्यममलं
तदित्थं सम्पूर्णं गुरुजनगिरा दोषहरणम् ॥ ६

पवित्रे पात्रे च स्फुरदमलसौराष्ट्रिकमये
शुचिश्रीखण्डेन प्रचुरतरसौभाग्यगुणिना ।
त्रिमुष्टिप्रामाण्यैः कुशसहितदर्भैर्विलसितं
क्षणादेतत् तत्त्वं भुवि विजयते स्वास्थ्यजनकम् ॥ ७

अशक्तं शाकिन्याः शिरसि निहितं शङ्कुशकलं
कृतं लीलामात्रान्निखिलपरविद्याविदनलम् ।
विशीर्णा चेदानीं जगति ननु दाहज्वरकथा
पुरःसाक्षाद् दृष्टे जयति कलिकुण्डे भगवति ॥ ८

प्रचण्डो दण्डोऽयं सपदि कलिकुण्डस्य सहसा
भवेद् भूतादीनां प्रकटमिह दण्डो निरवधिः ।
असावेव त्राणं भवति नियतं मान्त्रिकतते-
रपि क्षुद्रार्तायाः क्वचिदपि कथञ्चिद्विधिवशात् ॥ ९

इति श्रीमान् पार्श्वः प्रभुरखिलकल्याणवसतिः
समुद्रो विद्यानामतिशयवतीनां निरुपमः ।

स्थितः सिद्धिस्थाने महितमुनिचन्द्रप्रकटित-
स्फुरन्मन्त्रात्मा मे शमयतु समग्रं भवभयम् ॥ १०

पू. आ. श्री सोमतिलकसूरिविरचितम्

## १३. ॥ श्रीकरहेटकपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

स्वामिन् ! नमन्नर-सुराऽसुरमौलिमौलि-
रत्नप्रभापटलपाटलिताऽङ्घ्रिपद्म ! ।
पार्श्वप्रभो ! भुवनभासनभास्कर ! त्वा-
मानौम्यमानबहुमानमहं महेश ! ॥ १

श्रीअश्वसेननरनाथकुलावतंस !
वामावरोदरसरोवरराजहंस ! ।
भव्याऽङ्गिमानसमहार्णवपूर्णचन्द्र !
कस्त्वां न नौति जिननायक ! वीततन्द्रः ॥ २

विश्वत्रयार्तिहरणप्रवणप्रवीण !
विश्वत्रयीमथनमन्मथभावहीन ! ।
विश्वत्रयीसकलमङ्गलदानदक्ष !
विश्वत्रयोद्धरणधीरसरोरुहाक्ष ! ॥ ३

संसारवारिनिधितारणयानपात्र !
त्रायस्व विश्वमखिलं गुणरत्नपात्र ! ।
कीर्तिप्रतापपरितर्जितपुष्पदन्त !
पार्श्वप्रभो ! भुवनभूषणपुष्पदन्त ! ॥ ४

देव ! त्वदङ्गमहसा सहसा जितेव
सूर्याङ्गजा जलभरं वहते हतेर्ष्या ।
त्रैलोक्यलोकमहितस्य हितस्य सर्व-
सत्त्वेषु ते कथय को न हि किङ्करोऽस्ति ॥ ५

ध्यानानलेन भवता भुवनाधिनाथ !
कर्मेन्धनं निधनमाप्यत पार्श्वनाथ ! ।
त्वन्मूर्ध्नि नागपतिसप्तफणामिषेण
तेनेव धूमलहरी लसति प्रकामम् ॥ ६

स्वामिन्नशोकतरुरेष जनानशोकान्
धर्मं दिशन्निव रवैरलिनां करोति ।
प्राज्यप्रभावभवनस्य भवादृशस्य
सङ्गान्न के विमतयोऽपि भवन्ति तज्ज्ञाः ? ॥ ७

मन्ये पुरस्तव विकस्वरपञ्चवर्ण-
जानुप्रमाणकुसुमप्रकरच्छलेन ।
विश्वाधिपस्य भवतो भयतः स्मरेणा-
ऽऽमुच्यन्त पञ्चविशिखास्सविषादमीश ! ॥ ८

दोषाकलङ्कजडताश्रयिणः सुधांशोः
साम्यं कथं भवतु ते वदनस्य देव ! ।
नित्यं श्रियः कुलगृहस्य हि यस्य गाव-
स्तापं जनस्य शमयन्ति सुधायमानाः ॥ ९

त्रैलोक्यलोचन ! सुधाञ्जनचारुरूपं
चन्द्रांशुचारुचमरावलिरुत्तरन्ती ।

मौलेर्गिरेरिव नदी जलपूरपूर्णा
पार्श्वद्वयेऽपि तव देव ! विभाति शुभ्रा ॥ १०

भित्त्वा विभो ! नर-सुरा-ऽसुरसंसदोऽसौ
सिंहः सुवर्णमणिनिर्मितमासनं ते ।
संश्रित्य विज्ञपयतीव यथा भवाब्धे-
र्मां नाथ तारय पशुं पशुजात्युपेतम् ॥ ११

सम्भावयामि भवतस्तनुसम्भवेन
भामण्डलनेन सितिना जिन ! भासुरेण ।
पूर्णं नभस्तलमिदं सकलं यदीति
नो तत्कथं मरकताभमिदं बभूव ॥ १२

व्योमस्थितस्त्रिदशदुन्दुभिरेष हृद्यः
पुंसां नदन्निति विभो वदतीव नित्यम् ।
भो भो ! जगत्त्रयपतिर्जगदर्थवेदी
नाऽतः परोऽस्ति भुवने तदमुं श्रयध्वम् ॥ १३

लोकत्रयैकतिलकं प्रणमन्त्यमुं ये
ते कीर्तिकेवलशिवत्रयमाश्रयन्ते ।
कुन्देन्दुसुन्दरतरं त्रिजगज्जनानां
छत्रत्रयं तव निवेदयतीव देव ! ॥ १४

कुन्दावदातयशसं भगवन् ! भवन्तं
भिन्नेन्द्रनीलमणिनिर्मलकायकान्तिम् ।
कारुण्यपुण्यहृदयं हृदि यो बिभर्त्ति
यान्ति क्षणेन विपदः क्षयमीश ! तस्य ॥ १५

इति श्रीमत्पार्श्वक्षितिवलयविख्यातकरहे-
टकस्याऽलङ्कार ! त्रिभुवनपते ! नम्रशिरसाम् ।
सभावं स्तोतृणां विदलय महामोहपटलं
घनं कर्मव्रातं हर वितर निर्वाणपदवीम् ॥ (शिखरिणी) १६

पू.आ.श्री वादिदेवसूरिविरचितम्

## १४. ॥ श्रीकलिकुण्डपार्श्वजिनस्तवनम् ॥

(अनुष्टुप्)

आर्त्तनामोदरं कृत्वा हुङ्कारं रेफसंयुतम् ।
नादबिन्दुसमायुक्तं ॐकारं सम्पुटे स्थितम् ॥ १

दिक्षु वज्राष्टसम्भिन्नं षोडशस्वरवेष्टितम् ।
वज्राग्रेषु च सर्वेषु मूलमन्त्रं यथास्थितम् ॥ २

श्वेताम्बरधरो मन्त्री शुभध्यानपरायणः ।
उत्तराभिमुखो भूत्वा लिखेद् यन्त्रं शुभोदये ॥ ३

कांश्यभाजनमध्ये तु चन्दनेन सुगन्धिना ।
लिखेद्दर्भस्य लेखिन्या मुष्टित्रयप्रमाणतः ॥ ४

सुगन्धैः कुसुमैः श्वेतैः अष्टोत्तरशतेन च ।
अर्चयेद् विधिना यन्त्रं फलं यावद् दिने दिने ॥ ५

लिखितं पूजितं चैव प्रक्षाल्य सुजलेन तु ।
तज्जलं पीतमात्रं तु परविद्याविनाशनम् ॥ ६

शाकिनीभूतवैतालपिशाचोरगराक्षसाः ।
भवन्ति निष्प्रभाः सर्वे यन्त्रस्यास्य प्रभावतः ॥ ७

शूलं विशूचिकाऽजीर्णं लूतादिस्फोटकादयः ।
अग्निचोरकृतात् (भीतिः) विषं स्थावरजङ्गमम् ॥ ८

गर्भस्य वेदना यस्या गूढगर्भा तु या भवेत् ।
एवं रोगैस्तु दुःखार्ताः सुस्थाः स्युः सर्वजन्तवः ॥ ९

वन्ध्यापि लभते पुत्रं मृतवत्सा च गर्भसूः ।
दुर्भगाः सुभगाश्चैव मन्त्रयन्त्रानुभावतः ॥ १०

पू.आ. श्री माणिक्यसुन्दरसूरिविरचितम्

## १५. ॥ श्रीस्तम्भनकपार्श्वनाथस्तोत्रम् ॥

(यमकमयम्)

(उपजाति)

आयाति नित्यं परमारमारमा दरान्नराणां निलयेलयेलये ।
यस्य प्रसादादनमन्नमन्नमं पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥ १

यत्कीर्तिभासासधराधराधरा विराजते राजसमासमासमा ।
तं मोहशत्रोर्जवदावदावदा पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥ २

यद् भूरिभक्तेरचलाचलाचला मतिः सतां सारसमतेमतेमते ।
तं विश्वनाथं शमधामधामधा पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥३

क्रमौ यदीयौ सकलौकलौकलौ स्तुवन्नलं पापहरौहरौहरौ ।
रज्येन्त कोऽप्युल्लसतांसतांसतां
पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥ ४

धरन्मतिं यस्य नवेनवेनवे लभेत सौख्यानि भवेभवेभवे ।
समृदयथा सत्यवनेवनेवने पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥५

प्रभावताऽसौ कमलामलामला
भवाश्रितैषा सकलाकलाकला ।
इयं मतिर्यस्य सदासदासदा पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥६

वहन्ति धर्ममधुरं धुरन्धरम्
धरा यथा येत्र नराः नराः (नराः) ।
यस्या श्रितास्ते विपदं पदम्पदम्
पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥ ७

बाह्यान्तरङ्गारिमया मयामया
रयाज्झिता यत् प्रभयाभयाभया ।
हृदि प्रमोदान्निहितं हितं हितम्
पार्श्वं स्तुयुः स्तम्भनकेनकेनके ॥ ८

प्रेङ्खत्तर्कवितर्ककर्कशलसत् साहित्यलीलावती
छन्दोऽलङ्कृति नाटक प्रभृतिषु ग्रन्थेषु ये पण्डिता ।
तैर्वन्द्यक्रम मेरुतुङ्गसुगुरोः शिष्येण सन्निर्मितम्
स्तोत्रं पार्श्वजिनेश्वरस्य यमकैर्युक्तं क्रियान्मङ्गलम् ॥(शा.वि.)९

पू. आ. श्री जिनहर्षसूरिविरचितम्

## १६. ॥ श्रीजीरापल्लीपार्श्वजिनस्तवनम् ॥

(भुजङ्गप्रयात)

जिनं नौमि जीरापुरीसुन्दरीये, ललाटे ललामोपमानं दधानम् ।
वरामेयभावेन वामेयदेवं, परं किञ्चिदेवं चिदानन्दरूपम् ॥ १

चिरं चेतसा चिन्तितातीतदायी,
जिनो यो बुधानां च मेधाविधायी ।
पयोदोपमानं तमानन्दकन्देऽभिवन्देत मन्देतरः को न देवम् ॥२

दधानं सदम्भोजशोभो विभो ! ते,
मुखं नाशिताऽशेषदोषानुषङ्गम् ।
नवीनेन्दुबिम्बायमानं जनानां,
न जायेत सन्तोषपोषाय केषाम् ॥ ३

(वैतालीय)

सकलं कमलोपशोभितं जिन !, वामेय ! मुखं तवाञ्चितम् ।
सकलं कमलेन निन्दितः, कथमेषोऽनुकरोतु शीतगुः ॥ ४

विदधाति सुधाऽतिशायिनी, तव वाणी बहुधा सुमेधसाम् ।
अजरामरतां सतां सती, विनिपीता तरसा रसाधिका ॥ ५

भृतकाममनन्ततेजसं हतकामेन तथान्धकारिणा ।
अभवं च भवेन शम्भुना कथमेवोपमीमहे विभुम् ॥ ६

शुभभावनयाऽनया सततं सातिशयं निषेवते ।
जनता जिन ! तावकं पदं लभते सा तु कुतः परं पदम् ॥ ७

(तोटक)

भवतो न नतो यदताररुचेरिह नामवशेन समेति शमम् ।
पथि संसुखमापतितोऽपि विभो ! वनदावभरो जलदेव यथा ॥८

तव नाम चिरं परिचिन्तयतो न भुजानुमतं गजतोऽभिभवः ।
न च किञ्चिदथापि च पञ्चमुखादपि सम्भवतीह भयं भविनः॥९

अहिनाऽपि हि नामजपादपि ते कुपितेन समापतताऽपि सता ।
भविनामथ नाथ ! भयं न भवेदिह माहमहाविषदोषहर ! ॥१०

अपरे च परेतपिशाचमहोरगभूतगणा अपि भीतिकराः ।
न भवन्ति भवन्तमनन्तशिवं
सुचिरं शुचि चेतसि चिन्तयताम् ॥ ११

(भुजङ्गप्रयात)

तवैवाभिधानैकजापादपापा अपाये पयःपूररूपेऽपि केऽपि ।
न सीदन्ति नूनं महापोतलाभादिनाऽमी परं पारमासादयन्ति॥१२

यदीयानुभावेन भूयो जनानां भृशं जायते भूरिरोगादिशान्तिः ।
महावारिवाहागमेनेव नानावनानामिहानेकदावोपशान्तिः ॥१३

(तोटक)

दलिताखिलमोहमहातमसं तमसङ्गमभङ्गुरशान्तरसम् ।
विनुवामि ममामितकामितदं जिननाथमथो मदितोरुमदम् ॥१४

(पादाकुलक)

जय जय जिनपुङ्गव ! देवदेव ! सुरदानवमानवविहितसेव ! ।
शिवदाशयसंशयतिमिरपूरपूरितजनमानसगगनसूर ! ॥ १५

कुमुदाकरशीतलकलविशाल ! शमपूरितदूरितदूरितजाल ! ।
करुणावरुणालयलयनिधान !
जय जय शिवसाधनसावधान ! ॥ १६

विपुलामलगुणगणमणिसुखानि
समहे समतामय ! कुरु सुखानि ।
सुवशीकृतशान्तरसातिरेक !
जगदीश ! विकासितवरविवेक ! ॥ १७

कलिना मलिनीकृतजीवलोक-
मखिलं विमलीकुरु वीतशोक ! ।
सुन्दरवामोदर सरसिहंस !
जय भव-भय-भञ्जन जिनावतंस ! ॥ १८

(स्त्रग्विणी)

कमठऋषिरोषबहुदोषविषभेषजं
विषमतरमानतरुभञ्जनेऽवरगजम् ।
कुटिलमायामहागहनदहने दवं
भूरि गुरुलोभगिरिभेदभिदुरं नवम् ॥ १९

बहुलभावेन भुजगेश ! संसेवितं
तं जिनाधीशमनिशं सुरैरञ्चितम् ।
एवमानौमि महनीयमहिमाऽऽलयं
केवलालोकपरितुलितजगदाशयम् ॥ २०

इत्येवं तव देव ! संस्तवमसंयुक्ताक्षरं सुन्दरं
कृत्वा मोक्षमनन्तकर्मभिरसंयुक्तं सदैवाक्षरम् ।
याचे पार्श्वजिनेश ! चेतसि धृतानान्तार्थचिन्तामणे !
पूज्यश्रीजिनहर्षसूरिविदितः त्रैलोक्यचूडामणे ! ॥(शा.वि.)२१

पू. आ. श्री जिनसुन्दरसूरिविरचितम्

## १७. ॥ श्रीजीरापल्लिपार्श्वनाथस्तवनम् ॥

(शार्दुलविक्रीडितम्)

विश्वव्यापियशःप्रभावविभवं सद्भूतभक्त्याऽऽनत-
व्रातानल्पविकल्पजल्पकमलासङ्कल्पकल्पद्रुमम् ।
स्फूर्जत्कज्जलमञ्जुलच्छवितनुं श्रीपार्श्वदेवं स्तुवे
जीरापल्लिपयोधिनेमिमहिलाभालस्थलालङ्कृतिम् ॥ १

पद्मोल्लासकरस्तमोभरहरः प्रध्वस्तपङ्कोत्करः
स्फूर्जद्भाःप्रसरः पदार्थविसरप्रोद्भासने तत्परः ।

नित्यं क्लृप्तसुवासरः क्षितदरः प्रौढप्रभावाकरः
पुण्यैर्विश्वपते ! स्फुरद्दिनकरः प्राप्तोऽसि दृग्गोचरः ॥ २

दारिद्र्यं गतमद्य देव ! दुरितं दूरं व्युदस्तं दितं
दैन्यं घोरविपद्घटा विघटिता विघ्नव्रजा जघ्निरे ।
भाग्यैर्जागरितं शुभैर्विकसितं श्रेयोभिरुज्जृम्भितं
पादाम्भोजनिभालनं तव विभो ! जज्ञेऽधुना येन मे ॥ ३

ध्वस्तोपाधिविशुद्धसंयमतपःकारुण्यसाम्यश्रियः
सद्यः सात्म्यमुपागतास्तव यथा स्वामिन् ! स्वभावादपि ।
एतासामनुभावतो बत ! यथा जाता जगद्व्यापिनी
चेतः कस्य चमत्करोति विभुतास्फूर्तिर्महिम्नश्च न ? ॥ ४

कल्पक्षोणिरुहो न यत्र मणयो नो कामकुम्भाः फलं
यच्छन्ति प्रहतानुभावनिवहा देवा न सेवाकृताम् ।
देवाऽभङ्गुरजागरूकमहिमाकाले कराले कलौ
जीरापल्लिजिनेश ! तत्र नमतां दत्से मनोवाञ्छितम् ॥ ५

न ध्यातैर्जिन ! मन्त्रतन्त्रनिकरैर्नो देवताराधनै-
र्नो विद्याभिरुपासिताभिरनिशं नो विक्रमोपक्रमैः ।
तीव्रैर्नापि तपोभिरीश ! यदनुष्ठानैर्न चावाप्यते
सन्तस्तत्तव नाममात्रजपतोऽभीष्टं लभन्ते फलम् ॥ ६

देव ! त्वत्पदवन्दनैकमनसामेकाकिनामङ्गिनां
मार्गे संसरतां हरन्ति विषमे क्रूरा न चौरा धनम् ।
दुष्टाकूतभृतोऽप्यटन्ति निकटे व्याघ्रा न शीघ्रागमा
यत्तत्पार्श्व ! तव प्रतापमहिमा प्रोज्जागरो जृम्भते ॥ ७

कास–श्वास–शिरोऽर्त्ति–कुष्ठ–पिटक–श्लेष्मोरुकण्डू–ज्वरो–
दावर्त्त–क्षय–शोफ–मण्डलमुखै रोगैरलं पीडिताः ।
देव ! त्वच्चरणाम्बुजन्मशरणं प्राप्ताः प्रतिज्ञान्विता
ध्वस्ताऽशेषरुजाव्रजा हि मनुजाः सज्जा भवन्त्यञ्जसा ॥ ८

निःसत्त्व–व्यसनौघ–विघ्न–विषमव्याधि–व्यथाविह्वला
विश्वाधीश ! तव प्रसादवशतो निर्मन्तवो जन्तवः ।
वेगादेव गताखिलानभिमता वीतापदः सम्पदः
सद्यः स्युः प्रतिपद्य हृद्यमुदयं चानन्दमेदस्विनः ॥ ९

लक्ष्मीराज्यभिलाषिणोऽधिकरमां भोगान् सुभोगार्थिनः
पुत्रान् पुत्रकृतस्पृहा बहुगजं राज्यं च राज्यच्युताः ।
नेतश्चक्षुरचक्षुषो निरुपमं रूपं कुरूपा नरा–
स्त्वत्तः स्तुत्यकलाः कलापविकला दिव्यं बलं दुर्बलाः ॥१०

नव्यां काव्यकलां सदाऽप्यकवयोऽजल्पाश्च जल्पाकतां
प्रागल्भ्यं भृशमप्रगल्भमनसो विद्यामविद्यान्विताः ।
तत्त्वज्ञानमतात्त्विका यदखिलाभीष्टं लभन्ते ततो
देवः कामिततीर्थमित्थमखिले ख्यातं गतो भूतले ॥ ११

नाथ ! त्वत्पदपद्मयोर्नतिमतां बाधाविधानाय नो
भूत–प्रेत–पिशाच–किन्नरगणा रक्षो न यक्षोरगाः ।
व्याला हालहलानला न मरको वेतालमालाः खला
भव्यानां प्रभवन्ति कार्मणमुखक्षुद्रामयोपद्रवाः ॥ १२

ध्यायन्तस्तव नाममन्त्रमनघं क्षेमादविघ्ना जना
लब्धार्था विषमे जलस्थलपथे गेहे समाजंकृच्छति ।

नासत्यं शपथं प्रतापचकिताः कुर्वन्ति दिव्यं नरा
दृष्टा धृष्टहृदोऽपि चौरचरटा भञ्जन्ति नाज्ञां तव ॥ १३

विघ्नध्वंसकृतैः खलास्त्वयि पलायन्ते प्रतापानल-
ज्वालाभिर्ज्वलिता दिशो दिशमिलापालाः शृगाला इव ।
दुष्टा धृष्टहृदो हठादपि लुठन्त्यंह्रौ तथा त्वाऽञ्जसा
वादे वैरिगणे महारणभरे नेतर्लभन्ते जयम् ॥ १४

प्राकाम्यं महिमाऽणिमा च लघिमा कामावसायित्वयुक् ।
प्राप्तीशत्ववशत्वमेवमतुला अष्टौ महासिद्धयः ।
त्वत्पादाब्जजुषां भवन्ति भविनां किं वा न सम्पद्यते
प्राप्ते कल्पतरौ जिनेप्सिततति प्रत्यर्पणप्रत्यले ? ॥ १५

मोहं द्रोहपरं निवारयतमां मारिं महारिं हर
क्रोधं रोधपरं न योधय विभो ! क्षोभं च लोभं नय ।
दम्भं देव ! निशुम्भ लम्भय भयं ध्वंसं शुचं संहर
स्तम्भं स्तम्भय मे मथान कुनयं मिथ्यात्वदोषद्विषम् ॥ १६

पूर्वोपात्तमघं विघट्टय विभो ! भ्रान्तिं प्रभो ! भ्रंशय
विश्वव्यंसकतामकान्तविपदं मादं प्रमादं क्षिप ।
अज्ञानं विनिवर्तयेरविरतं त्वं त्याजयासम्मतं
प्रत्यादेशय पेशलेतरपथप्रस्थानमन्तद्र्धय ॥ १७

स्वामुज्जृम्भय भूरिभक्तिमनिभां बोधिं विशोधिं नय
स्वान्ते सीमशमं निवेशय विभो ! पुण्यां निजाज्ञां च मे ।
दैन्यं मर्दय संविदं विशदयाऽऽनन्दं प्रयच्छोन्मदं
सम्यग्दर्शनदर्पणं विदलितार्कद्योतमुद्द्योतय ॥ १८

धर्मं निश्चलतामवापय भवच्छेदं दिश छेकता-
मर्थित्वं सुकृतेषु मेऽतनु सृज श्रेयस्ततिं विस्तृताम् ।
संवेगे दृढरङ्गमङ्ग्य मनो नीरागतासङ्गतिं
तन्या नाथ ! तथा रतिं जिनमते कुर्याः सुमार्गे धृतिम् ॥ १९

लक्ष्म्याकर्षणशृङ्खला शिवपदप्रासादनिःश्रेणिका
श्रेयःसन्ततिहेतुरर्त्तिदलनादोषोदयार्कद्युतिः ।
आपत्तापभरे समीरलहरी श्रीपार्श्व ! विश्वेश ! ते
संसारार्णवलङ्घने घनतरी भक्तिः स्थिरा मे हृदि ॥ २०

मिथ्यात्वद्विषताकदर्थितमिमं दुष्कर्मभिर्दुःखितं
ग्रस्तं रागमहोरगेण विषयस्तेनोत्कटैर्लुण्टितम् ।
अज्ञानेन वृतं तमःकवचितं भावारिभिर्भापितं
हीनं दीनमुपागतं स्वशरणं मां रक्ष रक्ष प्रभो ! ॥ २१

द्रष्टव्यस्त्वमसि प्रभो ! त्रिभुवने वन्द्योऽभिवन्द्यस्तुतः
सेव्यः स्तुत्यगुणः शरण्यचरणो ध्येयो निधेयो हृदि ।
श्रेयःस्थेयमतिः प्रशस्यमहिमानेयो न नेयोऽर्थिना-
मभ्यर्थ्यः प्रभुरद्भुतोदयपदं श्रीदेव ! नन्द्याश्चिरम् ॥ २२

इत्यानन्दवशंवदात्ममनसा प्रज्ञां विनाऽपि स्तुतः
श्रीपार्श्व ! श्रितभव्यवत्सलमतिः सद्यः प्रभो..... ।
भक्तिं निर्मलसोमसुन्दरगुणश्रेणीसखीशालिनीं
स्वां भृत्यस्य भवे भवेऽभ्युदयिनीं देवेच्छतो यच्छ मे ॥ २३

पू.आ.श्री जिनप्रभसूरिविरचितम्
विषमपदान्त-समपदाद्य-त्र्यक्षर-पुनरावृत्तिरूप
सिंहावलोककाव्ययुक्तम्

# १८. ॥ श्रीजीरापल्लिपार्श्वनाथस्तवनम् ॥

(रथोद्धता-स्वागता)

जीरिकापुर पतिं सदैव तं दैवतं परमहं स्तुवे जिनम् ।
यस्य नाम जगतो वशङ्करं शङ्करं जपति मन्त्रवज्जनः ॥ १

नाथ तत्तव मुखेन्दुदर्शनं दर्शनं च नयनामृतं स्तुवे ।
येन मे दुरिततापहारिणा हारिणा लसति पुण्यवारिधिः ॥ २

विश्वविस्तृत महाप्रभाव ते भावतेज इह माति नो युगे ।
उद्गते दिनकरे हि भासुरे भासुरेश्वरपुरस्य किं भवेत् ॥ ३

ग्राममात्रकमपि जीरपल्लिका पल्लिका नन सहोदरीव या ।
त्वत्पदस्थितिबलेन साधुना साधुनायकपुरीव भासते ॥ ४

अर्बुदस्य भवता व्यभावि या भावियात्रिक जनेष्वभीतिदा ।
पश्यतोहरभृताऽपि सा रसा सारसाधुनिचिताऽभवत्तराम् ॥ ५

त्वां नमत्यशिव वार्द्धितारकं तारकङ्कणसुमैः प्रपूज्य यः ।
प्राप्य चिन्मयमने नसं पदं सम्पदं स समुपैति शाश्वतीम् ॥ ६

त्वत्पुरः प्रकुरुते प्रभावनां भावनां जिन निधाय यो हृदि ।
निश्चितं स लभते न दुर्गतिं दुर्गतीर्णभवसागर प्रभो ॥ ७

यो दधाति हृदि तेन्द्रिपङ्कजं पङ्कजम्मलमधः करोति सः ।
तप्तयेऽपि न भवन्ति पार्श्वतः पार्श्व तस्य तु भवोद्भवभ्रमाः ॥८

त्वत्स्मृतेरपि जना निरामया रोमया चरमयाऽभिरामया ।
योगिभूषण भवन्ति भूषिता भूषिताः किलसुधाशना इव ॥ ९

त्वत्पदप्रणतिलालसा दरं सा दरं दधति जातु ना ध्वनिम् ।
यत्र यान्ति ननु भानुभानवो भानवोदयनमऽस्तु तत्र किम् ॥१०

अन्तरङ्गरिपवोऽकृपापरा पापराशिहर पीडयन्ति माम् ।
सत्यपि त्वयि विभो कृपालये पालयेश शरणागतं ततः ॥११

त्वन्मयं जगति तस्य मानसं मान संयमनतस्य दुर्द्धराः ।
तस्करानलपयः करेणवो रेणवो जिन भवन्ति तत्क्षणात् ॥१२

देव शाखिमणिधेनुदेवता देव तावदिह वाञ्छित प्रदाः ।
यावदेव तव धाम नामजं नाम जन्तुमनसि प्रदीव्यति ॥ १३

ज्ञानिनं जगदिनं निरञ्जनं रञ्जनं त्रिजगतः पुरातनम् ।
त्वां स्मरामि सकलं च निष्कलं
निष्कलङ्कमचलं महाबलम् ॥ १४

इत्थं यः प्रयतः स्तवीति सततं श्रीजीरपल्लीपुरी
वासं पार्श्वजिनप्रभुं प्रकटितप्रौढप्रतापोदयम् ।
सोऽवश्यं सुभगम्भिष्णुरधिकं धर्मार्थकामामृत-
श्रीभिः स्त्रीभिरिव स्वयं गुणगणा श्लिष्टाभिराश्लिष्यते ॥१५
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितम्

प्रत्येकपद्ये समसमपाद-पुनरावृत्तिरूप-यमकालङ्कारयुक्तम्

## १९. ॥ श्रीपार्श्वनाथप्रातिहार्यस्तवनम् ॥

(रथोद्धता-स्वागता)

त्वां विनुत्य महिमश्रिया महं पन्नगाङ्ग ! मठदर्पकोषिणम् ।
स्वां पुनामि किमपीन ! रक्षितापन्न ! गां कमठदर्पकोषिणम् ॥१

को नु रज्यति न देशनौकसि द्रागशोकतरुणा विभासिते ।
हेमरत्नरुचिभिः क्षितोल्लल-द्रागशोक ! तरुणाऽऽविभासि ते॥२

देहदीधितितिरस्कृतोदयत्सौरभाः सुमनसः सदानवाः ।
देशनाभुवि किरन्ति ते स्फुरत् सौरभाः सुमनसः सदा नवाः ॥३

तादृश श्रवणतस्तवोत्तमाकारकाय ! वरदेशनाध्वनेः ।
प्रस्थितः क इव पाप्मनां निराकार काय ! वर देश ! ना ध्वनेः॥४

नाकिनायकयुगेन सादरं चामरै र्विशदभाग ! वीज्यसे ।
त्वं न कैर्भवसुखाय मुक्तये चामरैर्विशदभागवीज्यसे ? ॥ ५

वीक्षितुर्नयनयोर्निराकृता-शंस ! भासुरमणीप-(य)भावतः ।
आतनोति कृतसिंहविष्टरं शं सभासुरमणीप(य)भावतः ॥ ६

द्रष्टुरर्पयति कीर्त्तिशुभ्रिता-शाऽन्त ! भावलयमऽर्यमोहदम् ।
दीप्यमानमऽनुमौलि तावकं शान्तभावलयमऽर्यमोहदम् ॥ ७

व्योम्नि गर्जिनिनदः पुरस्तवा-ऽमानवैरि(र)मुदिरो महर्षिभिः।
कैर्न दुन्दुभिरवः श्रुतस्तनौ मानवैरि(र)मुदि रोमहर्षिभिः ॥८

शेमुषीषु कुपथानि मौक्तिक-न्यासहृद्यऽरुचितानि चायितुः ।
त्रीणि ते जिन ! शितोष्णवारणा-
न्याऽऽसहृद्यऽरुचितानि चाऽयितुः ॥ ९

प्रातिहार्यमहिमालयस्तवः श्रीजिनप्रभविति स्तुतो मया ।
पार्श्व ! कामितफलाय कल्पतां कल्पपादप इवेष नेमुषाम् ॥१०

पू.आ.श्री जिनप्रभसूरिविरचितम्

पादान्तसमचतुरक्षरपुनरावृत्तिरूप-यमकालङ्कारयुक्तम्

## २०. ॥ श्रीपार्श्वनाथस्तवनम् ॥

श्रीपार्श्व पादानत नागराज प्रोत्सर्पदेनः कफनागराज ।
सतां हृताऽसत्परिणामरागं त्वां संस्तुमः स्थैर्यगुणाऽमराऽगम्॥१
(उपजाति)

ये मर्त्यदेवासुरमाननीयं पश्यन्ति ते श्रीभरमाननीयम् ।
सद्यस्त्रिलोकीतिलकाऽमितानि
सिध्यन्ति तेषामहि कामितानि ॥ (इन्द्रवज्रा) २

दृशोर्द्वयं पद्मदलानुकारं नाशिश्रयत्ते कमला नु काऽरम् ।
कुतोऽन्यथा त्वन्नति दीक्षितेषु सर्वश्रियां प्रेम तदीक्षितेषु ॥ ३
(उपजाति)

अभ्यर्हितं भव्यकदम्बकानां हर्षप्रकर्षाल्लसदम्बकानाम् ।
सेवन्ति ये त्वां विधिवल्लभन्ते निर्वाणसौख्यं बुधवल्लभं ते ॥४
(इन्द्रवज्रा)

रतेरहङ्कृत्यपनायिकाभिर्वपुःश्रिया ते सुरनायिकाभिः ।
नाक्षोभि चेतः परभावलीनम-चिन्त्यविस्तारि शुभावलीनम् ॥५
(उपजाति)

प्रभो ! तवाऽस्तस्मर राजमाने नखांशुजालेन विराजमाने ।
क्रमाम्बुजे लक्ष्मिगृहे रसेन शक्रार्चनीय स्तुमहे रसेन ॥(उ.जा.)६

आकाङ्क्षिता बहुविधं जनताभिराऽऽमा

ऽस्पष्टा महोदयपुरी ध्रुवताभिरामा ।
अप्यध्वरश्रुतितपः सवनादृते न
पुंसाऽऽप्यते जिन ! तव स्तवनादृतेन ॥ (वसन्ततिलका) ७

इत्थं फणीन्द्र सततश्रितपार्श्वनाऽथ
स्त्री वा स्तवं पठति यस्तव पार्श्वनाथ ।
तस्मै स्पृहामवृजिनप्रभवाय नव्या
लक्ष्मीर्बिभर्त्ति सुमनः समवायनव्या ॥ (वसन्ततिलका) ८

पू.आ.श्री जिनप्रभसूरिविरचितम्

प्रतिपदपञ्चाक्षरपुनरावृत्तिरूपसिंहावलोकनयुक्तम्

## २१. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(उपजाति)

पार्श्वं प्रभुं शश्वदकोपमानं दकोपमानं भववह्निशान्तौ ।
आराधतां दत्तनिरन्तरायं निरन्तरायं पदमाप्तुमीडे ॥ १

वीक्षे जगन्नेत्र महाभ यत्र महाभयत्रस्य तवांह्रियुग्मम् ।
पुण्यः स एवाऽवसरोऽमराली सरो मरालीव निषेवते यत् ॥२

प्रणेमुषां पूर्णसमस्तकामं समस्तकामं सकृदप्यधीश ! ।
भवन्तमानम्य विमानमाया विमानमायाः प्रभवो भवन्ति ॥ ३

नयाढ्यमुद्यद्गमभङ्गमाल मभङ्गमालक्षितसर्वभावम् ।
कैर्नाम धीमद्भिरमानि शान्तं रमानिशान्तं न वचस्त्वदीयम् ॥४

नित्यं प्रमादेनविना शितामं विनाशितामङ्गलमङ्गभाजाम् ।
त्वन्नाम धन्यः स्मरतीश सारं रतीशसारङ्गमृगेन्द्रनादम् ॥ ५

भृत्योपि योत्राऽवृजिनप्रभावे जिनप्रभावैकरसस्त्वयि स्यात् ।
सरूपवान्नीरगजाश्वसेने गजाश्वसेनेश्वरतामुपैति ॥ ६

भूयान्नमो नीलतमाऽलकाय तमालकायप्रभ तुभ्यमेव ।
भवात्त्वदन्यः कतमोऽविता न तमोवितानच्छिदुरोऽर्क एव ॥७

त्वदुक्तकृत्येष्वविरामवामे विराम वामेय मयि प्रसीद ।
भव्यान् स्तवः पातु जिन प्रभोऽयं
जिनप्रभो यं विदधे यतीन्द्रः ॥ ८

पू.आ.श्रीजिनप्रभसूरिविरचितम्

## २२. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(अनुष्टुप्)

श्रीपार्श्वःश्रेयसे भूयादलितालसमानरुक् ।
अनन्तासंसृतिर्येन दलितालसमानरुक् ॥ १

अज्ञानमेदुरध्वान्तकारिणस्त्वद्गुणानलम् ।
अज्ञानमेदुरध्वान्तभानोऽभिष्टातुमीशगीः ॥ २

तथापि नुन्नोऽन्तर्भक्तिरंहसामहितायते ।
गुणलेशं स्तवीम्युच्चैरंहसामहितायते ॥ ३

अपारे कामरोगेण भ्रान्तोस्मि भववारिधौ ।
अपारे कामरागेण दर्शनेन विना तव ॥ ४

आप्येदानीं दर्शनन्ते नरामरसभाजनम् ।
स्पृहयामि प्रभो ! राज्यं नरामरसभाजनम् ॥ ५

नेच्छा च मेऽप्सरोलोकं सकाममनसम्प्रति ।
रुचये मुक्तिकान्तापि सकाममनसम्प्रति ॥ ६

पुण्योदयादक्षमया मुक्तत्वद्दर्शने सति ।
पुण्योदयादक्षमया स्वात्मायं परिनिश्चितः ॥ ७

जिनास्यऽसारसंसार किन्नेदानींवराकरे ।
जिनास्यसारसंसारमद्ययद्दीक्षितम्मया ॥ ८

धन्यास्ते प्रणतास्तुभ्यं वासवामेयशक्तये ।
त्रातुं जगत्सर्वगुणावासवामेयशक्तये ॥ ९

कल्याणगिरिधीरेमे त्वयि चेत्परमेश्वर ! ।
कल्याणगिरिधीरेमे करस्थाः सर्वसम्पदः ॥ १०

तवाङ्गे लीनदृष्टित्वाद्दूरीकृततमालभे ।
जीवन्मुक्तिदृशांकर्हि दूरीकृततमालभे ॥ ११

कमलायतनेत्राभिरक्षुब्धमनसस्तव ।
कमलायतनेत्राऽभिरमेताम्मद्दृशौ मुखे ॥ १२

दृष्टे तव मुखे प्रीत्या रजनीश्वरकोमले ।
न निर्वाणपदेस्थास्नुरजनीश्वरकोऽमले ॥ १३

अक्षोभं गम्भीरहितं तवाराध्यवचःप्रभो ! ।
अक्षोऽभङ्गम्भीरहितं निष्कर्मा लभते पदम् ॥ १४

पीत्वा वाचोमृतन्तेऽस्तकलिकामधुगर्हितम् ।
मेने जनैः स्वर्गतरोः कलिकामधु गर्हितम् ॥ १५

क्रमतामरसद्वन्द्वसेवने तव सादरम् ।
क्रमतामरसद्वन्द्वमामकीनं मनःसदा ॥ १६

श्रियस्तवागमोदद्याद्विततानयशोभितः ।
यस्तवैव विदोषत्वाद्विततानयशोऽभितः ॥ १७

अलन्तेपदराजीवाभ्यर्चनैकरताःप्रभो ! ।
अलन्तेपदराजीवामुक्तिदुर्गस्वयङ्ग्रहे ॥ १८

वशीचक्रे भवान्मुक्तिमहिलाञ्छितविग्रहः ।
स्वैर्गुणैस्त्रातराकालमहिलाञ्छितविग्रहः ॥ १९

सदानमस्तपापाय गत्या जितवते गजम् ।
सदान्नमस्तपापायमेघश्यामाङ्गकायते ॥ २०

यस्त्वामेकाग्रधीः स्तौति देवपद्मावतीनतम् ।
इष्टार्थलाभैरचिरादेवपद्माऽवतीनतम् ॥ २१

सदानन्दन्तिनामोघमाप्यचाश्नीयमत्रके ।
सदानन्दन्तिनामोघत्वद्भक्तिकृतनिश्चयाः ॥ २२

ये नम्रास्त्वयिवन्द्याःस्युर्मदनागविराजते ।
तेषां च रूपर्द्धिरतिमदनागविराजते ॥ २३

अहीने नसदारेण सेव्यमानकृपानिधे ! ।
अहीनेनसदारेणदूनम्पाह्यान्तरेण माम् ॥ २४

हत्वान्तरारींस्त्वदाज्ञाविद्यास्मरणभूषिताः ।
जयलक्ष्मीवयं नाथ विद्याःस्मरणभूषिताः ॥ २५

नमोहराजेनब्रह्मशक्रादीन पिजिष्णुना ।
नमोहराजेनब्रह्मयोनये विजितायते ॥ २६

यः स्यात् त्वत्पादपद्मार्चारुचिरञ्जितमानसः ।
सर्वत्र लभते सौख्यं रुचिरञ्जितमानसः ॥ २७

सर्वङ्कषायमोहेलापतयेदुद्यतस्तव ।
सर्वङ्कषायमोहेलाग्रासराहूपमं वचः ॥ २८

सरस्वती पातु तवोपदेशामृतपूरिता ।
यत्प्रभावाज्जनैर्मुक्तिपदेशाऽमृतपूरिता ॥ २९

कामदेहतमोहेऽलिनीलवर्णेनतस्त्वयि ।
कामदेहतमोहेलितुल्येनाऽश्नुवते श्रियम् ॥ ३०

स्वर्गायतियशोविश्वप्रकाशन्तेऽमरीचयः ।
यस्याग्रेनैवशीतांशोःप्रकाशं तेमरीचयः ॥ ३१

दर्पकोपरतायासच्छिदे मुनिगणायते ।
दर्पकोऽपरतायासस्पृहयालुर्नकःखलु ॥ ३२

कल्याणानाम्पञ्चतयं मुद्यत्कुवलयद्युते ।
कस्य न प्रीतये जातमुद्यत्कुवलयद्युते ॥ ३३

कमलाक्षतपस्त्यागश्रीभुजङ्गजिनेश्वर ।
कमलाक्षतपस्त्यागस्तिमिरार्क पुनीहि माम् ॥ ३४

त्वदाननं जगन्नेत्रमुदाराममघनोदकम् ।
निर्मिमीताम्मम प्रीतिमुदाराममघनोदकम् ॥ ३५

यैस्त्वङ्कृते मनःकृत्वा प्रमदाभोगभागिनः ।
भवेयुर्दिवितेदिव्यप्रमदाभोगभागिनः ॥ ३६

नाऽथवाऽरितमोहंसमुक्तिशर्मापि दुर्लभम् ।
नाथवारितमोहंसतेषामाकलुषात्मनाम् ॥ (यु.) ३७

आनन्दतोयदच्छायजन्तुजातन्ननामते ।
आनन्दतोयदच्छायमुक्तिश्रीस्तत्ररागिताम् ॥ ३८

येन त्वदागमः स्वामिन् स्याद्वादेनोपराजितः ।
निर्णीतः स तु तीर्थानां स्याद्वादेनोपराजितः ॥ ३९

स्मरामित्रस्यते भव्यसमूहायाऽभयप्रदम् ।
स्मराऽमित्रस्यतेभव्यश्रियान्धामपदद्वयम् ॥ ४०

भव्यहृत्पक्षिणां वासक्षणदानाय काननम् ।
त्वाम्पर्युपासते धन्याःक्षणदानायकाननम् ॥ ४१

जननव्यसनाधीरश्रीवामेयभवे भवे ।
जननव्यसनाधीरभूयाःस्वामी त्वमेवमे ॥ ४२

त्वद्गुणस्तुतिरम्भोदकान्तेयमकहारिणी ।
भव्यानवतु विज्ञानाङ्कान्तेयमकहारिणी ॥ ४३

इति प्रभो ! ते स्तवनं पठन्ति ये
मुक्तिश्रियः प्रेत्य लुठन्ति ते हृदि ।
जिनप्रभाऽऽचार्यमभाऽतिशायिनी
जागर्ति तेषामिह पण्डितव्रजे ॥ ४४

पू.आ. श्री जिनप्रभसूरिविरचितः

## २३. ॥ श्रीपार्श्वनाथस्तवः ॥

(स्रग्धरा)

का मे वामेय शक्तिर्भवतु तव गुणस्तोमलेशप्रशस्तौ
न स्याद्यस्यामधीशः सुरपतिसचिवस्यापि वाणीविलासः ।

माने वा वार्धिवारां कलयति क इव प्रौढिमारूढधारां
भक्तिव्यक्तिप्रयुक्तस्तदपि किमपि ते संस्तवं प्रस्तवीमि ॥ १

संसाराम्भोधिवेला निबिडजडमतिध्वान्तविध्वंसहंसः
श्यामाश्यामाङ्गधामा (?) शठकमठतपोधर्मनिर्माथपाथः ।
स्फारस्फूर्जत्फणीन्द्रः प्रगुणफणमणिज्योतिरुद्द्योतिताशा-
चक्रश्चक्रिध्वज त्वं जय जिन विजितद्रव्यभावारिवार ॥ २

कम्रानम्राङ्गिचेतः शिखिकुलविलसत्ताण्डवाडम्बरश्री-
हेतुः प्रेङ्खन्नखालीरुचिररुचितडिद्दामनेत्राभिरामः ।
प्रीतिं फुल्लत्फणाभाग्मणिघृणिसुमनश्चापचित्रीकृतद्यौ-
र्देयास्त्वं देशनावाक्स्तनितसुखकरो मेघवन्मेऽघहन्तः ॥ ३

भिन्दँल्लोकप्रवाहप्रबलतरसरित्पूरमुच्चैर्वहन्तं
जन्तूनां चित्तभूमौ स जयति जगति त्वद्वचोवारिकान्तः ।
मुक्त्वा गाढं गृहीतानपि विनतजनान्यत्प्रवाहाद्भयार्तो
भूयस्तन्मध्यमेव प्रविशति झटिति क्रूरमोहावतारः ॥ ४

लौल्याल्लावण्यलक्ष्मीमधुरमधुरसं त्वन्मुखाम्भोरुहोत्थं
पायंपायं भरेण प्रणतभवभृतां नेत्रपुष्पन्धयाल्यः ।
नूनं हर्षप्रकर्षोद्गतनयनपयःपूरदम्भेन दूरं
मिथ्यादृग्लोचनानामसुलभ भगवन्सद्य एवोद्गिरन्ति ॥ ५

निःस्यन्दानन्दकन्दः कलिमलकदलीकाण्डखण्डीकृतौ य-
त्कक्षाकौक्षेयकस्य क्षपितभवशतं नेत्रपीयूषसत्रम् ।
श्रेयःश्रीवल्लिहल्लीसकमलयमरुद्भाग्यमारोग्यलक्ष्म्या-
दर्शः कन्दर्पदर्पद्विजपतिपतनं दर्शनं तावकीनम् ॥ ६

विद्याविद्याधरीणां मणिमयमुकुरः क्रूरवैरारिजैत्रो
गात्रश्रीमैत्र्यपात्रीकृतरतिरमणः सच्चरित्रैः पवित्रः ।
सद्भोगाभोगभागी सुभगिमभवनं श्रीजिन श्रीद सम्प-
न्निष्कम्पः सम्पनीपद्यत इह मनुजः साधु नत्वा जिन त्वा ॥७

देव्या वाचोपि वाचामविषय दिविषन्मन्दिरद्वारसेवा-
हेवाकीसर्वनाकीश्वरमुकुटतटीघृष्टपादाम्बुजस्य ।
नेतश्चैतन्यशून्यः सकलकलयितुर्भुक्तिमात्रस्य दाता
भुक्तिं मुक्तिं च दातुः कथमिव भवतः कल्पवृक्षः सदृक्षः ॥८

(शार्दुलविक्रीडितम्)

चन्द्रः प्रत्युदकाशयं प्रतिफलत्येको न चार्थक्रिया-
कारीत्येष न वास्तवांस्तव पुनर्वृत्तं जयत्यद्भुतम् ।
एकस्त्वं प्रतिमानसं वससि यद्भव्यात्मनामेकदा
सर्वेषामथ च प्रयच्छसि फलं तेषां मनोवाञ्छितम् ॥ ९

यौष्माकीणगुणस्तुतिं विकिरती शुण्डामिवान्तर्गत-
प्रीतिं स्फीतिमतीमतीव सुरभिं दानाम्बुना बिभ्रती ।
त्रैलोक्यैकसुरद्रुम द्रुमवनानीवोन्मदा वासिता
युष्मद्भक्तिरलं भनक्ति भविनामेनांसि हृद्वासिता ॥ १०

आधारे स्थिरतोज्झिते किल भवत्याधेयमप्यस्थिरं
सोऽयं ज्ञानपथस्तथापि किमपि स्वार्थैकनिष्ठो ब्रुवे ।
अश्रान्तं मम चञ्चलेऽपि मनसि स्वामिन्बधान स्थितिं
त्रैलोक्याधिप शक्तिभाजि यदि वा किं नोपपन्नं त्वयि ॥ ११

विश्वेश प्रसभं त्वदीययशसा व्यालुप्यमाने प्रभा-
सर्वस्वे जगदाक्रमैकपटुना नूनं द्विजानां पतिः ।

शस्त्रीं लाञ्छनकैतवात्प्रतिनिशं कुक्षिप्रदेशे क्षिप-
न्कोपाटोपवशादसावुदयते बिभ्रद्वपुर्लोहितम् ॥ १२

वक्त्रेण त्वमपाहरः शशधरस्याखण्डमूर्तेः श्रियं
व्याकोशस्य कुशेशयस्य सुषमासर्वस्वमप्यग्रहीः ।
यत्तुल्यव्यसनादपि स्म जहितो नैतौ विरोधं मिथ-
स्तेनाकारि समानशीलविपदां सख्यप्रवादो मृषा ॥ १३

पुष्टाङ्गी(ङ्गं?)व्यवहारनिश्चयनयप्रोत्तुङ्गशृङ्गं शुभद्-
दानाद्यङ्घ्रिचतुष्टयं च विकसज्ज्ञानक्रियालोचनम् ।
नित्यच्छेकविवेकपुच्छलतिकं स्याद्वादपर्युल्लस-
त्पीनोच्चैः ककुदं कुतीर्थतृणभुक्सूते वृषं गौस्तव ॥ १४

आकण्ठं कमठाम्बुदोज्झितपयःपूरे निमग्नाङ्गक-
स्योत्फुल्लं मुखपङ्कजं तव पपौ या कौतुकोत्कर्षतः ।
नागस्त्रैणविलोचनालिपटली सङ्ख्याय धुर्येव तां (?)
धन्यानां गणनाक्षणे न खलु सा रेखान्यतः सर्पति ॥ १५

वन्दारोः प्रियकोपितप्रणयिनीदृक्कोणशोणत्विषः
सान्द्रस्निग्धसमुच्छलत्क्रमनखश्रेणीमयूखास्तव ।
त्वद्वृत्तस्तुतिदूतिकाभिमुखितां पाणौ चिकीर्षोः शिव-
श्रीरामां नवपद्मरागमहितं बध्नन्तु मौलौ मम ॥ १६

एवं नृदेवमहितः सहितः प्रभाव-
भूत्या प्रभूततमया विनुतो मयायम् ।
पार्श्वप्रभुर्विमलचिन्मयचित्तसौध-
मुत्तंसयत्त्ववृजिनप्रभसूरिवर्ण्यः ॥ (वसन्ततिलका) १७

पू.आ.श्री जिनप्रभसूरिविरचितः

## २४. ॥ श्रीपार्श्वनाथस्तवः ॥

(मालिनी)

अधियदुपनमन्तो यात्रिकाः प्रीतिपात्रा
अविकलफलशालि प्राणितं मन्वते स्वम् ।
स जयति फलवर्धिस्ता(स्था)नक्लृप्तावतार-
स्त्रिभुवनभवनश्रीदीपकः पार्श्वनाथः ॥ १

जिनविभुरविभाव्यं वैभवं भूरि बिभ्र-
द्भवतु भुजगभोगाभोगविभ्राजिमौलिः ।
शुभसुभगिमभङ्गीभाजनं भक्तिभाजा-
मभिमतफलकल्पानोकहः शोकहर्ता ॥ २

शरदुडुपरुचिश्रीगर्वसर्वस्वचौरै-
र्धवलितनिखिलाशामण्डलः कीर्तिपूरैः ।
दधदलिकुलनीलं भावितानं नताना-
मुपनयतु समृद्धीराश्वसावाश्वसेनिः ॥ ३

किमपि जिन ! विजेतुं दुःशकानां शकानां
महिम तलिनयन्त(?)स्त्वत्प्रभावस्य लेशाः ।
प्रसृमरकलिकालक्षोणिपालप्रताप-
प्रतिहतिकृतहस्ताः स्वस्ति विस्तारयन्ति ॥ ४

सुहृदति रिपुवारः क्षीरति क्षारनीरं
तुहिनति दहनोऽहिः पद्मिनीनालति द्राक् ।
स्थलति जलधिरेणत्येणराजः करीन्द्रो
भवति भवति भक्तिं बिभ्रतामीश पुंसाम् ॥ ५

नतशतमखचूडारत्नरोचिष्णुरोचिः
कवचितचरणाम्भोजाग्रजाग्रन्नखार्चिः ।
पुलकनिचुलिताङ्गैरुत्प्रमोदैर्न कैः कै-
रमृतपदसुखाय स्तूयसे भूयसे त्वम् ॥ ६

इदमिन ! तव चैत्यं शैत्यकृल्लोचनानां
कलितकलिवितण्डं मण्डपाखण्डितश्रि ।
तुलितसुरविमानं मानवानाममानां
दिशति मुदमुदग्रस्तम्भपाञ्चालिकाभिः ॥ ७

तव चरणयुगेन स्पर्धिनः कल्पवृक्षाः
क इति लपतु नेतुर्युक्तिरिक्तं खलोऽपि ।
दिवि विबुधगणानां त्वत्पुरो दास्यभाजां
दधति खलु सदा यद्गेहदासत्वमेते ॥ ८

तव तनुरुचिसालं नम्रमूर्धा जनोऽयं
प्रतिफलितमसक्तं स्वे ललाटे विचिन्त्य ।
मरकतदलनील ध्यानसिद्धिं व्यपोढ-
श्रममुपलभते ही लोभऋद्धेर्निदानम् ॥ ९

सकलकुशलसम्पद्वीरुधां वारिवाहः
प्रचितदुरितकक्षप्रक्षये हव्यवाहः ।
कमठधरणपद्मापार्श्वयक्षैश्चिराय
त्वमचिरहितपार्श्वः पार्श्वतीर्थेश ! नन्द्याः ॥ १०

सफलय फलवर्धिचैत्यलक्ष्मीवतंस
त्रिजगदभयदातर्मङ्क्षु नः काङ्क्षितानि ।

स्तवनमवनमेतच्चेतसस्तावकीनं
विलसतु रसनाग्रे चातुरीचञ्चुवाचाम् ॥ ११

नन्दर्तुज्वलनक्षपाकर(१३६९)मिते संवत्सरे वैक्रमे
राधस्याधिशिती त्रयोदशिबुधे सङ्घेन सार्धं सुधीः ।
यात्रायै फलवर्धिकामुपगतः स्तोत्रं तवेदं प्रभो !
श्रीमत्पार्श्व जिनप्रभो मुनिपतिः संसूत्रयामासिवान् ॥ १२
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## २५. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(अनुष्टुप्)

श्रीपार्श्वं भावतः स्तौमि महोदधिमगर्हितम् ।
उद्धरन्तं जगद्दुःखमहोदधिमगर्हितम् ॥ १

दृग्गोचरं भवान् येषां प्रियङ्गुरुचिरायते ।
प्राप्नुवन्ति सुखं नाथ ! प्रियङ्गुरुचिरायते ॥ २

त्वां चतुःषष्टिरिन्द्राणां तुष्टावामेयवैभवम् ।
समूलकाषं कषितुं तुष्टावामेयवैभवम् ॥ ३

पवनीभवितुं कर्म वनदक्षेपणायते ।
कोनाङ्घ्रिकमले नाम्नाऽवनद क्षेपणायते ॥ ४

नवन्द्यस्त्वं गतैर्मुक्ताविनतामरसाननः ।
स्वप्नेऽपि स्वदते तेन विनतामरसाननः ॥ ५

भुवि स्तुतो येन भवानिन्दीवरदलासितः ।
स्वकीर्तिपूरस्तेनेन्दुनिन्दीवरद लासितः ॥ ६

अपि व्यामोहिताशेषसुरदानवमानवा ।
न त्वामचुक्षुभन्नारी सुरदाऽनवमा नवा ॥ ७

फुल्लत्फणिफणारत्नरुचिराजितविग्रहे ।
त्वयि प्रीतिः स्फुरतु मे रुचिराजितविग्रहे ॥ ८

द्युपतिमुकुटप्रोद्घृष्टाङ्घ्रि जगत्कमलाकर
द्युपतिमनघं स्तुत्वेति त्वां कृताञ्जलिरर्थये ।
प्रशमजलधे मह्यं सद्यः प्रसद्य वितीर्यतां
प्रशमनविधौ भावारीणां जिनप्रभविष्णुता ॥ (हरिणी) ९

पू.आ.श्री जिनप्रभसूरिविरचितम्

## २६. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(अनुष्टुप्)

**श्री**पार्श्वं परमात्मानं त्रैलोक्याभयसाक्षिणम् ।
विज्ञानादर्शसङ्क्रान्तलोकालोकमुपास्महे ॥ १

**जिन** ! त्वन्नाममन्त्रं ये ध्यायन्त्येकाग्रचेतसः ।
दुराराध्यामपि श्रेयःश्रियं संवनयन्ति ते ॥ २

**न**मस्ते जगतां पित्रे विधात्रे सर्वसम्पदाम् ।
सवित्रे भव्यपद्मानामीशित्रे भुवनत्रयम् ॥ ३

**प्र**णताखण्डलोत्तंसस्रंसिमन्दारदामभिः ।
त्रिसन्ध्यं रचिताभ्यर्चं पादाम्भोजं तव श्रये ॥ ४

भवदीयाननाम्भोजे लक्ष्मीविभ्रमधामनि ।
दृष्टिः सरभसं भृङ्गीभङ्गीमङ्गीकरोतु मे ॥ ५

सूते यशः श्रियं धत्ते विघ्नव्यूहमपोहति ।
पिपर्ति परितः कामान् प्राणिनां तव दर्शनम् ॥ ६

रक्ष रक्षान्तरारिभ्यः कारुण्यामृतकुण्ड ! माम् ।
त्रैलोक्यत्राणशौण्डस्य गतोऽस्मि शरणं तव ॥ ७

यः स्तुते त्वामिति श्राद्धः सिद्धिस्तं वृणुते स्यात् ।
श्लोकाद्याक्षरनामानस्तवैनं विदधुः स्तवम् ॥ ८

पू.आ.श्री जिनप्रभसूरिविरचितः

## २७. ॥ श्रीफलवर्द्धिपार्श्वजिनस्तवः ॥

(उपजाति)

जयामल श्रीफलवर्द्धिपार्श्व पार्श्वस्थनागेन्द्र पृथुप्रभाव ।
भावल्लरीचेष्टितदिग्वितान तानर्चयामः स्तुवतेऽत्र ये त्वाम् ॥१

दूरस्थितोऽपि स्मृतिवर्त्मना त्व-मारोपितः सन्निहितत्वमुच्चैः ।
पिपर्षि चिन्तामणिवन्नराणां परः सहस्रा अभिलाषभङ्गी ॥ २

दुरुत्सहम्लेच्छहत प्रतापी कृतान्यतीर्थे कलुषैककोशे ।
कुतूहलोत्तालहृदस्तवैव कलौ कलामाकलयन्ति सन्तः ॥ ३

विस्फोटकश्लेष्मसमीरपितृ-लूताज्वरश्वित्रभगन्दराद्याः ।
त्वद्ध्यानसिद्धौषधबुद्धबुद्धिं न व्याधयो वाधितुमुत्सहन्ते ॥४

शुकच्छदाभैस्तव देहभासि-रालिङ्गिताङ्गीः प्रणता विभान्ति ।
संवीय वर्मा य समाहवो यो-धताः समं मोहमहीभुजे वा ॥५

केऽनन्यसामान्यकृपाकृपाणी छिन्नातुरार्तिं स्पृहणीयमूर्तिम् ।
त्वां भूर्भुवः स्वस्त्रयगीतकीर्तिं सवासनोल्लासमुपासते न ॥ ६

सिंहोभ वैश्वानरवैरिवार दस्यूदकाशीविषजन्यजन्यैः ।
वैतालभूपालभवैश्च कश्चिन्न स्पृश्यते नान्यभयैः श्रियस्ताम् ॥७

त्वदाननेन्दुर्द्युतिसंप्रयोगाद् विवेकिनां लोचनचन्द्रकान्तौ ।
प्रमोदबाष्पोदकबिन्दुवृन्द-निष्यन्दभाजामुचितं भवेताम् ॥ ८

पश्यन्ति नश्यत् कलिकालखेलं निलिम्पलोकायितभूमिगोलम्।
हर्षाश्रु वर्षामृतसिक्तगात्रा यात्रा महस्ते महनीयभाग्याः ॥ ९

ससोपरिष्टात्फणभृत्फणास्तैः सतां प्रवेशप्रतिषेधनाय ।
एकाग्रषण्णां नरकावनीनां द्वारापिधाना इव भान्ति सज्जाः ॥१०

तवाङ्गरोचिर्जलदैः करांह्रिनखांशुशंपास्फुरितैः परीते ।
शचीशचापं रचयन्ति चित्राः फणामणीनां घृणयोऽन्तरिक्षे ॥११

तव क्षणं नोज्झति पादपद्मं पद्मावती तावदियं निरूढिः ।
तद्यस्य चित्ते वसति क्रमं सा
सान्निध्यमस्या तनुते न चित्रम् ॥ १२

भव्या अभीक्ष्णं भवतः प्रभावै-श्चमत्कृतं यद्धनु ते शिरांसि ।
अमान्तमन्तः प्रमदं शरीरे समापयन्ते तव वश्यमेते ॥ १३

तवास्यपद्माद्धरतो निपीय निपीय लावण्यरसोतिलौल्यान् ।
भव्यात्मनां लोचनचञ्चरीकै-र्मुदष्कदम्भादि न वम्यते न ॥१४

अहो मुखेन्दुस्तव कोऽपि दोषा निहन्ति यो यत्र विलोकिते च।
पद्मानि कामं दधति प्रबोधं भवेन्न दीनोप्यपचीयमानः ॥ १५

जयत्यपूर्वांभवदाननेन्दुरालोकमात्रेण जिनेश यस्य ।
भवाम्बुराशिः परिशोषमेति विकस्वरी स्यु-र्नयनाम्बुजानि ॥१६

तवापि माहात्म्यकलाविशेषाः केषांचिदुच्चैस्तरपातकानाम् ।
मनांसि नाथ व्यथयन्ति दन्ति-दन्तानिवांशुप्रकराः सुधांशोः॥१७

घटाः करीणामिव सिंहनादात् प्रालेयपातादिव पङ्कजिन्यः ।
त्वद्ध्यानमात्रादपयान्ति पीडाः, प्रणेमुषां देहमनः समुत्थाः ॥१८

अशान्तिभाजामपि शान्तिशान्त-व्यापादमापादितनेत्र शैत्यम् ।
चैत्य तवा...तविमानमान-मानन्दयेत्कं न समेतमेतन् ॥ १९

तवैव वैवस्वतशासनाति-क्रान्तस्य कान्तस्य विमुक्तलक्ष्म्याः ।
भवे भवेदास्यपदं प्रपद्ये यथा तथा नाथ मयि प्रसीद ॥ २०

इत्थं श्रीफलवर्द्धिपार्श्वभुवने विश्वेन्दिरा नर्त्तकी
नाट्यचार्यजिनप्रभं जनभुजामीशेन सेव्यक्रम ।
श्रेयःश्रीपरिरम्भ संभवसुखव्याघातबद्धोद्यमं
विघ्नौघं विनिगृह्य मह्यमुदयं विश्राणय श्रेयसाम् ॥(शा.वि.)२१

पू.आ.श्री जिनप्रभसूरिविरचितः

## २८. ॥ श्रीफलवर्द्धिपार्श्वजिनस्तवः ॥

श्रीफलवर्द्धिपार्श्व-प्रभुमोंकारं समग्रसौख्यानाम् ।
त्रैलोक्याक्षरकीर्तिं लक्ष्मीबीजं स्तुवेऽर्हताम् ॥ १

नमिऊण तुह पयजुयं भत्तीए पासनाह जोइ नरो ।
सिहणिज्ज संनिहाणो विसहरवसहस्स धरणस्स ॥ २

तुह उवरि जिण फुरंता फणिफणरयणिंकुराविरायंति ।
पाववणडहणपजलिरज्झणानलफुडफुलिंगुव्व ॥ ३

मायाबीयं कम्मं खविउं पत्तस्स परमपयरज्जं ।
सिरिइंदविंदवंदिय अरहंत नमो नमो तुज्झ ॥ ४

इय मंतसरूओ तं जियचिंतारयणं कप्पतरुदप्पो ।
हिययकुसेसेकोसे निवसंतो पूरसिमणिट्ठं ॥ ५

कलिकुंड-कुक्कडेसर, संसेसर-महुर-कासि-अहिछत्ता ।
थंभणय-अजाहर पवर नयर करहेड नागदहो ॥ ६

सेरीसअं-तरिरक्खमिणिचारुप्पढिंपुरी पमुहा ।
दिट्ठा तित्थविसेसा पइं पहु दिट्ठे गुणगरिट्ठे ॥ ७

तुह नामक्खरजावेण पडिहया जंति विलयमुवसग्गं ।
किं गरुडपक्खवाएण पियाऊससंति फणी ॥ ८

विक्रमवर्षे करवसुशिखिकु१३८२मिते माधवासितदशम्याम् ।
व्यधित जिनप्रभसूरिस्तवमिति फलवर्द्धिपार्श्वप्रभोः ॥ ९

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## २९. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(शिखरिणी)

नमस्यद्गीर्वाणाधिपति-नृपति-स्तोम-विनम-
च्छिरः श्रेणिभ्रश्यत्कुसुमविसराभ्यर्चितपदम् ।
प्रणम्य श्रीपार्श्वं कुवलयदलोत्पीलमहसं,
स्तवं तस्यैवाहं किमपि करवै वीरितरुजः ॥ १

यशो यौष्माकीणं भुवनवलयं भ्राम्यदनिशं,
यदिन्द्रैः सर्वैरप्यखिलमिव गन्तुं न शकितम् ।
तदस्माद्दृक्क्श्चिन्निविडजडिमा वक्ष्यति कुतो,
यतो भ्राष्ट्रं भङ्क्तुं प्रभवति कदाचिन्न चणकः ॥ २

तथापि त्वां स्तोतुं जिनवरपरायत्तहृदयो,
भवद्भक्त्यावेशाज्जडमतिरपि प्रावृतमहम् ।
हहा ! धिग् ! मां यद्वा कृपणमविवेकं यत इह,
त्वदीयानुध्यानादुचितमखिलं सेत्स्यति मम ॥ ३

गतोऽहं संसारे नर-नरक-तिर्यक्-सुरभवे-
ष्वनेकेष्वेव श्रीजिनमलभमानः क्वचिदपि ।
इदानीं यौष्माकं चरणकमलं संश्रितवतो,
द्विरेफस्येवाभून्मनसि परमा निर्वृतिरतः ॥ ४

मयि स्वामिन् ! सम्प्रत्यनवरतरोगार्त्तवपुषि,
त्वदीयं पादाब्जं मनसि कृतवत्यादरवति ।
प्रसादं कुर्यास्त्वं दिशि दिशि लसत्कीर्त्तिकुसुम !
प्रसन्नाः स्युः सन्तः प्रणमति यतः प्राणिनिवहे ॥ ५

शरीरं ये कुष्ठज्वरकृशमतीसारमधुरं,
प्रसर्प्पल्लूतारिच्युतरुचिचयं बिभ्रति नराः ।
प्रपन्ना वा मौर्ख्यं पदविरचनेप्याकुलधियो,
लभन्ते तेप्याशु स्वमभिलषितं त्वत्स्मृतिवशात् ॥ ६

भवन्तं संसारद्रुमपरशुमेकान्तहितदं,
विहायापद्भीताः शरणमपरं येऽभ्युपगताः ।

अहं तानाशङ्के शुचिरविकरोत्तप्तवपुषो,
हिमभ्रान्त्यारब्धज्वलदनलसेवान् हतमतीन् ॥ ७

न यस्त्वामस्तावीन्न मनसि दधौ नापि शिरसा,
व्यनंसीन्नाद्राक्षीन्न च जिन ! समार्चीत् क्वचिदपि ।
कुतो रम्यस्त्रीणां मुखशशिनि बिम्बाधरदले,
स्तनाभोगो चासौ जितकलभकुम्भे विलसति ॥ ८

(मालिनी)

भवति भवति यस्यान्तर्गतो भक्तिभाव-
स्ततभवतरुकन्दस्तेन पुंसोदखानि ।
रुचितपवनयुक्तं पोतमाश्रित्य यद्वा,
न हि न भवति यातुः पारगो वारिराशेः ॥ ९

तव चरणसरोजं ध्यायतां देहभाजा-
मरिकरिहरिचौरव्याध्यहिद्वन्द्वबन्धैः ।
जलधिजलदभूतप्रेतरक्षोऽग्निरूपै-
र्न भवति भयगन्धोप्यस्तु तावत्प्रणामः ॥ १०

सदधरदलयुक्तं दन्तसत्केसराढ्यं,
नयनमधुपशोभं वाङ्मधुभ्राजितं च ।
वदनसरसिजं ते ध्यायते यैस्त्रिसन्ध्यं,
भवभवभयभेदी पार्श्वनाथाशु भूयाः ॥ ११

सविनयसुरराजी कृप्तराजीवराजी,
प्रवरयतिसमाजी दान्तरागोग्रवाजी ।

गदितनवपदार्थः प्रीणितप्राणिसार्थः,
सकलदुरितमाथः सोऽस्तु नः पार्श्वनाथः ॥ १२

गतिजितगजलीलं पालिताखण्डशीलं,
मिलदलिकुलनीलं त्रोटितापत्करीलम् ।
नतजनमतमीलं प्रोद्धृतारातिकीलं,
नमत कृतनतीलं पार्श्वमुद्धूतहीलम् ॥ १३

त्रुतिटमदननालं लूनलोभप्रवालं,
प्रणमदवनिपालं देहिनां स्वामिशालम् ।
स्फुरदुरुगुणजालं पार्श्वनाथं त्रिकालं,
स्मरत विपुलभालं छिन्नमायामृणालम् ॥ १४

सुरभिमुखसमीरं प्राप्तसंसारतीरं,
जलधिजलगभीरं शोकपङ्कौघनीरम् ।
जिनसुखदशरीरं मानभूल्लेखसीरं,
नमत भवततीरं पार्श्वमद्रीन्द्रधीरम् ॥ १५

जय जिनवर ! शुक्लध्यानदीप्ताग्निदग्ध-
क्षरदखिलमलोद्यत्केवलादर्शबिम्ब ! ।
प्रतिफलितसमस्तालोकलोकस्थवस्तु !,
स्थिरयुगपदमीलद्बोधरूपान्यदृष्टे ! ॥ १६

(वसन्ततिलका)

त्रैलोक्यभर्तुरपि मृ[मू?]द्र्धनि वर्द्धितश्री-
स्तिष्ठाम्यहं रविगुणश्च विभोर्विपुष्टः ।
नर्नर्ति तुष्ट इव भृङ्गरुतोरुगीतिः,
कङ्किल्लिरुल्लसितपल्लवपाणिरुच्चैः ॥ १७

सौरभ्यलुभ्यदभिभृङ्गभराभिरुद्धि-
राभ्योऽतिषुर्वरदधर्मकथावनिं ते ।
आयोजनं तदनुसम्यगधःस्थवृन्तैः,
सन्तस्तरुः सुरभिभिः कुसुमैः सुरौघाः ॥ १८

मार्णालसूत्रचयचारु तवेन्द्रहस्तो-
दस्तं ललाम शुचिचामरयोर्द्वयं तत् ।
संवृद्धयोरसमकीर्त्तितपः श्रियोस्ते,
शोभाम्बभार भुवि यत् कचसञ्चयस्य ॥ १९

सिंहासने जिनवरो जिन ! तन्त्र तिष्ठन्,
यस्योल्लसद्भिरभितो मणिभाप्रतानैः ।
त्वद्भक्तिभूरिभविनां युगपच्छिवाप्त्यै,
तद्वर्त्मनां ततिरिव प्रथयाम्बभूवे ॥ २०

छत्रत्रयं यश इव त्रिगुणोत्थमुच्चै,
रत्नध्वजस्त्रिजगदूर्जितकीर्त्तिकेतुः ।
सद्धर्मचक्रमपि सर्वजगद्विभुत्वं,
व्याख्याति तैः सुरकराहतदुन्दुभिश्च ॥ २१

इत्यादि तेऽतिशयवृन्दमनन्यतुल्य-
मार्हन्त्यमाख्यदमरा रचयाम्बभूवुः ।
व्यक्तं त्विदं ददृशुषामपि न व्यपैति,
मिथ्यात्वधीर हह ! कष्टतमो हि मोहः ॥ २२

यद्वान्यदस्तु विततािग्निमहस्सपत्नं,
मार्त्तण्डमण्डलविडम्बितचारुदेहम् ।

भामण्डलं किल न किं कलिलाकुलाक्षा-
वीक्षां बभूवुरपि मोहहरं वराकाः ॥ २३

मा द्राक्षुरेव यदि केचिदुलूकगोत्राः,
किं शुश्रुवुः श्रुतिसुधामपि तेन वाणीम् ।
सर्वाङ्गिसंशयभिदं यदमी त्वदुक्ते,
मुक्तेः स्फुटेपि पथि सन्दिहते हताशाः ॥ २४

(हरिणी)

दलितसकलापन्दिस्फीति कृताखिलसम्पदः,
क्षणमपि विभो ! यस्ते नामाक्षराणि जपेन्नरः ।
मुकुलनयना मीलत्पक्ष्मश्वसन्मुखकम्पिता-
धरदलजडस्विद्यद्गात्राः स्मरन्ति तमङ्गनाः ॥ २५

विनमदमरश्रेणीचञ्चत्किरीटमणिप्रभा-
निचयरचितप्राज्यप्रेङ्खच्छचीपतिकार्मुकम् ।
चरणनलिनं ये यौष्माकं स्मरन्ति कृतादरा,
जिन ! सुकृतिनां तेषां हस्तस्थिताः शिवसम्पदः ॥ २६

दधति सफलं ते जन्मत्वं शशाङ्ककरद्युति-
र्भ्रमति भुवने तेषां कीर्त्तिस्त एव नतेः पदम् ।
किमथ बहुना तेषां सर्वं प्रसिद्ध्यति वाञ्छितं,
वसति हृदये येषां शश्वद्भवच्चरणद्वयी ॥ २७

सुकुलविकलः क्रूरो भीरुः शठो निधनः खलु-
श्च्युतगुणलवो लोकद्वेष्यो जडः सरुजश्च यः ।

चरणयुगले त्वत्के नाथ ! प्रसीदति सोऽपि ना,
सुरपतिगणैरप्युद्गर्वैः सगौरवमीड्यते ॥ २८

कलुषमपहृद्दोषप्लोषिन् ! कषायमृषाद्विषन् !,
मुषितरुषितश्लिष्यद्दोषापकर्षविषौषधे ! ।
हृषितवपुषां पुष्यत्तोषप्रकर्षयुषामृषे !,
त्वमभिलषितान्येषां स्वामिन् ! पुषाण नुनूषताम् ॥ २९

विवशवपुषं कामक्रोधाभिलाषमदभ्रमै
र्मुखकुहरगं जन्मन्यापज्जरामृतिरक्षसाम् ।
परिगततनुं दौर्भाग्येण द्रुतं परिरक्ष मां,
जिनवर ! भवत्पादद्वन्द्वं शरण्यमुपाश्रितम् ॥ ३०

न नृपपदवीं नार्थावाप्तिं न भोगसुखं न वा,
सुरपतिपदं त्वां याचेऽहं न वा शिवसम्पदम् ।
अहनि निशि च स्वप्ने बोधे स्थिते चलिते वने,
सदसि हृदये भक्त्यद्वैतं ममास्तु परं त्वयि ॥ ३१

इति फणिफणारत्नस्फूर्जन्मयूखशिखामिष-
स्फुरितहृदयान्तःस्थज्ञानप्ररोह तथा कुरु ।
शिवपुरपदप्राप्तेः पन्था यथा जिनवल्लभो,
भवति सततं त्वत्पादाब्जप्रणामरसोऽसमः ॥ ३२

(शार्दूलविक्रीडित)

अज्ञानाद्भणिति स्थितेः प्रथमकाभ्यासात्कवित्वस्य यत्,
किञ्चित्सम्भ्रमहर्षविस्मयवशाच्चायुक्तमुक्तं मया ।
तत्क्षन्तव्यमुदारनायकगुणांशाख्यानमेवात्र स-
च्चेतोहारि-विचारिता कृतमिदं वान्यत्कवीनां पथः ॥ ३३

पू.आ.श्री जिनवल्लभसूरिप्रणीतम्

# ३०. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(स्रग्धरा)

पायात् पार्श्वः पयोदद्युतिरुपरि फणिस्फारफुल्लत्फणालीं
बिभ्रद् विस्फूर्जदूर्जस्वलमणिकिरणासूत्रितेन्द्रायुधां वः ।
संरूढप्रौढकर्मद्रुमवनगहनप्लोषपुष्यद्विशुद्ध-
ध्यानाग्निज्वालमालानुकृतिसकृतया सप्तधा प्रोल्लसन्ती ॥ १

सद्भक्तिव्यक्तियुक्तत्रिदशपतिनमन्मौलिमन्दारदाम-
श्च्योतत्किञ्जल्ककल्कव्यतिकरकवरोदारपादारविन्द ! ।
दृष्ट्या पीयूषसृष्ट्या दधदखिलजनव्रातमातङ्कमुक्तं
भव्यानव्याजमव्याद् भवदवदवधून्मन्थितान् पार्श्वनाथः ॥ २

सम्पत्पूर्णं न किन्नु प्रमदमयमथो निर्मितं शर्मणाहो-
रोहत्कल्याणवल्लिप्रचयमुत भवन्नाकिलोकावतारम् ।
इत्थं सन्देहदोलां दधदधिकमभात् पञ्चकल्याणकेषु
त्रैलोक्यं यस्य स स्याज्जिनपतिरपतिः सर्वकल्याणकृद् वः ॥३

श्रीमान् यः पापतापप्रशमहिमरुचिः सप्तभिः पन्नगेन्द्र-
स्फारोत्फुल्लस्फटाभिः स्फुटफलितमणिप्रांशुरश्मिच्छटाभिः ।
भाति भ्रान्तिच्छिदायै जगति सुनयसत्तत्त्वसत्सप्तभङ्गी-
सङ्ख्याव्याख्यानबद्धक्षण इव स जिनः श्रागनिष्टं पिनष्टु ॥४

भक्तिप्राग्भारनम्रामरविसरशिरःश्रेणिचञ्चत्किरीट-
स्पष्टोच्चैःकोटिकाषोज्ज्वलचलननखादर्शसङ्क्रान्तकायम् ।
सेवासज्जं यदग्रे त्रिजगदपि विभात्युग्रसंसारशत्रु-
त्रासान्निर्भीतदेशश्रितमिव स विभुर्व्यस्यतु व्यापदं वः ॥ ५

उन्मीलल्लीलमुद्यल्ललितमुदयदस्तोकबिब्बोकमुच्चैः
साचिप्राञ्चत्कटाक्षच्छटमधिकभवद्विभ्रमारेचितभ्रु ।
स्वःस्त्रैणं नाक्षिपद्यं स्मरपरिचिदिति व्यक्तशृङ्गारभावं
भव्याधिव्याधिबन्धं हरतु स भगवान् भग्नकन्दर्पदर्पः ॥ ६

दैन्यादन्योन्यवृत्त्यानुकृतपरतया त्रासतो हासतो वा
देव ! प्राहुर्नमस्ते इति पदमपि ये केऽपि तेऽपि क्रमेण ।
स्वःकान्तोन्मुक्तमुक्तावलिललितकटाक्षच्छटालक्ष्यलक्ष्या
मङ्क्षु स्युर्मोक्षलक्ष्मीकुचकलशतटीतारहारप्रकाराः ॥ ७

स्फूर्जन्मोहप्ररोहच्छिदुरपरशुना सद्य उद्दामधाम्ना
नाम्नाम्नातेन यस्य त्रिजगति निखिलोपद्रवा विद्रवन्ति ।
नन्द्याद् वन्दारुवृन्दारकनिकरनमन्मस्तकस्तोमशस्त-
श्रस्तास्तोकप्रसूनस्तबकितचरणोपान्तपार्श्वः स पार्श्वः ॥ ८

दृब्धं विमुग्धमतिना जिनवल्लभेन
ये स्पष्टमष्टकमदः समुदः पठन्ति ।
भूयोऽनुभूय भवसम्भवसम्पदं ते
मुक्त्यङ्गनास्तनतटे सततं लुठन्ति ॥ (वसन्ततिलका) ९

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ३१. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

देवाधीशकृतानते ! शुभगते ! विध्वस्तरुक्संहते !,
छिन्नाज्ञानतते ! गुणैकवसते ! नष्टारते ! स्वायते ! ।
दत्तप्राज्यमते ! प्रदिष्टविरते ! पार्श्व ! प्रणुन्नक्षते !,
लूनेतिव्रतते कृतार्थसुमते जीयास्त्रिलोकीपते ! ॥ १

प्रोद्गच्छत्फलिनीच्छविस्तुतमहामोहान्धकारे रविः,
दृप्यत्कामगिरीन्द्रभेदनपविः सद्वस्तुवादे कविः ।
नम्रक्ष्मापतिमौलिचुम्ब्यचरणस्तृष्णालतावारणो,
व्यापत्त्यभ्रसमीरणः क्षतरणः पार्श्वोऽस्तु रुग्दारणः ॥ २

मूलोन्मूलितसंसृतिर्गतभवोपग्राहिकर्म्मावृति-
र्ध्वस्ताधिप्रसृतिर्निरस्तनिकृतिः कान्तप्रशान्ताकृतिः ।
पुष्यत्पुण्यकृतादृतिर्धृतिततिः कल्याणकारिस्मृतिः,
पातोत्पादितलोकलोचनधृतिः पार्श्वो लसन्निर्वृतिः ॥ ३

रागारिद्विषि पापसञ्चयमुषि प्रत्तप्रशस्ताशिषि,
क्षीणाशेषरुषि प्रकृष्टवपुषि स्फारोल्लसच्चक्षुषि ।
फुल्लेन्दीवररोचिषि प्रविकसत्सत्केवलद्योतिषि ।
स्फीतानन्दजुषि त्वयि स्फुरतु मे प्रीतिः शिवे तस्थुषि ॥ ४

भ्राम्यत्कीर्त्तिचयः प्रकाशितदयः सद्वन्द्यपादद्वयः,
शुद्धज्ञानमयः क्षितस्मयरयः सम्प्राप्तसिद्धालयः ।
ध्वान्तद्वेषहयः प्रणीतसुनयः श्वेतातपत्रत्रयः,
पुष्यत्पद्मशयः प्रणाशितभयः पार्श्वोऽवतादव्ययः ॥ ५

वाचस्त्वद्गुणकीर्त्तने श्रुतियुगं त्वद्भाषिताकर्णने,
चेतस्त्वत्कथितार्थचिन्तनविधौ चक्षुस्तवालोकने ।
त्वत्पादः प्रणतौ शिरः पदयुगं त्वत्सम्मुखाभ्यागमे,
बध्नात्याग्रहमाभवं भवतु मे तत्त्वप्रशस्ताथवा ॥ ६

यस्त्वां ध्यायति पश्यति प्रणमति स्तौति स्मरत्यर्चय-
त्यन्तर्भक्तिलवेपि वक्ति मनुते धत्तेऽथवा यो हृदि ।

कीर्त्तिस्फूर्जति तस्य सीर्यति वपुच्छ्रीरेति धीर्वर्धते,
वाञ्छा सिद्ध्यति दीर्यते भवभयं नश्यन्ति सर्वारुजः ॥ ७

कीर्त्या स्फायि भिया पलीय सुगुणैर्लिल्ये प्रशस्ने श्रिया,
रोगादिव्यसनैरनाशि दुरितैर्दद्रे जजृम्भे धिया ।
रत्याभावि भवाश्मना विजघटे श्रेयोभिराशिश्रिये,
यद् युष्मत्पदकल्पवृक्षलतिका वीक्षाम्बुभूवे मया ॥ ८

चिन्तातीतिवितीर्णसत्फलपदद्वन्द्वास्तु चिन्तामणे !,
घोरापारभवाम्बुराशिनिपतज्जन्तुव्रजोत्तारक ! ।
यत् किञ्चित्सुकृतं समर्जितमितस्त्वत्कीर्त्तनात्तेन मे,
नित्यं स्ताज्जिनवल्लभो भवभयध्वंसी प्रणामस्तव ॥ ९

(स्रग्धरा)

नेन्द्रत्वं नाधिराज्यं न सुरवरसुखं नार्थलाभं न कामा-
न्नो मुक्तिं नापि चान्यत् कृतकरमुकुलः प्रार्थये नाथ ! किन्तु ।
स्थाने यानेऽह्नि-रात्रौ सदसि पथिगृहे कानने स्वप्नबोधे,
सौख्ये दौस्थ्ये हृदीश ! त्वयि शुचिमुदिताद्वैतमेवास्तु भक्तेः॥१०

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ३२. ॥ श्रीस्तम्भन-पार्श्वनाथ-स्तोत्रम् ॥

(शिखरिणी)

समुद्यन्तो यस्य क्रमनखमयूखा विदधिरे,
नमन्नानानाकिप्रभुशिरसि चूडामणिरुचम् ।
स्तुवेऽहं तं पार्श्वं निजतनुविभा नीलनलिनैः,
ककुप्कान्तोत्तंसानिव विदधिवांसं सरभसम् ॥ १

विभो ! यौष्माकीणं स्तवति तनिषा यद्यपि भवे-
दशक्तेः शक्रादेरपि परिभवायैव तदपि ।
अनन्योपायत्वादभिमतफलाप्तेरकरवं,
मनोऽत्रार्थेऽत्यर्थी भवदरपरीतोऽतिकृपणः ॥ २

प्रशान्तं सद्वृत्तं सपदि कुमुदाप्यायनपरं,
सदा हृद्योद्दामद्युतिदलितदोषान्धतमसम् ।
बुधानन्दस्यन्दं धरणिमरणीरम्यतिलकं,
मुखेन्दुं द्रक्ष्यामि क्षपितजलजातं तव कदा ॥ ३

भवाम्भोधौ मग्नं प्रणयिजनमुत्तार्य बहुधा,
विधायाधिव्याधिक्षयमिह जिन ! त्वं शिवमगाः ।
इदानीं भावत्की प्रतिकृतिरपि स्तम्भनपुरे,
निविष्टा शिष्टानां जनयति नतानामभिमतम् ॥ ४

नराः कासश्वासक्षयनयनरुक्कुष्ठकिटिभ-
ज्वरातीसारार्शःश्रुतिमुखरदव्याधिविधुराः ।
निरस्ताः सद्वैद्यैरपि सपदि सिद्धौषधिविधे-
स्तव ध्यानाद्देव ! स्युरिह घटितोल्लाघवपुषः ॥ ५

गुणैः पुष्टं जुष्टं चरणचलसत्साधुमधुपै-
र्ग्रदिष्ठौष्ठश्रेष्ठच्छदमिव कदन्तद्युतिमधुः ।
श्रियो रम्यं हर्म्यं भुवननदशोभाकरमरं
कदास्मि द्रष्टास्मि स्मितकमलकान्तं तव मुखम् ॥ ६

धियाहीनो दीनः कुकृतशतलीनः सुकृपणो,
गुणैर्वान्तस्तान्तस्ततभवमहावर्त्तपतितः ।

विलग्नो भग्नोऽहं तव पदयुगे तद्गुरुकृपा-
कृपाणि कृत्तान्तःकरणशरणं त्वं मम परम् ॥ ७

न रुग्नाहिर्नाधिर्न दवदहनो नोन्मदकरी,
न चौरी नैणारिर्न समरभरो नारिनिकरः ।
न रौद्रक्षौद्रोग्रग्रहडमरमारिप्रभृतयो,
भयं कुर्वन्त्यन्तर्जिनवर ! भवन्नाम जपताम् ॥ ८

अनुष्णं शुष्णं तं सुविमलविभामण्डलमलं,
ग्रहग्रासापेतं विनिहतमहामोहतिमिरम् ।
समं लोकालोकप्रकटकमजस्त्रोदितमहं,
विलोकिष्ये ? कर्हि क्षततततमस्त्वापररविम् ॥ ९

नितान्तं यत्कान्तं प्रविततमनन्तं च सततं,
प्रकाशं विश्वाशास्वशिशु शशिशोचिः शुभरुचिः ।
अजय्यं न क्षय्यं श्रुतमपि चमत्कारिमनसो,
दधानन्तज्ञानं स्व यश इव वन्दे महिविभुम् ॥ १०

मुदा नृत्यन्नुच्चैश्चलकिशलयोऽशोकविटपी-
रणद्भृङ्गोद्गीता सुरभिसुमनोवृष्टिरभितः ।
रुचारोदोरन्ध्रं पिदधदुरुरत्नासनवरं,
विधत्तेदश्छत्रत्रितयमधिप ! त्वं त्रिजगताम् ॥ ११

महच्चक्रं रत्नध्वजसहिनमुच्चैर्हि विलसद्,
विशालं सच्छालत्रयममलमाल्यादिरचितम् ।
सुराधीशोद्धूतं शुभि रुचिचलच्चामरयुगं,
गदन्नादाद्वैतं सुरकरहतो दुन्दुभिरपि ॥ १२

इति प्रातीहार्यं जगदसममत्यद्भुततमं,
तवैवार्हन्त्यार्हं जिन ! विरचयाञ्चक्रुरमराः ।
अशेषद्वेषादिक्षयभवगुणाश्च त्वयि यत-
स्त्वमेवातः सम्यक् सकलजगदीशोऽसि भगवन् ! ॥ १३

नयाः शस्याश्छब्दाः स्युरिह सुनयास्तैश्च निखिलै-
र्यथावत्त्वत्प्रोक्तं वरद ! घटते वस्तुसकलम् ।
कुतीर्थ्यास्त्वेकैकं कुनयपथमास्थाय कुदृशो,
हहा ! व्यावक्रोशीं विदधति वृथान्धा इव गजे ॥ १४

दृशाऽस्तैणं स्त्रैणं गुरुमदकलं हस्तिकमलं,
सुजातं पादातं प्रवररथकन्यौष्ट्रकवती ।
स्वकीयं स्वश्रीयं विनयविनतं राजकमिति,
प्रभो ! प्राज्यं राज्यं त्वदभिनुति लीलेति विदितम् ॥ १५

शयालुस्तन्द्रालुः कुगतिपतयालुर्ध्रुवमहं,
दयालोऽश्रद्धालुर्यदनुगृहयालोस्तव वचः ।
यतः प्रीत्या सम्यग्वरदरससिद्धोक्तिकरणे,
दरिद्रो निद्रालुर्न खलु हृदयालुः किल भवेत् ॥ १६

वचः स्तावं स्तावं तव भवभिदं सद्गुणगणं,
शिरो नामं नाम तव पदयुगं द्वन्द्वभिदुरम् ।
मनः स्मारं स्मारं तव सुचरितं त्वन्मुखविधुं,
दृशो दर्शं दर्शं क्व मम भवितारौ परमुदौ ॥ १७

सृतं साम्राज्येन त्रिजगति न कार्यं युवतिभिः,
कृतं विद्यामन्त्रप्रभृतिभिरथास्तां द्युपतिता ।

अलं चिन्तामण्यादिभिरपि परं श्रायन(?)सुख-
श्रियो हेतुर्मेऽन्तः स्फुरतु भगवद्भक्तिरनिशम् ॥ १८

किमन्धाः किं मुग्धाः किमुत ठकिताः किं ग्रहवशाः,
किमज्ञाः किं स्वात्मद्रुह इह जनाः किं विधिहताः ।
चतुस्त्रिंशत्तथ्यातिशयविशदं त्वां न यदमी,
समाशे श्रीयन्ते गुणगुरुमरागादिकलुषम् ॥ १९

रुजां गेहं देहं प्रिययुवतयः क्लेशततयः,
क्षणस्थेमप्रेम प्रथितनिधनं बह्वपि धनम् ।
गतत्राणाः प्राणाः सुखसमुदया नश्यदुदया-
स्त्वदुक्ते निर्मुक्ते परमिति मनो वेत्ति मम नो ॥ २०

त्वमम्बा त्वं बन्धुस्त्वमसि जनकस्त्वं प्रियसुहृत्,
त्वमीशस्त्वं वैद्यस्त्वमसि गुरुस्त्वं शुभगतिः ।
त्वमक्षि त्वं रक्षा त्वमसव इति त्वं मम न किं,
ततो मां त्रासीष्ठाः कठिनगदवृन्दार्दिततनुम् ॥ २१

कृताबोधे क्रोधे बहुविधमदे क्लेशशतदे,
भवारम्भे दम्भे विषयतृषि पुण्याङ्कुरकृषि ।
धृताशोभे लोभे दुरितसदने दुष्टमदने,
परिश्रान्तं स्वान्तं मम जिन ! यथा स्यात् कुरु तथा ॥ २२

भवोद्भूतेरेतद्विदितमिन ! नानंसिषमहं,
क्वचित्त्वां प्राक्पार्श्व ! क्षतभव ! न चास्ताविषमिति ।
इदानीं वन्दारुर्विकरणमुपेतः शिवपदं,
नवं दिष्ये स्तोष्ये न च तदिदमागः सह चतुः ॥ २३

(शार्दूलविक्रीडित)

इत्थं तीर्थपतेः पितुस्त्रिजगतः श्रीआश्वसेनेः पुरः,
प्राज्ञः सक्षुभदञ्जलिर्विलसदानन्दोल्लसल्लोचनः ।
प्राद्रच्छत्पुलकच्छलप्रविकसत्पुण्याङ्कुरो यः स्तुया-
ल्लीलाभाञ्जिनवल्लभो ननु वसेत्स्वः श्रीशिवश्री हृदि ॥ २४

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ३३. ॥ श्रीस्तम्भन-पार्श्वनाथ-स्तोत्रम् ॥

(मालिनी)

विनयविनमदिन्द्रं मन्मनोऽम्भोधिचन्द्रं,
हितकृतिगततन्द्रं प्राणिषु प्रीतिसान्द्रम् ।
वचसि जलदमन्द्रं संस्तुवे पार्श्वचन्द्रं,
त्रिजगदवितथेन्द्रं धैर्यधूताचलेन्द्रम् ॥ १

सुमुनिगणगरिष्ठं प्राप्तविज्ञानकाष्ठं,
वरचरणवरिष्ठं स्तम्भने सुप्रतिष्ठम् ।
जगदवनपटिष्ठं कर्मनाशाल्लघिष्ठं,
शमनिधिमतनिष्ठं पार्श्वमर्चाम्यनिष्ठम् ॥ २

त्रिभुवनजनवन्द्यां सर्वलोकाभिनन्द्यां,
प्रतिरवनिचितान्द्यां कुर्वतीमस्तमान्द्याम् ।
गिरमनुपमपद्यां चञ्चदुद्दामगद्यां,
हृदि कुरु निरवद्यां पार्श्वनाथास्यविद्याम् ॥ ३

हृतविषयपिपासं सिद्धधामाधिवासं,
गतसकलविलासं फुल्लनीलाब्जभासम् ।

धुतभयमपहासं त्वां नतं त्वत्कदासं
कुरु सुभव जिहासं पार्श्व ! मन्धीविकासम् ॥ ४

मधुमधुरविरावं क्लेशकान्तारदावं,
भवजलनिधिनावं सम्यगादिष्टभावम् ।
गुरुलसदनुभावं चण्डताकाण्डलावं,
मदकरिहरिशावं पार्श्वमीडेऽस्तहावम् ॥ ५

नलिननिहितपादं योजनव्यापिनादं,
हतकुनयविवादं धर्मिणां सुप्रसादम् ।
परिमुषितविषादं नौमि मुक्त्वा प्रमादं,
सुखमितमितसादं पार्श्वमुद्घप्रवादम् ॥ ६

क्षतदुरितविकारं ध्वस्तबन्धप्रहारं,
प्रहतडमरमारं नश्यदीतिप्रचारम् ।
कृतजगदुपकारं नाकलोकानुकारं,
जिन ! तव बहुवारं स्तौमि भूमीविहारम् ॥ ७

नतजनजनिताशं विश्वविश्वप्रकाशं,
विशदगुणभृताशं हन्तदीप्त्यस्तकाशम् ।
दितपरिचयपाशं त्वां स्तुवेऽतः सदाशं,
जिन ! बृहदवकाशं यच्छ मे छिन्नपाशम् ॥ ८

नखरुचिमधुधारं स्वाङ्गुलीपत्रभारं,
श्रिय उचितमगारं विश्वभूषाप्रकारम् ।
क्रमकमलमुदारं ते स्वभाम्भःप्रसारं,
भ्रमर इव कदारं पार्श्व ! लेढास्मि सारम् ॥ ९

विधुरहरणदक्षं भव्यबोधैकलक्षं,
विजितविलसदक्षं पुण्यभाजां समक्षम् ।
प्रणमदमरयक्षं दग्धदुष्कर्मकक्षं,
प्लुतकुमतविपक्षं पार्श्वमार्त्तार्त्तिरक्षम् ॥ १०

सुकृतसमभिहारं मुक्त्युरस्तारहारं,
गदगिरिसितधारं सिद्धिरामाभिसारम् ।
कृतकमठनिकारं कीर्णलोकापकारं,
वरद ! निरतिचारं त्वां नुमो निर्विकारम् ॥ ११

शिवगमनविमानं मुक्तिकान्तैकतानं
गुणगणमसमानं बिभ्रतं भ्राजमानम् ।
अकलितमहिमानं वार्षिकोदारदानं,
नमत सुगतियानं पार्श्वमस्ताभिमानम् ॥ १२

प्रथितपृथुकलापं नष्टदुष्टाभिशापं,
मृदितकुसुमचापं भीतिहृन्नामजापम् ।
जनकुमतिदुरापं त्वां प्रतीत्थं विलापं,
विदधतमुरुतापं मां क्रियाः पूतपापम् ॥ १३

सकलकुशलपोषं क्षीणहिंसादिदोषं,
कृतकलिमलमोषं क्लृप्तलोभाम्बुशोषम् ।
विहतविषमरोषं त्वां तमोब्जप्रदोषं,
प्रणमत उरुतोषं पार्श्व ! मे देहि जोषम् ॥ १४

त्रिभुवननदहंसं लोकलक्ष्मीवतंसं,
विधुतरतरिरंसं प्राप्तविश्वप्रशंसम् ।

विपुलविलसदंसं त्वामघं जघ्निवांसं,
प्रकुरु दहशिवांसं मां शिवं प्रेयिवांसम् ॥ १५

जगति शिवसहायं क्षिप्तमिथ्यावसायं,
स्तुवदसुरनिकायं नीरजो रोगकायम् ।
स्वतिशयसमुदायं त्वां स्तुवानं विमायं,
जिन ! निहतकषायं मां कृषीष्ठाः व्यपायम् ॥ १६

इति सकलदिक्कान्ताकर्णोत्पलीकृतविस्फुरत्,
फणिफणमणिद्योतं पार्श्वं जिनं य इह स्तुयात् ।
पदमपदवीगामी स्वामी सुराधिपसम्पदः,
स खलु निखिलेन स्याल्लोकेश्वरा जिनवल्लभः ॥ (हरिणी) १७

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ३४. ॥ श्रीस्तम्भन-पार्श्वनाथस्तोत्रम् ॥

(चित्रकाव्यात्मकम्)

(अनुष्टुप्)

शक्ति-शूलेषु-मुसल-हल-वज्रासि-चापिना ।
स्तुवे चक्रेण चित्रेण श्रीपार्श्वं स्तम्भनस्थितम् ॥ १

नमल्लोकतटेर्भावे बन्धो वृजिन वामन ।
नमस्ते भवभीदम्भा-रम्भाय नयनक्षम ॥ (शक्तिः) २

नरौघः स्थिरसंलाभ-काङ्क्षी जिन ! जितश्रम ! ।
मदनो नो दमस्थाद दद्यादस्तममस्तव ॥ (शूलम्) ३

नश्यन्ति तत्क्षणादेव स्मृत्या तव ततस्तव ।
वधपापादपापास्तः सद्बो वचननिश्चितम् ॥ (शरः) ४

नयनः पार्श्वं भवभी सम्बाधाल्लघुशाश्वतम् ।
तन्द्रालूनभवावासं भीमभक्त्याजिसाहस ॥ (मुसलम्) ५

न स पार्श्व ! भवारातेः कृतेः क्षोभं स साध्वस ।
समेति यः करोत्यन्त-स्थां सत्कुल सुशीलज ! ॥ (हलम्) ६

नन्दन वचसाऽमास्तं ध्वस्तासुगगत व्रज ।
जगत्तवागमासारो-द्भूतमज्जज्जनं जिन ! ॥ (वज्रम्) ७

नमस्कारस्तवाक्षोभ य नाभालि सनृनिन ।
नमेन्द्रराजवाजय-त्यनल्पनयजल्पक ! ॥ (प्रावासहासि) ८

नमन्ति जिन ! भावेन शक्राली मलनाशक ! ।
कल्याणेषु सदा सर्वा समुत्थे मान्यशासन ॥ (धनुः) ९

मदनमदस्तवदनं भक्त्या, सकलजगज्जनजनकसमान ।
जिनवल्लभगणिमव भवभीतेः,
स्तम्भनकस्थितपार्श्ववर ! जिन ! ॥ १०

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ३५. ॥ श्रीस्तम्भन-पार्श्वनाथ-स्तोत्रम् ॥

(चक्राष्टकम्)

(शार्दूलविक्रीडितम्)

चक्रे यस्य नतिः सदा किल सुरैः दृष्टा प्रभावं क्रमै-
रत्नाम्भी....मनुद्यमेन लघु यः शक्रालिरानर्च्चं यम् ।
यद्वाल्लभ्यमकर्मशर्मलयदं बन्धन्नृराजौ स्तुतं,
तं भक्त्या बत वीरमक्षयरमामैत्रीं नयन्तं नतम् ॥ १

भक्त्याकृष्ट-सदेवदानवनरा गर्ह्यप्रवादोज्झिता,
दिष्ट्यान्तस्मरभिन्नसम्भवदराणि प्रेक्ष्यभीजिन्नवा ।

लग्ना मर्दितलोभवारिवसुधानाथाश्वसेनस्वज-
ज्जाड्याः.........पार्श्व लघु मे तायी स वामात्मजः ॥ २

प्रध्वस्तो इत जिह्मदित्नमलयोत्फुल्लत्कुवीवल्लरिं,
विन्नेहं वचनक्रमोद्यमवतां लाभे शिवस्योद्यतम् ।
तद्वादेभ न वन्द्यमुक्तमसमज्ञानक्षमाचेतसां,
संस्तौमि प्रयतो विभुं स्तुतमितैरिन्द्रैरमन्द्रैनसम् ॥ ३

विश्वाल्लभ्यकवर्ण्यमत्र न भुवि भ्राजिष्णुता वस्तु मे,
शस्या भक्तिरकारणं जनततेर्वा नन्दिनी मित्रता ।
सुध्वस्तप्रसरद्विपद्धनपरो देवस्त्वमामन्त्रितः ।
त्वं मां शाधि जिनेश ! पार्श्व ! सुधियां मेधालतामध्यतः ॥ ४

त्वत्पादोमपि वज्रबन्धुरधियो रोग....कृतो,
भव्यानापुरमर्द्धमीयुरसमश्रीभक्तिरोचिष्णुताम् ।
कर्माणि प्रविजित्य चाजरपदे त्वत्तस्त्वतो रम्यतं,
तं....र्वि त्वरितो भवान्तकरणे तोषात्कृता हस्ततम् ॥ ५

.....कृत्य सदेवमानवसुरा गर्हा विषादोद्भवद्-
भक्त्या तद्भवसोल्लसद् दवदराणि क्लेशभाजि त्वसौ ।
यन्नामस्मरणं भजन्ति बहुधा नाथं तमेनस्त्यजं,
जन्तूनां लघुमोक्षदं श्रय जिनं वामाश्वसेनाङ्गजम् ॥ ६

सज्ज्ञानप्रसरप्रबोधितजनं स्वीमित्रलाभप्रदं,
प्रज्ञावद्वरचित्रचर्चिततमोवादं कुधीविद्विषम् ।
शश्वल्लज्जिततत्त्वपण्डितमुनिभ्राजिष्णुपादासनद्,
नन्द्युल्लासकरं प्रयामि शरणं दम्भष्णुषं श्रीजिनम् ॥ ७

भद्राणि प्रवियोजितान्यमुभवाल्लग्नोस्म्यसारक्रमे,
शब्दो नापि शुभो नवा तनुमुखं भक्तं स्वराज्यान्विताम् ।
दृष्टिं दो.....वदेव मामनुततो गच्छस्वमेतत्पदे,
देहे स्तम्भनकेश ! पार्श्व ! दृभ शं मे स्वे हितान्तं वदे ॥ ८

पू.आ.श्री जिनचन्द्रसूरिविरचितम्

## ३६. ॥ श्रीपार्श्वनाथस्तवनम् ॥

पदद्वयासक्तनखप्रभूता, अभीषवो यस्य परिप्रभूताः ।
ऊर्द्ध्वं प्रयान्ति प्रतिभासमानाः,
सूर्यस्य जेतुं प्रतिभा-समानाः ॥ (उपजाति) १

वीर्यादिहार्यादितमन्युनेव, रक्ता नितान्तं खलु मन्युनेव ।
अयं जनं तापयति प्रमोदा-
दस्मत्सु सत्सु प्रभु(शः)षः प्रमोदात् ॥ (उपजाति) २

पदद्वयं यस्य विभाति कामं, सरोजसम्भारमिव प्रकामम् ।
सुरेन्द्रनागेन्द्रकृतप्रणामं, स्तवीमि पार्श्वं सुगुणाभिरामम् ॥ ३
(उपेन्द्रवज्रा)

मुदे सोऽस्तु पार्श्वो जिनो मे विशालः,
सदा योऽष्टदेहोऽभवच्छर्मकालः ।
अहेर्न(?र) ग्रभूतस्य सप्तास्य चूडा-
मणिर्बिम्बतोऽष्टप्रकर्मच्छिदे हि ॥ (भुजङ्गप्रयात) ४

स्वच्छः श्रीशशिगच्छमण्डनमणिर्गाम्भीर्यधैर्योदधिः,
श्रीमच्छ्रीजिनपूर्वको गुणनिधिर्माणिक्यसूरिर्गुरुः ।

शिष्यश्रीजिनचन्द्रसूरिभिरिति सम्यक् स्तुतो भक्तितः
श्रीपार्श्वः प्रददातु निर्मलफलं त्रैलोक्यचूडामणिः ॥(शा.वि.)५

पू.आ.श्री जयकीर्तिसूरिविरचितम्

## ३७. ॥ श्रीजीरावलापार्श्वनाथस्तवनम् ॥

(उपजाति)

कल्याणकल्पद्रुमभद्रसालं सौभाग्यसत्कीर शु(सु)भद्रसालम् ।
जीराउलिस्थानसरोमरालं पार्श्वप्रभुं नौमि गुणैर्विशालम् ॥ १

न वासवैर्वास्तवसंस्तवैर्भवा
शक्येत संस्तोतुमहन्तु किं स्तुवै(वे) ।
गन्तुं नभोऽन्तं न बलं नभोमणे-
स्तल्लङ्घने कीटमणेः कथा वृथा ॥ २

भनक्ति ते भक्तिरशं(सं) दिवानिशं सेवारसं तेन जनो न मुञ्चति।
न वञ्चति श्रीरपि तं तथावतं सुधारसैः सिञ्चति शासनेश्वरी ॥३

गणागुणानां गणनां न यान्ति तवेश लेशग्रहणेऽपि तेषाम् ।
दुःखक्षयः स्यान्न सुधोदधेः किं पानेन बिन्दोरपि निर्विषत्वम्॥४

इलातले व्योमतले रसातलेऽखिलैः
खलैर्न सा स स्खलिता तव प्रभा ।
खद्योतपोतैः प्रचुरैरपि प्रभो ! न हन्यते व्योममणेर्महन्महः ॥५

दृशां सहस्रैः परिवीक्षणीयं गिरां सहस्रैः परिकीर्त्तनीयम् ।
सहस्रपत्रैः परिपूजनीयं सहस्रभावैः परिचिन्तनीयम् ॥ ६

(उपेन्द्रवज्रा)

सहस्त्रशाखासमसामगेयं सहस्त्रनेत्राद्भुतभागधेयम् ।
सहस्त्रसंख्यातिगनामधेयं सहस्त्रसंख्यातिशयैरजेयम् ॥ ७
(उपेन्द्रवज्रा)

सहस्त्ररश्मेरधिकप्रतापं स्फ(स्फु)टासहस्त्रैः स्फुटमस्ततापम् ।
जनुः सहस्त्रैर्बहुभिर्दुरापं श्रेयः सहस्त्रैस्तु भवन्तमापम् ॥ ८
(उपेन्द्रवज्रा) (त्रिभिर्वि.)

त्वन्नाममन्त्राक्षरजापलीनाः प्रलीनपापा न भवन्ति दीनाः ।
जनारुजाभिर्जिन ! नैव जीनाः स्युः प्रत्युत स्पष्टतया नवीनाः ॥९

यन्त्राश्च मन्त्रा मणयो महौषधी गणास्तथाराधितदैवतव्रजाः ।
समीहितं पूरयितुं न सर्वतः शक्ताः स्वभक्तेषु यथा त्वमीश्वरः॥१०

तावज्जरा दुःखभरा रुजा स्युस्तव स्मृतिर्यावदुदेति नान्तः ।
तावत्तमो यावदुदग्रतेजा हेलिर्न पूर्वाचलमौलिमेति ॥ ११

न क्लेशलेशः किल ते जिनेश ! ध्यातुः प्रदेशाक्रमणं करोति ।
सुपर्णपक्षस्थजनं भुजङ्गो न द्रष्टुमीष्टेऽप्यति दुष्टदृष्टिः ॥ १२

कलौ किलौजस्तव केनमेय ममेय माहात्म्य महात्मनापि ।
मध्ये गृहं नाथ ! नभः समस्तमानेतुमीशः क्वचनापि कोऽपि॥१३

लोकाग्रसंस्थेऽपि भवत्यधीश ! तव त्रिलोक्यां महिमा न माति।
पूर्वाद्रिशृङ्गाग्रजुषित्विषीशे सर्वत्र विस्फूर्जति तत्प्रभोर्म्मिः ॥१४

पद्मावतीयुग् धरणोरुगेन्द्रः प्रकृष्टनागाष्टकुलाधिनाथः ।
गतान् दिगन्तेऽपि तवैकभक्तान् सर्वे हितार्थैः कुरुते कृतार्थान्॥१५

त्वन्नाम सारस्वतसिद्धविद्यया
कला कलापाः सकला कलावपि ।

स्फुरन्ति भानोः प्रभया प्रगे प्रभो !
पद्मान्यवश्यं विकसन्ति हि क्षणात् ॥ १६

मातापिताबन्धुसुहृत्सुरासुरा न हीश्वरा मोचयितुं भवारितः ।
निवारितक्लेश जिनेश ! पेशलोपदेशलेशस्तव मोक्षणक्षमः ॥१७

स्वर्गान्निसर्गाद्विगतोपसर्गान्निरर्गलानन्दसुखोऽपवर्गः ।
त्रिवर्गमार्गादपरोऽस्य द्रुगमार्गस्तवाभूत्सुगमः सुलम्भः ॥ १८

कलङ्कलङ्कैरकलङ्कितं कुलं बलं बलारेर्विदधत् कुतूहलम् ।
चेतश्च गङ्गाजलतः समुज्ज्वलं
तवैव भक्तेरिति निस्तुलं फलम् ॥ १९

पीयूषमिश्रा अतमस्तमिश्रा(स्त्रा) घस्त्रा अजस्त्रं तव भक्तिभाजां ।
भवन्ति सिद्धाञ्जनदृग् जनानां
निधानलाभात् सुखदा सदा श्रीः ॥ २०

ये सर्वभावावगमं त्वदागमं शृण्वन्ति वृण्वन्ति हितान्महाश्रियः।
नष्टेऽपि कर्माणि तदात्मनो जिना
वृण्वन्ति अण्वन्ति मतां व्रजन्ति च ॥ (इन्द्रवंशा) २१

घोरोरगव्याघ्रतरक्षुमुख्य दुःस्वापदाकीर्णमरण्यमीश ! ।
भवद्विवाहोत्सवसाधुसौधं भवेद्भवद्ध्यानजुषां जनानाम् ॥२२

न प्रेतभूतोऽग्रपिशाचशाकिनी सुख्या असौख्याय तवेश ! संस्मृतेः।
दुष्टा अपि प्रत्युत तत्त्व ते प्रियं महारसे संवलितं विषं सुधा ॥२३

तवेश ! सिद्धान्तसुधारसं ये पिबन्ति तेषामजरामरत्वम् ।
न दुर्लभं सिद्धरसप्रयोगा-
दयोऽपि सम्यक् कनकं न किं स्यात् ॥ २४

अनंतकालेन निगोदमध्यान्निर्गत्य गत्यन्तरयोनिकोटौ ।
भ्रमं भ्रमं भूरि भवश्रमेण
भग्नो विलग्नोऽस्मि तवाङ्घ्रियुग्मे ॥ २५

तवोपलब्ध्या विकलाः कलां परां मन्वन्ति मन्वन्तरकोटिभिर्न हि।
प्रदीपरत्नौषधितारकेन्दुभिः सर्वैर्विनार्कं न दिनस्य दर्शनम् ॥२६

तपोऽतितप्तं नितरां च जप्तं क्षिप्तं वपुः कष्टकरक्रियाभिः ।
मनोऽपि गुप्तं विहितं हितायाऽधुनैव जातं सफलं तवाप्तौ ॥२७

अनन्तजन्मार्जितकर्मसञ्चयं त्वद्ध्यानमेव क्षणुते क्षणादपि ।
निःपाप (निष्पाप) निर्वापयितुं महावनोद्-
भवान्दवान् पुष्करवारिदः प्रभुः ॥ २८

न सप्त सप्तौ न च तच्छशाङ्के नक्षत्रवर्गेन न तारकौघे ।
न सप्तजिह्वे न च रत्नराशौ यत्केवलज्योतिरिह त्वयीशे ॥ २९

भवन्तमन्तः स्मरतां स्फुरन्ति संविद्विशेषाः स्वयमप्यशेषाः ।
तेभ्यस्ततस्ते परमस्वरूपं ज्ञास्यन्त्यवाप्स्यन्ति महोदयं च ॥३०

किं स्वर्गवीरत्नतरूपमानमज्ञानभावाद्वदते जडास्ते ।
एकान्तशुद्धान्तररङ्गरक्ते भक्ते तव स्यादुपमेदमी(नी)या ॥ ३१

अनन्त-संवित्सुखशक्तिदर्शनोर्जितं जितारिं जगतामधीश्वरम् ।
त्वमेव देवं शरणं श्रितोस्मि तद्-
विधेहि वात्सल्यमतुल्यमङ्गलम् ॥ (वंशस्थ) ३२

एवं दैवतवृन्दवन्दितपदाम्भोजः प्रजाप्यायकः
श्रीजीराउलि जीवनं जिनवरः श्रीपार्श्वविश्वाधिपः ।
भक्त्या श्रीजयकीर्त्तिसूरिगुरुभिर्नूतः प्रभूतप्रभः
पूतात्मा तनुतां सतामभिमता कल्याणकोटीश्चिरम् ॥(शा.वि.)३३

श्रीमदञ्चलगच्छियश्रीजयकीर्तिसूरिविरचितम्

## ३८. ॥ श्रीजीराउलापार्श्वनाथस्तवनम् ॥

(उपजाति)

सुरासुरस्वामिसमूहसेव्यं सर्वार्थसर्वातिशयैः समृद्धम् ।
श्रीपार्श्वविश्वेश्वरमश्वसेनकुलप्रदीपं प्रयतः प्रणौमि ॥ १

न द्योपतिर्न द्युपतिर्न गीःपतिर्गुणस्तवाय प्रभविष्णवस्तव ।
क्वाहं स्तुतौ ते कृशधीरधीश्वरो
भक्तौ परं प्रेरयते करोमि किम् ॥ २

दौर्गत्यदावोदकवाहबाहुदं तेयगेयप्रणतादितेय ।
अजेयमोहस्य बलं जयेयमजेयमहस्तव संस्तवेन ॥ ३

यथातथं नाथ ! तव स्वरूपं केनानुरूपं परमात्मरूपम् ।
अरूपकारोपणविश्वरूप रूपाभिरूपैरपि किं न्यरूपि ॥ ४

नमो नमो मोहतमोनभोमणे ! नमो नमो विश्वविदां शिरोमणे !,
नमो नमो दानलसद्द्युसन्मणे !
नमो नमः सौम्यकलामुधाघृणे ! ॥ ५

नमो नमः संसृतिसिन्धुसेतवे, नमो नमो लोकमहौककेतवे ।
नमोनमो विश्वहितैकहेतवे नमो नमो मारमहारिकेतवे ॥ ६

नमो नमो लब्धमहासमृद्धये नमो नमः सिद्धमहाष्टसिद्धये ।
नमो नमो दर्शिततत्त्वबुद्धये नमो नमो ध्यानकृतात्मशुद्धये ॥७

अमेयमाहात्म्यगुणप्रमेयवामेय को नाम तवोपमेयः ।
विशालरूपोपमया मया किं निरूप्यते नाथ ! नभोनुरूपम् ॥८

अनश्वरी स्फूर्जति पारमेश्वरी श्रेयस्करी सौख्यकरी यशस्करी ।
प्रतापपृश्निस्तमसामवावरी
यया क्षयं याति रुजा विभावरी ॥ ९

विभावरी योऽतिशयस्य ते जगद्विभो ! नभोरत्नरुचां विजित्वरी।
दुःखान्धकारं सकलं जगत्त्रये
त्वद्भक्तिभाजां हरते क्षणादपि ॥ १०

तमोदरीः किं सुरसुन्दरी हृदा दरीदरीति क्व दरीदरीत्यरेः ।
दरीदरीत्येव दुरन्तदुःकृतं त्वत्सेवकः सिद्धिवशारसादरी ॥११

यः सादरीभूय विधूतवासनान्तरं तरण्डं तरणाय तत्परः ।
भवी भवन्तं भजते भवार्णवे
स प्राप्स्यति स्वेप्सितमर्थमद्भुतम् ॥ १२

कुवासनावासितचित्तवृत्तेर्मतिर्न वर्तेत तवोक्ततत्त्वे ।
यः प्रह्वजिह्वोऽम्लरसाय तस्य
किं कामधेनोः पयसि प्रवृत्तिः ॥ १३

भवन् महाभावनयैव भावितो
विभोऽन्तरात्मा परमात्मतां भजेत् ।
स्पर्शाऽश्मनः स्पर्शमतीव भेदिनं
लब्ध्वैव लोहं कनकात्मतां व्रजेत् ॥ १४

अन्तर्मुखानां सुगतोपलब्धिस्तव प्रभो ! नैव बहिर्मुखानाम् ।
पातालजातं मधुसिद्धये स्यात्
सिद्धाञ्जनस्येह बहिर्भवं न ॥ १५

बुधाः प्रबोधावसरे सुरेश्वरा-
र्हितार्हतास्त्वद्गदितागमक्रियाम् ।
कुर्वन्ति गुर्वन्तिकमेत्य येऽ निशं
तेषां शिवस्यापि सुखं शयस्थितम् ॥ १६

कदागमाः कर्मगदाऽपहा नो त्वदागमा एव हि तान् हरन्ति ।
सिद्धिं सुवर्णस्य महारसस्य सञ्जायते नाथ ! न धूर्त्ततन्त्रैः ॥१७

मायामहादोषगणेन जातुचित्
त्वच्छासनं प्राप्य जनो न बाध्यते ।
तमातमिश्रैः परिभूयते तमा
महर्म्मणेर्म्मण्डलमाश्रितः क्व किम् ॥ १८

इन्द्राश्चतुःषष्टिरभीष्टविद्यादेव्यस्तथा षोडशशासनस्य ।
रक्षाकृतो द्विर्जिनदेवदेव्यो
विद्या निकायाः किल षोडशापि ॥ १९

दिक्पालकाश्चैव दशापि रुद्रा एकादश द्वादश भानवोऽपि ।
अन्येऽपि लोकत्रितयादितेयास्-
त्वत्सेवया सन्तु शिवाय सर्वे ॥ २०

वेदत्रयी मन्त्रमयी हितायै देवत्रयी शक्तिमयी हितायै ।
लोकत्रयी सर्वमयी हितायै त्वत्तः स्पृहाका परदेवतायै ॥ २१

वेदान्तसिद्धान्तपुराणवेदस्मृतिप्रमाणागमकल्पशास्त्रैः ।
यद् बुध्यते तत् स्वयमेव तत्त्वं
त्वन्नामजापात् स्फुटतामुपैति ॥ २२

रुजा न जातु व्यथते शुभे पथे
भवत् पथे सञ्चरतां सतां ध्रुवम् ।
सुपर्णपक्षो परिचारिणां नृणां
दर्वीकरः किं दशनाय शक्तिमान् ॥ २३

आस्तां भवन्नाम तवेश ! तीर्थस्थानादिवर्णं जगतोऽपि वर्णान् ।
क्षणं न मुञ्चन्ति मुखात् क्षितीशाः
प्रमोदते ते न जनोऽखिलोऽपि ॥ २४

संसारकान्तारविहारपारतः पुरः परं श्रीपुरमीशशासनम् ।
भाग्यान्मयाप्तं भवतोऽकुतोभयं
यत्सन्निधौ सिद्धिपुरं परात्परम् ॥ २५

न्यस्तानि शस्तानि तवैकभक्तौ यैर्मक्षु चक्षुः प्रमुखानि खानि ।
सुखानि मोक्षाभिमुखानि यानि निरीहतानीह भवन्ति तेषाम्॥२६

मन्वन्ति नन्वन्तरिता मतान्तरैर्हहा महामोहतमोभिरावृताः ।
न त्वां महानन्दपथैकदेशिनं
ज्ञास्यन्ति तन्मार्गमहो कथं जडाः ॥ २७

अनन्यसामान्यगुणेन पौनःपुन्येन पुण्येन पुराकृतेन ।
त्वच्छाशनं कर्म्ममहागदानां रसायनं शुद्धतमं मयाप्तम् ॥ २८

त्वयि प्रभावोद्भववैभवे भवे भवे भवेयं भुवनेश ! भक्तिभाक्।
त्वद्भक्तिरत्यन्तगुणैर्युनक्ति यद्
भवन्ति ते मुक्ति-रमानुरक्तये ॥ २९

पारं गुणा यान्ति न वर्णनैर्घनैर्भक्तिर्न पारं त्वयि याति मामकी ।
तेनैव पारं भववारिधेरहं
लप्स्येथ लिप्स्ये न हि कर्म्मकश्मलैः ॥ ३०

न कामकुम्भे न तदस्ति दक्षिणा-
वर्त्तेऽपि शङ्खे न च कृष्णचित्रके ।
छायातरौ नो न सुवर्णपूरुषे
यत् पौरुषं वाञ्छितपूर्त्तये त्वयि ॥ ३१

ध्यानं त्रिसन्ध्यं सुकृतैरवन्ध्यं श्रद्धा समृद्धा भवतः प्रबुद्धाः ।
वितन्वते येन नु मन्वते ते
सम्यक् चिदानन्दपथं यथास्थम् ॥ ३२

एवं नवोल्लासविलासभासुरैः स्तुतो गुरुश्रीजयकीर्त्तिसूरिभिः ।
ददातु जीराउलिमण्डनं जिनः
श्रीपार्श्वदेवः शिवसम्पदः सताम् ॥ ३३

पू.आ.श्री जयसिंहसूरिविरचितम्

## ३९. ॥ श्रीजीराउलीपार्श्वनाथस्तोत्रम् ॥

(मालिनी)

प्रणमदमरमौलिस्मेरकोटिरकोटि-
प्रसृमरकिरणौघोन्निद्रपादारविन्दम् ।
विधुरविविधबाधाम्भोभि(धि)तीराभजीरा-
वलिनिलयमहं तं स्तौमि वामातनूजम् ॥ १

असमचरमवादर्धे–र्वारिलेशान्शेषा
नपि गणयितुमीष्टे स्पष्टदृब्धाग्रणीर्यः ।
घटयति पटिमानं सोपि मानं ननेतुं
त्रिभुवनजननेतस्तत्प्रभावाननन्तान् ॥ २

तदपि किमपि भक्तिव्यक्तिरङ्गोत्ततरङ्गो
मुदुमतिरपि सोहं त्वत्प्रभावाद्व्यनज्मि ।
स्तुतिकृति हि समिद्धाश्राद्धते च प्रयोक्ति
जिननपुनर–बालोलत्तालवाचालधीत्वम् ॥ ३

अमृत–मनृत–भव प्राहुरब्धौ विधौ वा
चिर सलिलभावात् क्षीश्वमाणत्वतश्च ।
भवति तु तवदधीशत्वन्मुखाम्भोजवीक्षा–
विनिमेष–नयनः स्याद्यन्निपाताज्जनोऽयम् ॥ ४

प्रथयति स्तानवं मानवन्ध्य...
प्रसरति रतिकर्त्री स्फूर्तिरूच्यैस्तु काचिन् ।
प्रकृतिरियमुदात्तास्तेऽथवोद्दामधाम्नी–
लघुयदरुणबिम्बं व्यासविश्वातदर्चीः ॥ ५

सविधमपि विदग्धास्तीर्थसार्थं विधूय
प्रणतहितकरं त्वां विप्रकृष्टं प्रमोदात् ।
विपुलपुलकभाजो नन्तुमायाति के वा
जिनवर ! न भजन्ते दूरतोप्यात्मनीनम् ॥ ६

अपि सकलकलोऽसौ केवलं रात्रिमिन्दु–
रपि पतिरपि भानुर्द्युस्त्रमेवव्यनक्ति ।

वमिहतदतिशायिप्रातिभाभविष्णुस् -
तदुभयमपि नश्यद्भङ्गभीति व्यनक्षि ॥ ७

करतलपरिखेलन्निस्तुषाशेषसिद्धौ
स्फुरति रतिकरेऽस्मिंस्तावके नाममन्त्रे ।
भवति सुरसुरभ्या कामकुम्भेन किं भोः
सृतमनिमिषरत्नेनास्ति कल्पांह्रिपेन ॥ ८

शठकमठहठोद्यद्वार्दधारालवृष्टिः
कथमिव भगवन्तं त्वामुपद्रोतुमीष्टाम् ।
हृदि भवदभिधान.....सन्धानभाजां
प्रभवति न भवोऽपि प्रोल्लसद्भूरिभीतिः ॥ ९

लसति जगदधीश ! स्फारकर्पूरसार
स्फुरितपरिमलश्रीखण्डपाण्डुस्तनुस्ते
हृदुदितबहिराग(पु)ण्यकारुण्यदुग्धो-
दधिबहुलहरीभिः सर्वतः सङ्गतेव ॥ १०

प्रसृमरवररोचिर्वीचिनि श्रीनिवासे
सजलजलदवर्णत्वच्छरीरार्णवान्तः ।
फणिफणमणिभासो बालहेलिप्रकाशा-
दधति विधुरबाधो विद्रुमव्यूहसाम्यम् ॥ ११

ज्वरजठरविकारश्वासकासारिमारि-
ज्वलनजलभुजङ्गव्यालवेतालमुख्यम् ।
मृगपतिमपदम्भप्रौढकुम्भीद्रवत्त्व-
त्क्रमकमलनिविष्टं हन्तुमीष्टेन कष्टम् ॥ १२

हृतवतिदिवि सद्दैकामगव्याङ्गा तायां
गतवति सुररत्ने सिद्धवृन्दे प्रलीने ।
कवलि(त)वति काले सर्वमस्मिन् कराले
जगदभिमतकर्ता वर्तसे त्वं जिनैकः ॥ १३

कलयसि मम चित्तं त्वं यदि स्वैकतानं
कुरु सकृपतदा द्राक् तन्निजां राजधानी ।
त्वयि वसति तदन्तः सन्ततं कल्पवृक्षे
क्षपित-सकलदुःखे किं मया लम्भिनैव ॥ १४

प्रभवति हृदि यादृक्द्यूतकारस्य दाये
वसुनि गतधनस्य स्त्रीगणे कामुकस्य ।
कवितुरपिकवित्त्वे योगिनश्चात्मतत्त्वे
तव पदकमले मेघान्नबन्धोस्तु तादृक् ॥ १५

चकास्ति कुशलावली (ख)लनवेश्मजीरावली
महीवलयमण्डनस्त्रिजगती विपत्खण्डनः ।
य एष भुवनप्रभुः स जयसिंहसूरिस्तुतो
ददातु परमं पदं सपदि पार्श्वनाथो जिनः ॥ (पृथ्वी)१६

(अशुद्धं सम्भवति)

पू.आ.श्री जिनभद्रसूरिप्रणीतम्

षट्पत्तनमण्डन-

# ४०. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(आर्या)

षट्पत्तनपुटभेदनमण्डनमभिनौमि पार्श्वजिनमेनम् ।
सिंहासनमासीनं सातिशयं नीलकान्तिघनम् ॥ १

यः पञ्चविघ्नहास्यादिषट्कमिथ्यात्वविरतिचिदभावान् ।
निद्रां कामं रागद्वेषौ च निहत्य निरपायः ॥ २

जीवाजीवादिपदार्थसार्थनिर्भासकं निरावरणम् ।
सकलं केवलमतुलं प्राप्याभूत् सर्ववेदी यः ॥ ३

वचनातिशयैः पञ्चत्रिंशतालङ्कृतं य इह वचनम् ।
साष्टगुणं द्वात्रिंशद्दोषैर्विकलं कलं वदति ॥ ४

सेन्द्राः सुरा भुवनपा ज्योतिष्का व्यन्तराः सपरिवाराः ।
सव्यापाराः साराः सेवन्ते यच्चरणकमलम् ॥ ५

मूलातिशया एते चत्वारो यस्य जगति राजन्ते ।
अपरेऽपि चतुस्त्रिंशत् सङ्ख्याः ख्याता सकललोके ॥ ६

चत्वारः सहजाता एकादशघातिकर्मघातोत्थाः ।
एकोनविंशतिरथो देवकृताश्चेति सर्वेऽपि ॥ ७

इत्थं श्रीअश्वसेनान्वयजलधिसमुल्लासचन्द्रोपमानः
प्रोद्यन्मोहान्धकारप्रशमनविधये सूर्यतुल्योपमानः ।
नूतः सर्वाद्भुतेनातिशयगुणगणेनेह पाश्वर्वो जिनेन्द्रः
सम्पत्तिं वस्तुनोतु प्रसृमरजिनभद्रानुगां सोऽस्तन्द्रः ॥ ८

(स्रग्धरा)

पू.आ.श्रीजिनसमुद्रसूरिसन्दृब्धम्

जेसलमेरुमण्डन-

# ४१. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(वसन्ततिलका)

आनन्दभन्दवनपल्लवने वसन्तं
चित्ते सतां शिवपदे च सदा वसन्तम् ।
विश्वोपकारिवरवैभवलाभवन्तं
श्रीपार्श्वदेव ! विनुवामि मुदा भवन्तम् ॥ १

संसारसागरतरण्ड ! करण्ड ! सम्यग्
ज्ञानादिरत्ननिचयस्य जगद्वयस्य ! ।
वामेय ! विश्वजनगेय ! गुणैरमेय !
त्वं गीःपतेरपि गिरां न हि गोचरोऽसि ॥ २

त्वया यदर्धज्वलितस्य तस्य कृतः पुरा कोऽपि महोपकारः ।
अपि द्विजिह्वो द्विसहस्रजिह्वो बभूव संस्तोतुमिवेनमेव ॥ ३

(उपेन्द्रवज्रा)

यत्ते व्यधायि कमठेन कठोरघोरधाराकरालजलवृष्टिरिहोपरिष्टात्।
तेनैष केवलमवीवृधदात्मनो वै
दुःकर्मवल्लिवनमेव चिरप्ररूढम् ॥ ४

स्फूर्जत्फणामणिधरं धरणं भजन्तं
यच्चापि पातकमठं कमठं द्विषन्तम् ।
त्वं मन्यसे सदृशमीदृशमीश ! लोके
नीरागताविलसितं लसितं तवैव ॥ ५

दोषावसानोदितकेवलश्रीकलाकलापाप्रतिपातिरूपः ।
नीरूप्यसे कश्चन देव ! धन्येर्दिनोदयेऽपि त्वमपूर्वचन्द्रः ॥ ६

त्वन्नाम वामाङ्गज ! ये जपन्ति नश्यन्ति दूरं दुरितानि तेभ्यः ।
कुर्वन्ति ये गारुडमन्त्रजापं बाध्यन्त एवाहिविषैः कथं ते ? ॥७

य एव निध्यायति मानसस्थमन्तर्दृशा त्वां जिनराजहंसम् ।
स एव साक्षात्कुरुते समग्रं लीलायितं सद्‌गतिसम्पदस्ते ॥ ८

जगन्मतं त्वन्मतमत्र येषां न सम्मतं हन्त हताशयानाम् ।
प्रभातविद् घूकविहङ्गमानां हि केवलालोकबहिःस्थितास्ते ॥९

क्षुद्राशयैः कैश्चिदनाश्रितस्याप्यादेयता देव ! न हीयते ते ।
किं मक्षिकोपेक्षितचन्दनस्य प्रयाति सौरभ्यगुणः कदापि ? ॥१०

जगद् गुरो ! गौरवमेव तत् ते कुदृष्टिभिर्न प्रतिपद्यसे यत् ।
न येन तेनाभरणीकृतस्य महार्घताऽपैति महामणेः किम् ॥११

कुदृष्टिरागग्रहिला वराका ये त्वां जगन्मित्रममित्रयन्ति ।
ते कल्पवृक्षं विषवृक्षयन्ति चिन्तामणिं कर्करयन्ति मूढाः ॥१२

त्वदास्यलावण्यवरेण्यलक्ष्मीं निरीक्ष्य नेत्राणि समुल्लसन्ति ।
हर्षप्रकर्षेण सदृष्टिभाजां चकोरकाणामिव चन्द्रलेखाम् ॥ १३

त्वत्पादसेवारसिकं मनो मे नाऽन्यत्र तोषं लभते हरादौ ।
विहाय वा मञ्जरिमञ्जुमाम्रं
किं कोकिलः क्रीडति कर्णिकारे ? ॥ (वंशस्थ) १४

निशम्य कर्णामृतमर्हतो वचो न रोचते मे कुवचः कुतीर्थिनाम् ।
निपीय को वा मधुरं गवीपयः
पिपासति क्षीरमिहार्कशाखिनः ॥ १५

अर्शोऽङ्कुरक्षयभगन्दरदुष्टकुष्टमुख्या
रुजः क्षयमयन्ति तव प्रसादात् ।
सर्पन्ति सर्पनिवहा भुवि तावदेव
यावन्न हि स्फुरति गारुडपक्षवातः ॥ १६

शार्दूलपन्नगमतङ्गजचौरमुख्याः
स्वाध्यायतो नहि पराभवितुं क्षमन्ते ।
किं कान्तिमन्मणिशशिप्रमुखान् पदार्थान्
व्याप्नोति सान्द्रमपि सन्तमसं कदाचित् ? ॥ १७

भयङ्करव्यन्तरभूतशाकिनी पिशाचवैतालकरालरक्षसाम् ।
भयानि नश्यन्ति तव स्मृतेर्नृणां
यथैणयूथानि मृगेन्द्रहुङ्कृतेः ॥ १८

धन्यास्त्रिसन्ध्यमपि केचन भक्तिभाज-
स्त्वां पूजयन्ति विधिवद् विविधप्रकारः ।
द्रव्यार्चयापि परमेश्वर ! पूजितस्त्वं
भव्यात्मनां भवसि भावसमाधिहेतुः ॥ १९

विश्वातिशायिगुणमौक्तिकभद्रकुम्भ !
लोकश्रियः शिरसि शाश्वतभद्रकुम्भ ! ।
सद्ब्रह्ममुद्गरदलीकृतकामकुम्भ !
श्रीपार्श्वदेव ! जय कामितकामकुम्भ ! ॥ २०

नमः शमश्रीसुभगाय तुभ्यं नमः समस्ताङ्गिहिताय तुभ्यम् ।
नमः क्रमप्रह्वसुराय तुभ्यं नमस्तमःस्तोमहराय तुभ्यम् ॥ २१

आरोग्यदीधितिमनोरमता तदङ्गे
सौभाग्यभाग्यविजयाभ्युदयश्च तस्य ।

वाणी च तस्य वदने सदने च लक्ष्मीः
पार्श्वेश्वरस्य वरिवस्यति योऽङ्घ्रिपद्मम् ॥ २२

अद्याजगाम मम कामगवी नवीना
कल्पद्रुमोऽपि फलितो मिलितो ममाद्य ।
चिन्तामणिश्च मम पाणितले निलीनः
श्रीपार्श्वदेव ! तव संस्तवनानुभावात् ॥ २३

एवं श्रीपार्श्वजिनं श्रीमज्जिनचन्द्रसूरिगुरुशिष्यैः ।
श्रीजिनसमुद्रसूरिभिरभिष्टुतोऽभीष्टफलहेतुः ॥ (आर्या) २४

श्रीजेसलमेरुमहादुर्गे विधिचैत्यभूषणं भगवान् ।
श्रीविधिसङ्घाभ्युदयं दिशतु श्रेयःश्रियां सद्म ॥ (आर्या) २५

पू.आ.श्री जिनपतिसूरिविरचितम्

## ४२. ॥ श्रीचिन्तामणिपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

जगद्गुरुं जगद्देवं जगदानन्ददायकम् ।
जगद्वन्द्यं जगन्नाथं पार्श्वनाथं जिनं स्तुवं ॥ १

**न**रा ध्यायन्ति तत्वार्थ**मि**ह त्वां ज्ञानदीपकम् ।
**ऊ**र्ध्वमिन्द्रादयः सर्वे **न**मन्ति मुक्तयेऽनिशम् ॥ २

**पा**तालेऽनन्तनागाद्याः **सर्वे** वासुकितक्षकाः ।
**वि**तन्वन्ति सदा क्रीडां **सर्व**ज्ञ ! त्वत्प्रसादतः ॥ ३

**ह**रिरुद्रादयः स्वामिन् ! रमन्ते भुवनत्रये ।
**व**रदास्त्वत्प्रसादेन **सर्वे** ते विश्वनायक ! ॥ ४

हतारिं योगिनः सर्वे **जिन** ! त्वां जगदीश्वरम् ।
**नमन्ति** परमात्मानं **फुल्लप्रवरपङ्कजैः** ॥ ५

**लिङ्गैर्युक्ता** वियुक्ताश्च **गरीयस्तत्त्वसंज्ञकम्** ।
**ह्रीँ**रूपं हृदि पश्यन्ति **नमः** स्वाहादिभिः सह ॥ ६

श्रीमत्पङ्कजमध्यस्थं चञ्चन्नीलमणिप्रभम् ।
केवलज्ञानसम्पूर्णं ॐ ह्रीँ श्रीँ अर्हमन्वितम् ॥ ७

चतुर्भिरेभिरालीढं संस्मरेद् योगिनं जिनम् ।
शिरोवामभुजापाददक्षिणस्थितिषु क्रमात् ॥ ८

वामे पद्मावती देवी शासनोत्सवकारिणी ।
श्रीविभोः सर्वदा भक्तो धरणेन्द्रस्तु दक्षिणे ॥ ९

श्लोकपञ्चकपादाद्यैरक्षरै–रद्वितीय(तः)गैः ।
प्रोक्तस्तैर्मन्त्रराजोऽसौ परितोऽष्टदलस्थितः ॥ १०

रोहिणीप्रमुखा देव्यः षोडशाम्बुजसंस्थिताः ।
चतुर्विंशतिपत्रेषु जिनमातृः स्मरेत् सदा ॥ ११

त्रिधाम्बुजमायाबीजवेष्टिरेखात्रयाग्रतः ।
क्रौँकारस्थापिते वर्णे दिक्पालग्रहसंवृते ॥ १२

मन्त्राद्यबीजसंयुक्तान् जिनानङ्के प्रकल्पितान् ।
चतुरष्टदशद्व्यादिरूपान् कोणेषु तु द्विधा ॥ १३

एवं भूमण्डले ध्यायेत् सवज्रे चतुरस्रकैः ।
धरावर्णाङ्कितैर्दिक्षु विदिग्भागेषु लाञ्छितम् ॥ १४

इति चिन्तामणिर्नाम–चक्रं त्रैलोक्यपूजितम् ।
ज्ञानबीजं जगद्वन्द्यं सर्वतत्त्वैकनाय(म)कम् ॥ १५

मालतीनां सहस्रैस्तु पुष्पैर्द्वादशभिर्वरैः ।
विधिनाचाम्लभक्तस्थो मन्त्रराजेन योऽर्चयेत् ॥ १६

लेखिन्या हेमजात्या वा लिखित्वेदं सुगन्धिकैः ।
ताम्रेऽथ वहिकापट्टे भूर्जे गोरोचनादिकैः ॥ १७

तस्य सन्तुष्य प्रत्यक्षं पार्श्वनाथो जिनेश्वरः ।
दर्शयत्यात्मकं रूपं कामं दद्यात् समीहितम् ॥ १८

अथान्तरात्मशुद्ध्यर्थं प्रभुं ध्यायेच्चतुर्विधम् ।
पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ॥ १९

आदौ पवित्रमात्मानं शुद्धमत्यन्तनिर्मलम् ।
प्रोक्ताभिर्धारणाभिश्च पञ्चभिः पार्थिवादिभिः ॥ २०

क्षिपॐस्वाहेति पञ्चमहद्भूतैश्च तैरपि ।
साक्षाद्दिव्यमयं कृत्वा चतुर्धा ध्यानमभ्यसेत् ॥ २१

अब्जगर्भसमासीनमात्मानं तद्विभो(मन्तर्भू)रिव ।
तत्त्वोपलक्षितं ध्यायेत् तत् पिण्डस्थं प्रकीर्तितम् ॥ २२

ततोऽस्मिन्निश्चलाभ्यासाद् योगस्तन्मयतां गतः ।
मन्त्रराजं स्मरेद् वीरस्तत् पदस्थं च संस्मृतम् ॥ २३

संस्मरेन् मन्त्रराजस्य त्रिशुद्ध्याऽष्टोत्तरं शतम् ।
भुञ्जानोऽप्युपवासस्य प्राप्नोति तपसः फलम् ॥ २४

अमुमेव महामन्त्रं लक्षसङ्ख्यमिति स्मरन् ।
ध्यात्वा ज्ञानमवाप्नोति छित्त्वा कर्माष्टकल्मषम् ॥ २५

शनैर्मन्त्रगुणोद्भूतमात्मानं सिद्धरूपकम् ।
चिन्तयन् सर्वगं शान्तं सर्वज्योतिर्मयं शिवम् ॥ २६

सर्वावयवसम्पूर्णं सर्वलक्षणलक्षितम् ।
निष्पन्नं पुरुषाकारं रूपस्थं तद्बुधैर्मतम् ॥ २७

सर्वं विहाय सालम्बं ध्यानं ध्यायेच्च केवलम् ।
आत्मन्येव यदात्मानं तदा मुक्तिर्न चाऽन्यथा ॥ २८

ज्योतिर्मयं महाबीजममूर्तं परमेश्वरम् ।
सर्वात्मगं तमीशानमनन्तं विश्वव्यापिनम् ॥ २९

पश्यन्निति निरालम्बं परमात्मानमव्ययम् ।
शिवसौख्यगतश्चासौ रूपातीतं हि मन्यते ॥ ३०

इत्येवं मोक्षकल्पेन पार्श्वनाथः स्तुतो मया ।
स जिनः पातु मां देवः पतन्तं भवसागरे ॥ ३१

इति जिनपतिदिव्यस्तोत्रलक्षान्तरेण
परमपदनिमित्तं ज्ञानयोगस्वरूपम् ।
प्रकथितमिह नूनं पार्श्वनाथप्रसादात्
तदखिलमपि धीरैः सर्वदान्वेषणीयम् ॥ (मालिनी) ३२

पू.आ.श्री जिनदेवसूरिविरचितम्

## ४३. ॥ जीरावलीपार्श्वस्तवनम् ॥

वन्दारु वृन्दारकवृन्दवन्द्य-पादारविन्दं कलिकल्पवृक्षम् ।
जीरावलीभाललालामलीलं,
स्तवीमि भक्त्या जिनपार्श्वनाथम् ॥ (उप.) १

काले कलावप्यतुलप्रभाव-स्त्वं जीरकापल्लिवतंस ! पार्श्व ! ।
कल्पान्तकालेऽप्यविलङ्घ्यशक्ति-
रेको भवेत् किं न हि कूर्मराजः ॥ (इन्द्र.) २

हे ! जीरकापल्लिमनोज्ञवल्ली–वल्लीसमुल्लासवसन्तमास ।
विश्वत्रयीचिन्तितवस्तुशस्त–
चिन्तामणे । त्वां शरणं भजेऽहम् ॥ (इन्द्र.) ३

त्वन्नामचिन्तामणिमेव मन्त्रं, यो जञ्जपीति प्रमदेन पूर्णः ।
गेहाङ्गणे तस्य नरीनृतीति,
श्रीजीरकापल्लिनिवासपार्श्व ॥ (उप.) ४

चौराः पथे नाथ !, सहोदरन्ति, व्याघ्रादयो देव पुरस्संरति ।
त्वदङ्घ्रिसेवामतितत्पराणां,
श्रीजीरकापल्लिविभो ! नराणाम् ॥ (इन्द्र.) ५

नरो न रोगैः परिभूयते स, न दूयतेऽसौ विपदा कदापि ।
यो जीरकापल्लिजिनाधिनाथ–
श्रीपार्श्वनाथस्मरणं विदध्यात् ॥ (उपे.) ६

जीरावलीमण्डन–पार्श्वनाथ, संसारपाथः प्रतिक्लृप्तमाथ ।
अनेकजन्मोपचितैस्तपोभि–
र्दृष्टोऽसि दिष्ट्या जगदीशः हृद्यः ॥ (उपे.) ७

काले कलौ कल्पतरौ प्रनष्टे, चिन्तामणौ नाथ ! कथा–प्रथस्थे ।
स्वर्गे गतायां किल कामगव्यां,
त्वमेव जीरावलिदेव ! जीयाः ॥ (इन्द्र.) ८

भूरि प्रमोदभरतो जिनदेवसूरि–
जीरावलीमुकुटमण्डनजात्यरत्नम् ।
विश्वोपसर्गहरणाय कृतावतारं,
तुष्टाव पार्श्वजिननाथमचिन्त्यशक्तिम् ॥ (वसन्ततिलका) ९

पू.आ.श्रीजिनसोमसूरिप्रणीतम्

## ४४. ॥ श्रीस्तम्भनकपार्श्वजिनस्तवनम् ॥

(उपजाति)

श्रीस्तम्भनं पार्श्वजिनं निरञ्जनं स्तुमः समग्रातिशयाश्रयं वयम् ।
फणीश्वरस्फारफणागणोल्लसन्मणिप्रभाडम्बरमण्डिताम्बरम् ॥१

स्तुत्यस्त्वमर्च्यस्त्वमसि प्रणम्यस्त्राता त्वमेव त्वमुपासनीयः ।
त्वत्तः प्रभुः स्तम्भनपार्श्व ! विश्वे
न कश्चिदन्यः श्रितवत्सलोऽत्र ॥ २

कृतानि तीर्थानि सुराः श्रिताश्च यन्त्राणि तन्त्राण्यपि सूत्रितानि ।
स्मृताश्च मन्त्रा न हि तैरसाधि फलं जिन ! त्वच्चरणप्रसत्तेः ॥३

अथ प्रभो ! जाग्रदभङ्गभाग्ययोगेन केनापि तवाङ्घ्रिसेवा ।
लेभे मया तेन कृपालुमौलेर्मन्ये मनःकामितमद्य जातम् ॥ ४

हित्वा वपुःपञ्चकमङ्गिनस्त्वद्ध्यानादनङ्गत्वमधुः शिवाप्ताः ।
चित्रं प्रसादात् तव चङ्गमङ्गं
लब्ध्वाऽधुनाऽत्र स्मररूपिणः स्युः ॥ ५

वंदे मुनीन्द्राभयदेवसूरेर्वपुस्त्वया दिव्यमपास्य कुण्ठम् ।
कृपां कुरु क्षिप्रमपाकुरुष्व दुष्कर्मरोगं मम सुप्रसन्नः ॥ ६

कर्मव्यथाभिर्विधुरं वराकं त्वदेकभक्तं शरणागतं माम् ।
उपेक्ष्यमाणस्य जगत्प्रभो ! ते
कृपा कृपालोर्न हि किं भवित्री ? ॥ ७

असह्यबाह्यान्तरोगहन्ता त्वमेव विश्वेऽस्यनवद्यवैद्यः ।
जगत्प्रभो ! ते शरणागतस्य प्रसद्य मे रोगहरो भव त्वम् ॥ ८

न मत्समः कोऽपि परोऽस्ति दुःखी
न दुःखहन्ता तु जिन ! त्वदन्यः ।
मया त्वदङ्के निहितं शिरस्तत् तवोचितं यत् कुरु तन्ममाशु ॥९

त्वमेव तीर्थं मम देवता त्वं प्राणास्त्वमात्मापि मम त्वमेव ।
पुनः पुनर्विज्ञपयामि नाथ ! नीरोगतां यच्छ जगच्छरण्य ! ॥१०

इति स्तुतिः स्तम्भनपार्श्व ! नेत-श्चेतस्विचेतोऽर्थितदानदक्ष ! ।
श्रीस्तम्भतीर्थाभरण ! प्रसद्य भक्तस्य मे पूरय पूरयाशाम् ॥११

पू. आ. श्री लक्ष्मीसागरसूरिविरचितम्

## ४५. ॥ श्रीजीरावल्लिपार्श्वनाथस्तोत्रम् ॥

(मन्दाक्रान्ता)

श्रीवामेयं विधुमधुसुधासारसारस्वभावं
न्यायापेतोद्धतमतिचमत्कारकारिप्रभावम् ।
जीरापल्लीपदमविपदं वारिदच्छायदेहं
निस्सन्देहं विमलकमलाकेलिगेहं स्तुवेऽहम् ॥ १

स्फाराकारा ननु जिनपते ! दृश्यते ते न मूर्त्तिः
स्फूर्तिस्तस्याः पुनरनुपमा विश्वविश्वप्रसिद्धा ।
शौण्डीराणां न खलु महिमा मूर्त्तिमात्रानुयायी
यद् बालोऽपि प्रबरकरटिध्वंसधीरो मृगारिः ॥ २

चौराचारप्रचुरचरटव्यालमालाकराले
प्रायो यस्मिन्नलभत पुरा न प्रवेशं मनोऽपि ।
तं लङ्घन्ते गुरुगिरिपथं साम्प्रतं वीतशङ्का-
तङ्का गेहाङ्गणमिव भवद्भक्तिदक्षा मनुष्याः ॥ ३

येषां क्रीडाः परधनपरप्राणसंहाररूपा
भूपाः सर्वेऽपि हि बहुबला येषु कुण्ठस्वरूपाः ।
जीरापल्ल्याः पथि विचरतां सोदरन्त्येव तेऽपि
स्तेना येनानुपमितबलो रक्षकस्त्वं जिनेश ! ॥ ४

सार्थः प्राथ्र्यो न च न च बलं क्वापि कस्याप्यपेक्षं
भूयो भूयो गहनगहनो गाहनीयश्च पन्थाः ।
एकैकस्यापि च विचरतस्त्वत्प्रसादेन मार्गे
जीरापल्ल्याः परपरिभवो नैव भूतो न भावी ॥ ५

ये त्वद्ध्यानोपगतमतयो दूरदेशेऽपि तेषां
स्वस्थानस्थः स्थगयसि रुजः प्राणिनां प्राणतोऽपि ।
नासम्भाव्यो भवति भवितो भावितोऽयं प्रभावः
सूरो दूरोऽपि हि न सहते लोकमध्येऽन्धकारम् ॥ ६

मुक्ता वैद्यैरपि बहुविधैरौषधैरप्यसाध्या
विध्याता ये चिरविरचितैर्नाऽपि मन्त्रादियोगैः ।
तेऽप्यातङ्का गतभव ! भवन्नामधेयाभिराम-
ध्यानादेवाम्बुन इव दवा नाथ ! निर्नाम नेशुः ॥ ७

कासश्वासज्वरकरशिरःकुक्षिचक्षुर्विकाराः
शोषःश्लेष्मा क्षतमबलता वातपित्तप्रकोपाः ।
कण्डूकुष्ठश्वयथुदवथुर्गुल्मदुर्नाम पामा
रक्षां दक्षे त्वयि विदधति व्याधयो नैव बाधाम् ॥ ८

रोगाभोगा गहनदहनव्यालदुर्मन्त्रयोगा
ध्याते तात ! त्वयि तनुमतां नो भवेयुः पुरोगाः ।

बाह्योऽप्येष श्रुतिपथिगतः कस्य चित्ते विधत्ते
नैवाश्चर्यं जगति महिमा तावकीनो नवीनः ॥ ९

यस्मिन्नन्येऽजनिषत सुरा निष्प्रभा निष्प्रभावाः
काले तस्मिन्नपि विलसति त्वत्प्रतापप्रभावः ।
यद् ग्रीष्मर्तुर्नयति सलिलोल्लासमस्तं समस्तं
तस्मिन् काले कलयति किल प्रत्युताम्भोधि ऋद्धिम् ॥ १०

विश्वाधारामतरलतरत्तारतारामुदारा-
मीश ! स्वीयां क्षिप मयि दृशं देव ! ते सेवकोऽस्मि ।
ॐकुर्वाणे भवति भवति स्वार्थसिद्धिः समस्ता
तन्मां स्वाहाशनपतिनतोपेक्षितुं ते न युक्तम् ॥ ११

किं कल्पद्रुः ? किममरगवी ? कामकुम्भोऽपि किं वा ?
दत्ते चिन्तामणिरपि च किं ? किं च धन्वन्तरिर्वा ? ।
श्रीवामेय ! त्वयि विधुरितोद्धारधन्ये प्रसन्नेऽ-
वश्यं वश्या भवति भविनां लीलया सर्वसिद्धिः ॥ १२

धीरा जीरावलिवरपुरीसारशृङ्गारभूतं
ये श्रीपार्श्वप्रभुमभिनवप्रीतिभाजः स्तुवन्ति ।
दुःस्थावस्थाः खलु विफलतां यान्ति तेषामशेषाः
सम्पद्यन्ते हृदयदयिता एव लक्ष्मीविशेषाः ॥ १३

पू.आ.श्री जयशेखरसूरिविरचिता

## ४६. ॥ श्रीजीरापल्लीयश्रीपार्श्वनाथस्तुतिः ॥

(इन्द्रवज्रा)

सच्चक्रसच्चक्रधरादि ऋद्धिसन्धानसन्धानलसं जिनेशम् ।
पार्श्वं सुपार्श्वं सुरवृन्दवन्द्यं मानं विमानं विधिवन्नुवामि ॥ १

माकन्दमाकन्दमुदारमाप्य विश्वेशविश्वेशमिवातपार्त्ता ।
नुत्वा ननुत्वा नरकार्तिदूनोऽमानन्दमानन्दमहं वहामि ॥ २

कोपाधिकोपाधिविशेषवृद्ध-माजन्ममाजन्मभवानुतापम् ।
दातावदातावध(र)बोधितत्व-
मव्याजमव्याजनतां जिन ! त्वम् ॥ ३

भावारिभावारिभयार्तिरक्षा सालस्यसालस्य दवीयसोऽद्रुः ।
दक्षामदक्षामकशीलशालि केदारकेदारमुचो न तेऽर्चाम् ॥ ४

(द्रुतविलम्बित)

मुनिसभावनभावनया जनाः कृतनवास्तनवास्तवपूजनात् ।
भवममङ्गलमङ्गलसद्द्युतः स्खलितदैव तदैव तरन्त्यमी ॥ ५

अरिभुजङ्गमजङ्गमपर्वत-प्रतिमसिन्धुरसिन्धुरयव्यथाः ।
त्वदभिधामतिधामतिरस्कृता इव रसारविसारवि लिल्यिरे ॥६

रथतुरङ्गमरङ्गमतङ्गजां गजसुतावनितावनिवेशमसु ।
मुनिमनोरमनोरमतेमति-र्ममतेऽभवतेभवदाग्रहा ॥ ७

अधिगतारसतारसमाश्रया यदि तवागमवागमराञ्चिता ।
गरिममन्दरमन्दरसं परा गमबुसम्प्रतिसम्प्रति तन्मनः ॥ ८

(वैश्वदेवी)

नेभा नैवाभावास्तुरङ्गास्तुरङ्गा-स्तेषां दूरे नोद्दामहेलामहेला ।
यैस्तेवागस्तानारतापारतापा लेभे लोकेहात्यागकल्याकल्या ॥९

सप्रतेशोजानुरोगानुरोगा-न्नाभिव्याप्तं भीकं प्रभूतैः प्रभूतैः ।
ध्यायत्येकं त्वां जीवराजीवराजी-
सुरञ्चित्तयो ग्लानिशान्तेनिशान्ते ॥ १०

मुक्तेर्निर्माणे को वदान्यो वदान्यो
मुक्त्वा मुक्तिश्रीलाभवन्तं भवन्तम् ।
तस्यै हीपीनश्री नवालानवाला
देवं सेवन्ते दीप्रकामं प्रकामम् ॥ ११

आनङ्गं रङ्गं लुम्पमानोऽपमानो
यस्त्वां वीक्ष्येताक्षोर्भियोगाभियोगात् ।
लोकालङ्कारं हन्त मन्येत मन्ये
किं भूभारार्धं हीनसत्त्वा न सत्त्वाः ॥ १२

(भुजङ्गप्रयातम्)

विशालाविदुष्कर्म्म वल्लीविशाला
यशोऽलम्भिते नोदयं प्रायशोऽलम् ।
सदानन्दलीनं ददानं सदानं
समानम्ययस्त्वामभूद्धासमानः ॥ १३

विलासालिरंहः समूहाविलासा-
धिकाराश्च सर्वे भवन्त्याधिकाराः ।
नवामानवामाङ्गजज्ञानवामा
न तत्र त्वदीया रतास्तत्र तत्र ॥ १४

तमोहन्तुमर्त्यान्तरं जातमोहं
सदारम्भसारम्भजं ते सदारम् ।
विहाय त्वदाज्ञां खगत्याविहायः
समाना हहा केऽपि जीवाः समानाः ॥ १५

क्षमोहन्तु हन्तुं न हन्ता क्षमोहं
न तातः प्रभुर्वा न पत्नी न तातः ।
विदित्वामुदारं मुदारं विदित्वा
भवं देव ! भेत्तं गतक्षोभ ! वन्दे ॥ १६

जीरापल्लिवतंस ! पार्श्वभगवन् ! कृत्वा नवं ते स्तवं,
सूरिश्रीजयशेखरश्छिरशिरःश्लिष्टाञ्जलिर्याचते ।
श्रेयःश्रीविशदे निवारितमदे सर्वार्थसिद्धिप्रदे,
मच्चेतो रमते यथा तव मते कुर्यास्तथा श्रीपते ! ॥(शा.वि.)१७

पू.आ.श्री जयशेखरसूरिविरचितः

## ४७. ॥ श्रीपार्श्वनाथकलशः ॥

भो भो भविकलोका भाग्यालोकादिह देव-;
सद्मनि समुदिता निरञ्जन जिनपूजन प्रमुदिताः ।
निवार्य सकल कलङ्कमलमविकल प्रभाव भवनस्य;
श्रीपार्श्वजिनस्य श्रुणुत जन्माभिषेक "कलशम्" ॥ १

कलश इव चारुवृत्त कमलोल्लासंदिशन दिनेश इव ।
जलद इव नीलदेहो जयति श्रीपार्श्वनाथजिनः ॥ १

भुवि भरत भूषण मस्त(स्क) दूषण मस्त नगरी कासि;
सोल्लसति सततं यत्र सुकृतं चतुरचित्त विकासि ।
रणरङ्ग बन्धुर धीर सिंधुरमश्वसेन नृपालः,
पालयति वैभवमत्र परिभवकारि वैरिषु कालः ॥ २

गुणधाम वामा विशदकामा तस्य रामारत्नं,
उत्तमतपस्या जयति यस्या गुरु नमस्यो यत्नः ।
धनसुखविपाकं दशमनाकं निशि विहाय बभाज,
तत्कुक्षिकमलं सहजविमलं हंसवज्जिनराजः ॥ ३

कुम्भि-वृष-गज, वैरि वारीजवसति-दाम-निशेश-,
दिनपति-पताका-घट तटाकाम्बुजीवीवन् नदीशः ।
सुरभवन वासर रत्नभासुर रत्नराशि शिखीति,
स्वप्ननाननीर्ष्या निशि निरीक्ष्यानन्दमाप सुरीति ॥ ४

अथ किञ्चिदधिकं मास नवकं यावदति चक्राम,
जिन जन्म तावद भूतभाव दसम भव दुत्सवधाम ।
सा पोशदशमी रजनि रसमीभूत संतमसापि,
राकावदाता जगति ता जन्म सहसा सापि ॥ ५

अनुषन्न (षंग) दाता मुदित माता दिवस इव वर कोक,
सितरुचि विशाखा भाजि शाखा वितत विदखिल लोकः ।
अधऊर्ध्व-तिर्यक् रुचक् वर्ग स्थितिर संगत माय,
मिह दिग्कुमारी तति रुदारीकृत विभूषमियाय ॥ ६

घन पवन पावन तम घनाघन मुकुरुकर भृङ्गार,
वीजनक चामर दीपिका वरमातृ सुत शृंगार ।

कृत्वाति निज निज कर्म्म सध्वज दिव्ययान् निकाय,
मारह्य धवलित बुद्धिरचलत् दिक्कनी समुदायः ॥ ७

आसनकम्पेन तदा वितत भूभङ्ग भीम भाल तलः ।
क्षणमेकं प्रीतिपदे सौधर्म्मेन्द्रो दधौ कोपम् ॥ ८

अथ जन्म जिनस्य तृतीय विदा, बुबुधि विबुध प्रभुणा सुहध ।
बहुधार सुधारस धौतइवा, जनि निवृत्त सर्व तनुर्मघवा ॥ ९

वैकक्ष शाली हरे हरे वाली दास दिशी संन्यस्त,
दमेमाशु शक्रस्तवमचक्रः सिरसि योजितहस्तः ।
प्रणिगद्य गौर प्रेमपूरः सपदिपत्ति लेश
मद्यमुक्त बंधन विबुध बोधन कर्म्मणे दिनिदेश. ॥ १०

तत्कृत सुघोषा सुघनघोषात् अवहितं समकालः,
मस्वप्नमण्डल मौलि मालि चचाल ।
अन्येऽपि देवाधिदेव सेवा रसिकं हृदया मेरुः,
मौलौ विहङ्गा इव सरङ्गा अग्रशिरस्येत् ॥ ११

संभ्रम चचाल कपालि पालक रचित योजनलक्ष,
मानं विमानं निरुपमानं हरि रुपास्य सपक्ष ।
आगत्य हरपुर हार सुंदर जन्ममन्दिर मीशः;
कृत्वा प्रदक्षिणमुत्तमक्षणमत्तरा शुचिवेश ॥ १२

निद्राममुद्रा मुदित तन्द्रामेष मातुरदत्त,
पञ्च प्रपञ्चित वसुपुरुदं वितपाणि जिनमादत्त ।
सतत्र चामर कुलिश डामर विहित भक्ति रवं च,
क्रोडस्थ भगवाने व मघवा मेरुगिरि मानं च ॥ १३

अति पाण्डुकं बलमिति शिलातलममल गौरेगभस्ति
तदधिन्य काया चूलिकायां दक्षिणेन समस्ति ।
तदुपरि च सिंहासन मनङ्गा हरि रशि श्रिय देव,
निधाय प्रभु ममाय त्रिदश दर्शति सेवः ॥ १४

अथभवनपति ज्योतिर्व्यन्तर-वैमानिकाः ।
अपरेपितत्र हरयरित्र षष्टि रीयुस्नधैव तदा ॥ १५

योजनमुखाननि मिखामणि काञ्चन रजत मृन्मयान् विध्धुः ।
कलशा नवि कलशोभा नष्ट सहस्रां चतुः षष्टिम् ॥ १६

सौमनस नन्दन वनज चन्दन कुसुम सुरभिसुवस्तु,
पद्मादि पीवर नद नदीवर निर्झरादि पयस्तु ।
आदायते मणि कलश धोरणि मबिभरु भवरङ्ग;
रणझुणित मधुकर निकर पुष्कर विहित वदनामङ्ग ॥ १७

भगवान वादिभि रच्युतादिभिरस्तवि क्रमम शोभिः,
हरिभि प्रमोदित् लोचनोदित दकविवृद्धि पयोभिः ।
इशान सुरपति रथ जगत पतिमानिनाय निजाङ्क;
मसितं सरङ्गं किल कुरंगं पर्वणीय मृगाङ्कः ॥ १८

समाधिगतचारः सुकृतसारः प्रथमहरि रविकार,
ऋषभानशेष प्रीतलेखश्चतुर एव चकार ।
तच्छृंग मुक्ता घृसृण युक्ता वारिधारा अष्ट;
जिन सिरसि पतिता वीक्ष्य वितता मनसि कोहि न हृष्टः॥१९

रणरणिति तालामुखे विशाला भिरिरि भेरिनाम,
निवली चंदो दौ धुंधुंमि धौं धौं सुरजइत्यभिरामः ।
डां डां चड कादुमिति ढक्का शंखओमिति चित्र,
नूराणि देवा युगपदे वावीवदिन्निति तत्रः ॥ २०

व्यधुः केपि संगीतकं भक्त्या मया विभोः
केप्य गायन गुणानादितयोः ।
ददुः केपि हल्लिसकं लोलहाराः;
परोपतरुत्ये तुरानन्द साराः ॥ २१

इति सज्जिति सज्जन मज्जनकं, वरपुष्प विभूषण पूजनकम् ।
विरचैट्य यथागतमेवगता, द्युभवो विभुनाम निकामरताः॥२२

त्रिदशपति रथकासिमागत्य मुकत्वा,
जिनमुपजननि रजनिजानिकर चारुचेताः ।
कृत्वा घनवृष्टिमिह निजमवोपपद मयवजेता;
श्री वामेय ममेय गुणमिन्द्रः स्नपयामास;
येन तेन विधिना सुजनः स्नपयतु शुभसंवासः ॥ २३

जय जयशेखर सुंदर सुरनिकर स्नपित पार्श्व जिनराज ।
तेऽपि च जयन्तु तस्मिन् समये ये नाथ दृष्टोऽसि ॥ २४

पू.आ.श्री जयशेखरसूरिविरचितानि

## ४८. ॥ श्रीपार्श्वनाथछंदांसि ॥

अश्वसेन कुलकमल मरालं, न मदन सुरासुर नर मनरालं
भज भुजग ध्वज मिनमिव चलनं, कुशल कदंबक निश्चल भवनं।
भुवन प्रभुमेकं मथितारेकं, रवजित केकं कलि हरणं;
विख्या भविकं वसितच्छेकं सुकृत निषेकं प्रति निपुणम् ।
जित परमत भेकं शांतमुनेकं, विपदुदेकं धर्मधनं;
चेदिच्छसिरेकं प्रणमतदेकं, तं मनस्येकं पार्श्वजिन ॥ १

रति करण कुरंग तरल तुरंगं, विषय तुरंग गेहनलं
हित्वा बृहदंगं शवसिद्रङ्गं, प्रति घृतरंग धौतमलम् ।
यशसाजित गंगं भवभय भंगं, सुचरित चंगं महसि घनं;
शित मोह निषंगं सुरगिरितुंगं, नमनिःसंगं पार्श्वजिनम् ॥ २

जीराउलि निलयं पापप्रलयं घृत भूवलयं लय निरतं;
गोपुर हृदयं देहिषु सदयं, विभ्रतु सुदयं भुवि विदितम् ।
कुण्ठीकृत कुनयं कल्पित विनयं, वामा तनयं नय भवनं;
संपत्तातिसयं सुघटित समयं, नम निर्विषयं पार्श्वजिनम् ॥ ३

सुरमणिसंवादं दलित विवादं, दित परवादं विदितदयं;
नवनीरद नादं गलदुन्मादं, गतपरिवादं गुण निलयम् ।
हतमोह निषादं मुक्तविषादं, धु धुत भवसादं, शशिदवनं;
कमलोपमपादं, तघृमर्यादं नम कमलादं पार्श्वजिनम् ॥ ४

कल्याण कलापं कुशलालापं, कृत्न विलापं वैरहरं;
दुःशील दुरापं दुरितचापं, दिविकृत तापं जयततरम् ।

तमसामलापं तक्षित तापं, शुभ तरुवापं भय शमनं;
शिव कमलावापं परिहतशापं, नम निष्पापं पार्श्वजिनम् ॥ ५

कवलित कलमानं बहुमहिमानं, शुभ नामानं मुनि महितं;
गुणहेम निधानं कुमतिपिधानं विदिश विधानं जन्तुहितम् ।
वर वत्सर दानं सुगति निदानं लसदवदानं समसदनं;
सुर शाखिसमानं नवकरमानं, नम निर्मानं पार्श्वजिनम् ॥ ६

परिपालित विधुरं गिरि मधु मधुरं;
विद्धतमुद्धरं मोहबलं, निखिलागम. विदुरं गतमदमदुरम्
जलधर वदरं दानकलं संशयधन समिरं चारित समरं,
जगदवनं प्रणता सुरखचरं धनरुचिचिरं,
पूज्य सुचिरं पार्श्वजिनम् ॥ ७

आजनु रविकारं करुणागारं गिरिमाधारं धीरनतं;
परिभव परिहार विहित विहारं, भूतलहारं भूरिमतम् ।
दूरिकृत दारं दुरित विदारं, मुदिरो दारं निर्तृजिनं;
नम वारं वारं वैर निवारं पार्श्वजिनम् ॥ ८

सतत ता जनिता जनिता नन्दन;
जगति विरति तति धर्मधुरन्धरा,
यवनाधिप परिवसित लसित महिमोदय बन्धुर,
शेष संखासित सुगुण पूत पातक तरु कुञ्जर रमणीय रुप
रिपुभय दमन मुनि विमान मानस
सदन सूरि वर्ण्य जय पार्श्वजिनम् ॥ ९

पू.आ.श्री रत्नसिंहसूरिविरचितम्

## ४९. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

यस्त्रैलोक्यगतं ततं गुरुतमःस्तोमं निहन्तुं क्षमः
प्रौढातङ्कभृतां नृणां जिनपतिस्तापं विलुप्य क्षणात् ।
सर्व्वस्याऽमृतपूरपूरणरतिं विस्फारयन्नेत्रयो-
र्नव्यः शङ्खपुरेश्वराम्बरमणिः कुर्यात्स वः कामितम् ॥ १

अत्यन्ताद्भुतसम्मदाम्बुदततिप्रोद्भूतरोमाङ्कुरै-
र्दृष्टे यत्र बभूव (नेत्र?) वसुधा सत्पुण्यपुष्पाञ्चिता ।
श्रीशङ्खेश्वरमण्डनैकतिलकः कुर्व्वन् वसन्तोत्सवं
स श्रीपार्श्वजिनेश्वरः स्फुरतु नः स्फूर्जन् मनःकानने ॥ २

येन त्वं स्मृतिमात्रतोऽपि मनसा ध्यातः प्रभो ! सादरं
कुर्व्वाणेन गिरा स्तुतिं निरुपमां बाष्पोर्म्मिलक्ष्यां स्फुटम् ।
कायेनापि हि सन्नतिं विदधता पञ्चाङ्गभङ्गस्पृशा
स श्रीशङ्खपुरस्थपार्श्व ! लभते लोकद्वये निर्वृतिम् ॥ ३

आधिव्याधिस मस्तकुष्टपिटकश्वासार्त्तिकण्डूज्वर-
प्रेतोद्भूतजलोदरप्रभृतयो ये सन्ति रोगाः क्षितौ ।
यद्वत्तीव्रतमांसि यान्ति विलयं मार्त्तण्डतेजस्तते-
स्तद्वत्तेऽपि यजु(यु)स्तव स्मृतिवशाच्छङ्खेश्वरस्थ प्रभो ! ॥४

हेलास्फालितकुम्भिकुम्भदलनप्रोद्भूतगर्वोद्धुरं
दृष्यं(श्यं)तं किल कोऽपि कोपितममुं सिंहं निहन्तुं क्षमः ।
त्वां पार्श्व ! स्तुवता प्रतापकलने त्वं येन तुल्यः कृतः
खद्योतं स रवेः समं वितनुते शंखेश्वरस्थ प्रभो ! ॥ ५

धृत्वादौ प्रणवं सुनादकलितं मायाख्यबीजान्वितं
पर्यन्ते च नमस्ततो निजयुतं काम्यार्थसम्पादकम् ।
हर्षोल्लासवशेन शुद्धमनसा यद्यस्ति सत्यं वचो
विज्ञप्तिः फलदा तदा मम भवेच्छङ्खेश्वरस्थ प्रभो ! ॥ ६

दिग्भ्यः क्षुभ्यदबिभ्यदं च न धिया भक्तिं दधद्बन्धुरां
प्राप्याभ्यर्थितमर्थसार्थमसकृद्यत्रैति नन्तुं जनः ।
आनन्दामृतसिन्धुवीचिजनकं नित्यं नृणां पश्यतां
तं त्वां स्तौमि मुदा शशाङ्कसदृशं शङ्खेश्वरस्थ प्रभो ! ॥ ७

लुभ्यल्लोलविलासकेलिललनासम्भोगरङ्गस्पृशः
श्रुत्वा तेऽपि तव प्रभावमतुलं – – ति द्रष्टुं भृशम् ।
हित्वा वेश्मकथां प्रथामवितथां सद्ध्यानधर्म्ये दधद्
वक्तुं कश्चिदलं गुणान् किमु भवेच्छङ्खेश्वरस्थ प्रभो ! ॥ ८

स श्रीपार्श्व ! मम प्रकारवशतः किं वास्तु भावस्तवा ।
दद्याद्व्यः (?) पुरुषागता जनततेः शङ्खेश्वरस्थ प्रभो ! ।
दृश्यद्वेषगजेन्द्रदर्प्पदलनप्रादुर्भवद्विस्मयं
प्रोद्यत्कर्मकुरङ्गभङ्गजनकं शार्दूलविक्रीडितम् ॥ ९

त्रैलोक्यं सकलं मया प्रतिकलं दृष्टान्तमन्वेषितुं
देव ! त्वद्गुणवर्ण्णनां विदधता विस्फारितं मानसम् ।
एकस्यापि गुणस्य तत्त्वतुलया लेभे क्वचिन्नोपमा
हर्षात्सर्वमिदं विलङ्घ्य गदितं शङ्खेश्वरस्थ प्रभो ! ॥ १०

संस्तुस्येत्थमसौ जिनेश्वर ! तव श्री पार्श्व ! पादाम्बुजं
स्वीयस्वान्तसमुत्थदौस्थ्यदलनैः सद्भावगर्भैः पदैः ।

विश्वं शर्मपदं नयेति निगदन्नभ्यर्थनासार्थकं
मूर्द्धानं भुवि सन्निधाय नमति श्रीरत्नसिंहप्रभुः ॥ ११

पू.आ.श्री महेन्द्रप्रभसूरिनिर्मितम्

## ५०. ॥ श्रीजीरापल्लिपार्श्वस्तोत्रम् ॥

(भुजङ्गप्रयात)

प्रभुं जीरिकापल्लिवल्लीवसन्तं,
लसद्देहभासेन्द्रनीलं हसन्तम् ।
मनःकल्पितानलपदानैकदक्षं,
जिनं पार्श्वमीडे कलौ कल्पवृक्षम् ॥ १

बुधा रत्नभूताः सुधासारवाचः,
क्व ते मन्दधीः क्वाहमेषोऽल्पकाचः ।
तथापीश ! भक्तिस्तु मां मौनमेषा-
ऽधुना मोचयत्येव मान्त्रीव लेखा ॥ २

बुधानां गिरस्तुष्टुवुर्यं महार्थाः,
ममाज्ञस्य कास्तत्र चैता अपार्थाः ।
विहायाऽध्वना येन वा वैनतेयः,
प्रयातः स किं चाटुकैरेण हेयः ॥ ३

पुरा भूषणे दूषणे निर्विशेषा,
परिस्पृश्य मिथ्यात्वमातङ्गमेषा ।
मतिर्मे जिनध्यानतीर्थेषु शान्ता-
ऽधुना स्नातुं शुद्ध्यै सतीवातिकान्ता ॥ ४

कुदेवान्तराणां कृता चाटुदाऽऽशी,
रसज्ञे ! रसज्ञापि किं वञ्चिताऽऽसीः ।
स्तवक्षारनीरैर्यतो नो पपाथः,
त्वमग्रे सुधाभं जिनस्तोत्रपाथः ॥ ५

क्षमासिन्धुरेकोऽपि निर्द्वन्द्वभावः
त्वमेवारुणः सप्रतापप्रभावः ।
अमित्रं जगज्जैत्रमुर्वीशमोहं,
स्तवायाऽभवं नाथ ! ते मागधोऽहम् ॥ ६

शिवश्रीकृते त्वद्विना वीतरागान्,
महेत्कः सुधीरन्यदेवान् सरागान् ।
अपास्यामृतं कोऽत्र वा तृट्छिदाऽलं
पिबेदारनालं दहत्कण्ठनालम् ॥ ७

नमस्ते विभो ! विश्वविश्वैकभर्त्रे,
नमस्ते समस्तापदापातहर्त्रे ।
नमस्ते चिदानन्दकन्दाम्बुदाय,
नमस्ते गुणातीतसङ्ख्यार्बुदाय ॥ ८

नराः किन्नराश्चामरा यस्य सेवा-
ममी कुर्वते ऽखर्वगर्वा न के वा ।
द्युताः सम्पदः स्वं पदं याचमानाः,
प्रसादे सदापीशितुः सावधानाः ॥ ९

गराध्मातदर्प्पा प्रसर्पन्ति सर्पाः,
न मर्माविधो भूभुजां वाऽवसर्पाः ।

निबद्धावनीविग्रहाः कुग्रहा वा,
घनोच्छृङ्खला नोखला दुष्टभावाः ॥ १०

स्फुटं चौरिकावृत्तिशूरा न चौराः,
क्षुधाग्रस्तलोका समा नापि रोराः ।
यमस्येव दूताः प्रभूता न भूताः,
न देहेऽपि रोगाश्चिरं वानुभूताः ॥ ११

मदोन्मत्तकोपोद्धुराः सिन्धुरा वा,
न च व्याघ्रसिंहा महाघोररावाः ।
न दावानला भूरिजिह्वाकराला,
न वातङ्कदा वार्द्धिकल्लोलमालाः ॥ १२

महाकोपकालानला भूमिपालाः,
सशस्त्रा न योधाः कलौ भीमभालाः ।
पुरस्तस्य पीडाहराः शुद्धवर्णाः,
विभो येन जप्ता भवन्नामवर्णाः ॥ (च.क.) १३

तदैकैव वामोदरस्थेन देव !
त्वया राजिता रत्नगर्भा नवैव ।
यतस्त्वत्समं कापि पुण्यं न माता,
पुरासूत पुत्रं पवित्रावदाता ॥ १४

पुरी स्मेव हर्षान्नरीनर्त्ति काशि-
र्भवज्जन्मनि प्रस्फुरत्सौधराशिः ।
चलद्वैजयन्तीकरैर्मन्यमाना,
कृतानुग्रहं पावनं स्वं समाना ॥ १५

धराधीश्वरस्याश्वसेनस्य गेहे,
त्वयीशागते पुण्यलावण्यदेहे ।
सुदीपोत्सवोऽदीपि माङ्गल्यरूपे,
जने विश्वदीपे सदोद्योतरूपे ॥ १६

ग्रहाः कौतुकेनेव यद् द्रष्टुकामा,
ययुः स्थानमुच्चं समस्ता अवामाः ।
क्षणे जन्मनो ज्ञानलक्ष्मीसनाथः,
शिवं मे स दद्याज्जिनः पार्श्वनाथः ॥ १७

पपौ स्तन्यमन्यार्भवद् यो न मातुः,
स्मितैरेव सा तेन सम्प्रीणिता तु ।
ययौ वृद्धिमङ्गुष्ठपीयूषपोषैः,
शिशुत्वे फलैश्चामृतैरस्तदोषैः ॥ १८

क्षमायां द्विधा मन्दमन्दं दधानं,
पदं वीक्ष्य मातापि यं सावधानम् ।
हृदीदं दधौ जङ्गमःकल्पवृक्षः
कथं मेऽङ्गणेऽसौ नमद्देवलक्षः ॥ १९

विभुः शैशवे हेलया नागराजं,
ज्वलद्वह्नितोऽमोचयद्दाहभाजम् ।
कृपालुश्च यः प्रापयामास ऋद्धिं,
स मे पार्श्वनाथः क्रियात्कार्यसिद्धिम् ॥ २०

क्षमोऽपि प्रभुर्यौवने राज्यभारं,
वितृष्णो न शिश्राय जानन्नसारम् ।

किल ज्ञानवान् यो महानन्दलुब्धः,
कथं सोल्पऋद्ध्या भवेद्विप्रलुब्धः ॥ २१

ततिर्योषितां रूपतो या घृताची,
निरस्ता समस्तापि चाशापिशाची ।
त्वया मोहमल्लं पराजित्य देवाऽ-
निशं तेन मे त्वत्पदद्वन्द्वसेवा ॥ २२

कथं प्रीणति प्राणवन्मोहजेतुः
पुरस्ते स लोभद्विषस्तस्य केतुः ।
हते वा नृपे सेवकस्तत्सपक्षः,
किमु स्यात्प्रभूणां न वध्यो विपक्षः ॥ २३

गृहे सुव्रतोऽपि व्रतं यत्त्वमीशा-
ग्रहीरत्र हेतुं तु के वक्तुमीशाः ।
परं वाक्यदर्श्येवमाचार एषः,
त्वया भाविनां भाविनां लब्धरेखः ॥ २४

कलौ नाम शैले सरः कुण्डमस्ति,
स्वयम्भूर्भवांस्तत्तटे स्माविरस्ति ।
तदासन्नभूपालभक्त्येति चित्रं,
पवित्रं च तद्वेद कस्ते चरित्रम् ? ॥ २५

तडित्पातघातस्फुटच्छैलशृङ्गा-
स्तरत्तूललीला लुठद्ग्रावभृङ्गाः ।
अदभ्राभ्रगर्जाहतप्राणिताशाः,
स्फुरद्दुर्दिनासाररुद्धाखिलाशाः ॥ २६

तवांहोमठाः कामठा वारिवाहाः,
न निर्वापयामासुरापूर्णवाहाः ।
स्वचेतोऽभ्रकागारगं ध्यानदीपं,
भजन्तं चिदानन्दसौख्यं समीपम् ॥ (यु.) २७

यदूर्ध्वंफणाः सप्तनागाधिराजः,
स्फुरद्रत्नचूडा बभूर्भक्तिभाजः ।
विजित्येव तान्नारकान् दुर्गमारीन्,
सदीपा ध्वजा उच्छ्रिता दुर्गमारीन् ॥ २८

विधोर्यन्महो यच्च वा चण्डभानोः,
मणीनां तु यच्चाविरासीत्कृशानोः ।
अहो यन्महो ज्योतिषां विश्वभर्त्तः !,
स सर्वोऽपि ते ज्ञानतेजोविवर्त्तः ॥ २९

भवाम्भोनिधौ कर्मणां भीतिभीत-
स्तवाज्ञान्तरीपं हि पुण्यादभीतः ।
कृपालो ! नृपालोकमार्गाध्वनीनं,
ततो मामवाऽनाथमेनं सुदीनम् ॥ ३०

त्वया देव ! जिग्ये पुरा यस्तपस्वी,
स कोऽनङ्गवीरोऽधुना किं तरस्वी ? ।
महामोहराज्ञो बलेऽजायते न-
तृणेढि श्रितानाशुगैस्तेन ते नः ॥ ३१

समाधिं निधिं हे मनस्त्वं गृहाण,
स्वदौर्गत्यदुःखं समस्तं मुषाण ।

अनङ्गादिनागैर्नभोनीलिमाभैः,
सदा रक्षके पार्श्वनाथे च मा भैः ॥ ३२

तवास्याम्बुजे यो मनश्चञ्चरीकः,
पपावाधिवात्याभरात् कान्दिशीकः ।
कणेहत्य लावण्यपीयूषपूरं,
स कृष्णोऽप्यतः श्वेतपक्षोऽस्तु दूरम् ॥ ३३

ज्वलत्क्रोधदावानलं मानगोत्रं,
छलाशापिशाचीकुलाकीर्णगोत्रम् ।
महालोभदुष्पूरगर्त्ताकरालं,
रसोत्तालपञ्चेन्द्रियव्यालमालम् ॥ ३४

महामोहपल्लीशशोकादिभिल्लं,
तमस्तल्पसङ्कल्पजल्पाच्छभिल्लम् ।
कलिश्राद्धरामाशिवाघोररावं,
रटच्चाटुवाचाटदोषाटदावम् ॥ ३५

परिभ्रम्य भीमं भवारण्यमापं,
सरस्वत्युपान्तं विभो ते दुरापम् ।
अपामागमं चामृतं यद्वरीय-
स्ततो मे पदं निर्वृतेर्नो दवीयः ॥ (त्रिभि.) ३६

सुधावर्षिणी वक्त्रचन्द्रप्रभा ते,
सदा भासमाना स्मृता सुप्रभाते ।
मनोऽमोदयन्मे परं दृग्चकोर-
स्तदा नाप तृप्तिं विषादः सघोरः ॥ ३७

तवाज्ञामहं मौलिमौलिं सयत्नं,
परागं पदाम्भोजयोर्भालरत्नम् ।
गुणोत्कीर्त्तनं कण्ठभूषामपारं,
स्मृतिं नाथ ! दध्यामुरस्तारहारम् ॥ ३८

प्रपा शीतला ते कृपा जीवलोके,
भ्रमत् त्वत्समं यत्परं नालुलोके ।
मनः पापतापाध्वखेदावभग्नं,
जगत्त्रातरऽत्रात एवाद्य लग्नम् ॥ ३९

स्मृतौ मानसं निर्मलं मन्यमानः,
प्रभोर्दर्शने दर्शने स्वे पुनानः ।
नतौ भालदुर्वर्णवल्लीं लुनानः,
स्तुतौ स्यामहं वावदूकाभिधानः ॥ ४०

पुरो दह्यमानागुरुस्तोमधूप-
भ्रमद्धूममालोक्य रूपैकभूप ! ।
तवेन्दीवरश्याममूर्त्तेर्हताशः,
कलिर्दर्श नाशं ननाश श्रिताशः ॥ ४१

सतीवास्ति रत्नत्रयी रागरोषा-
दिभिर्दस्युभिर्मुष्यमाणापदोषा ।
प्रमत्तस्य मे त्वद्विधेयस्य तारं,
पुरः पूत्करोम्येष ते तामवारम् ॥ ४२

भवेच्चेन्मुखे लोललोलासहस्रं,
तथा जीवितं पूर्वकोटीरजस्रम् ।
स्तवैर्नव्यनव्यैः स्तुवे चेदुदारं,
ततोऽपीश ! तृप्तो मुदामस्मि नारम् ॥ ४३

प्रकृष्टाणवः सन्ति यावन्त एते,
त्रिलोकीगता मोघितानङ्गहेते ! ।
तवाङ्घ्रीं प्रणन्निर्म्मि तत्सङ्ख्यवारं,
ततोऽपीश ! तृप्तो मुदामस्मि नारम् ॥ ४४

एवं देवाधिदेवं प्रतिदिनमपि यो जीरिकापल्लिराजं,
पार्श्वं स्तौति त्रिसन्ध्यं त्रिदशविटपिनं भक्तिभाजामवन्ध्यम् ।
विश्वा विश्वाद्भुतास्ता नवनिधिरुचिरा ऋद्धयो सिद्धयः वा,
तस्योत्सर्पन्ति पुंसः सपदि जगति या श्रीमहेन्द्रस्तवार्हाः ॥४५

(स्रग्धरा)

पू.आ. श्री धर्मघोषसूरिविरचितम्

## ५१. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(शार्दुलविक्रीडित)

पूर्वं पामरपुङ्गवेन सकलं साम्राज्यमासादितं
यस्माद् भोगपरम्परापरिचयो जातो बहूनामपि ।
सोऽयं सर्वजनीनकल्पविटपी चिन्तामणिः कामधुक्
श्रीपार्श्वो भवतादजागृहगतो नित्यं मुदे देहिनाम् ॥ १

कासश्वासभगन्दरोदरगलग्रन्थिव्यथाविह्वला
दुष्टाष्टादशकुष्टजातिगलितक्षेत्रा अपि प्राणिनः ।
यन्नामाक्षरकीर्तनामृतरसैः कल्या भवन्ति ध्रुवं
श्रीपार्श्वं तमहं नमामि तरसा शङ्खेश्वरावस्थितम् ॥ २

नष्टा कष्टपरम्परा परिभवो दूरे न दैन्यं क्वचिद्
रोगः शान्तिमुपैति याति कुमतिर्नैवास्ति तेषां भयम् ।

निर्वाणाध्वनि सार्थवाहमसमं ध्यायन्ति ये मानवा
वामेयं प्रकटप्रभाववसतिं श्रीस्तम्भनावस्थितम् ॥ ३

भूपाला भुवि पार्श्वनाथ ! भगवन् ! राज्योन्नतिं सेवकाः
स्वामित्वं सकलार्थसाधकतमं निःस्वा धनानि प्रभो ! ।
रोगार्त्तास्तदभावमापुरपरे सर्वार्थकामान्नरा-
स्त्वत्तः साधुजनाः शिवं प्रशमिनो जावालिदुर्गस्थिते: ॥ ४

यः पूज्यो जगतां नमन्ति सुधियो यं येन मोहो जितो
यस्मै संस्पृहयन्ति चारुमतयो यस्माच्छुभं देहिनाम् ।
यस्यानन्तचतुष्टयं निरुपमं यस्मिन् स्थितं सद्गुणैः
स श्रीपार्श्वजिनेश्वरो वितरताच्चारूपसंस्थः शिवम् ॥ ५

भोगिस्कन्धनिबद्धपादयुगलं स्फूर्जत्फणाडम्बरं
कायोत्सर्गजुषं शिरीषनगरप्रासादलब्धोदयम् ।
ध्यानस्थं कमठोपसर्गविगमे कैवल्यलक्ष्मीयुतं
श्रीपार्श्वं जगतां विदारितरुजं पश्यन्ति धन्या जनाः ॥ ६

अद्यापि प्रकटप्रभावभवनं पञ्चालदेशक्षिते-
श्चूडारत्नपदे सुरेश्वरनतं श्रीवर्द्धमाने पुरे ।
वन्दे पार्श्वजिनेश्वरं जितरिपुं भिन्नेन्द्रनीलद्युतिं
चैत्ये वीरविभोर्भवार्त्तिशमनं श्रीजैत्रमल्लाह्वयम् ॥ ७

कामक्रोधमदाविवेकविषयव्यासङ्गलुप्तात्मनां
नोत्तारो भववारिधेस्तनुभृतां श्रीपार्श्वनाथप्रभोः ।
पादाः स्युर्यदि यानपात्रमनघं नोऽनन्तकालेष्वपि
द्वीपस्थस्य फणीन्द्रशेखरशिखारत्नप्रभाभासिनः ॥ ८

देव ! श्रीकलिकुण्डमण्डनमणिर्वाणारसीभूषण !
स्वामिन् ! श्रीमथुराधिनाथ ! भगवन् ! नागह्रदालङ्कृते !

कामान् श्रीफलवर्द्धिबद्धवसते ! सम्पूरय प्राणिनां
शश्वच्छ्रीजिणहाधिमन्त्रिवसतिश्रीपुण्ड्रपार्श्वप्रभो ! ॥ ९

श्रीनागाष्टकुलावचूलतिलकं पद्मावतीसेवित:
य: पार्श्वं प्रणवादिबीजसहितं ह्रौँकारसंवेष्टितम् ।
नित्यं ध्यायति निश्चलेन मनसा वीतस्पृहो मानव-
स्तस्यै.....वमेव यान्ति विपद: सिध्यन्ति सर्वा: श्रिय: ॥१०

इत्थं भक्तिवशीकृतेन रचितं स्तोत्रं पदं सम्पदां
मिथ्यात्वद्रुमभङ्गकुञ्जरपते ! रोलम्बरामद्युते: ।
श्रीपार्श्वस्य विभोर्मयापि कुधिया कल्याणकामैर्मुदा
भव्यैधर्मवरै: सदैव गुरुणा घोषेण पापठ्यताम् ॥ ११

पू.आ.श्री धर्मघोषसूरिविरचितम्

## ५२. ॥ श्रीचिन्तामणिपार्श्वनाथमन्त्रकल्पम् ॥

किञ्चिद् गुरूणां वदनारविन्दान्,
निशम्य सम्यक् परमार्थमुच्चै: ।
विलिख्यते स्वान्यजनोपकृत्यै,
श्रीपार्श्वचिन्तामणिमन्त्रकल्प: ॥ (उपजाति) १

(अनुष्टुप्)

नत्वा प्रणतनागेन्द्रं पार्श्वनाथं जिनेश्वरम् ।
चिन्तामणिसुमन्त्रस्य वक्ष्ये कल्पं समासत: ॥ २

चिन्तामणिर्मूलमन्त्र: कामधुक् कल्पपादप: ।
मन्त्रराज: सर्वकर्मा निधि: कामघटोऽपि च ॥ ३

कल्पवृक्षो महातेजाः, महाचितामणि र्नवः ।
कामधुक् कल्पराट् कर्म्मनिधिः कामघटोपि च ॥ ४

एतानि तस्य नामानि, मन्त्रशास्त्रपरायणैः ।
प्रथितानि प्रयत्नेन, ज्ञातव्यानि गुरोर्मुखात् ॥ ५

यस्य तस्य न दातव्यो, मन्त्रोऽयं गुरुणापि हि ।
यतः कुपात्रदानेन, दोषाः स्युरुभयोरपि ॥ ६

कुलीनं धार्मिकं भक्तं, पूजाकर्मरतं तथा ।
धनिनं दानशीलं च गुरोर्वचनतत्परम् ॥ ७

ईदृशं साधकं ज्ञात्वा, मूलमन्त्रं प्रकाशयेत् ।
विधाय परमां पूजां दीपोत्सवादिकर्मणि ॥ ८

लब्धे मन्त्रे ततो धीमान्, श्रीमत् पार्श्वजिनप्रभोः ।
विधायष्टाह्निकां पूजां, गुरो र्वस्त्रैश्च पूजनम् ॥ ९

सौवर्णे राजते पात्रे, ताम्रपात्रे सिताम्बरे ।
कर्पूररोचनावर्णै, र्लिखेत् यन्त्रं प्रयत्नतः ॥ १०

गुरुः प्रतिष्ठयेत् यन्त्रं, पूजां कर्तुं समुद्यते ।
शिष्ये पवित्रगात्रे तु, धौताम्बरावृते(ऽथ) मुखे ॥ ११

शुचिस्थाने न्यसेत् यन्त्रं, देवालये सुनिश्चलम् ।
पूर्वोत्तरमुखो भूत्वा, श्रीपर्णीपट्टके स्थितः ॥ १२

आत्मरक्षां विधायोच्चैर्भूमिशुद्धिं प्रकल्पयेत् च ।
हंसपूजां ततः कृत्वा, पुष्पं शिरसि धारयेत् ॥ १३

इडायां वहमानायां, ततः पूजां समारभेत् ।
दक्षिणा वर्त्तमाना चेत् कृत्वा स्नात्रविधिं पुरा ॥ १४

वीरासनोपविष्टेन पूजा कार्या सुधीमता ।
वामेतरकराङ्गुष्ठपवित्राङ्गुलियोजनात् ॥ १५

शतपत्रैर्जातिपुष्पैर्बकुलैश्चम्पकैस्तथा ।
कर्पूरागरुसंमिश्रैः, पूजा कार्या विवेकिना ॥ १६

अथाहं संप्रवक्ष्यामि यन्त्रोद्धारं सुशोभनम् ।
येन विज्ञातमात्रेण, फलसिद्धिः प्रजायते ॥ १७

मध्ये भागे प्रभो बिम्बं, फणिमण्डपराजितम् ।
पार्श्वयक्षो यक्षिणी च, दक्षिणोत्तरभागयोः ॥ १८

प्रणवाद्यं प्रभोर्नाम, ह्रीँ नमः इति संयुतम् ।
फणिचक्रोपरि न्यासे, प्रथमं वलयं मतम् ॥ १९

चतुर्दलं द्वितीयं तु, वामादेवीति नामकम् ।
आह्वानेनाख्यमन्त्रोयं, तार्तीयकं चतुर्दलम् ॥ २०

प्रणवाद्यं चतुर्थं तत्, ह्रीँ नमः इति संयुतम् ।
ब्रह्मधरणनागाश्च, पद्मावत्यपि नामतः ॥ २१

षोडशार्द्धदलं तूर्ये मूलमन्त्रसमन्वितम् ।
अ आ आदौ अं अः अन्ते दले दले स्वरद्वयम् ॥ २२

पञ्चमे वलये पञ्च पदानि परमेष्ठिनाम् ।
ॐ नमो ह्रीँ नमः इति पदाद्यन्ते ज्ञानादि च ॥ २३

षष्ठे षोडश नामानि, देवीनां प्रणवैः सह ।
ह्रीँ नमोथ प्रविष्टानि रोहिण्यादि दले दले ॥ २४

प्रणवो मरुदेव्यादि सप्तमे जिनमातरः ।
चतुर्थ्यन्त पदै र्युक्ता, पत्रे पत्रे तु ह्रीँ नमः ॥ २५

अष्टमे वलये चाष्टौ, द्विगुणानि ग्रहैः सह ।
विजयाद्यैकान्तरितः, प्रणवो ह्रीँ नमस्तथा ॥ २६

नवमे वलये चाष्टा, इन्द्राद्याः प्रणवैः सह ।
ह्रीँ नमश्चात्र सर्वत्र, चतुर्थकवचः पुनः ॥ २७

मायाबीजेन संवेष्ट्य, प्रणवेन तथोपरि ।
अङ्कुशं चापि रेखान्ते, विद्यामन्त्रेण वेष्टयेत् ॥ २८

पृथ्वीमण्डलमध्यस्थं लक्षाक्षरत्रिशूलयुक् ।
कल्पद्रुमसमायुक्तं गुरुपादुकयान्वितम् ॥ २९

यन्त्रोद्धारः समासेन विवृतो मन्दमेधसा ।
जापध्यानक्रमं वच्मि, विधिवत् गुरुणोदितम् ॥ ३०

अर्वाचीनफलं ज्ञेयं वश्यस्तम्भनमोहनैः ।
विद्वेषोच्चाटकर्माणि, मनसापि न चिन्तयेत् ॥ ३१

शान्तिकं पौष्टिकं चापि, धर्मध्यानविवर्द्धकः(कैः) ।
इहलोकार्थकृत् नित्यं, संघकार्ये विशेषतः ॥ ३२

करजापो द्विधा ज्ञेयः, सृष्टिसंहाररूपतः ।
नन्दावर्त्तः शुभे कार्ये, शंखावर्त्तस्तु मङ्गले ॥ ३३

अथालम्बनहेतुत्वात्, शुद्धस्फटिकमालया ।
कुर्याज्जापं प्रयत्नेन, कर्मक्षयनिबन्धनम् ॥ ३४

अक्षतैः कुसुमैश्चापि, जापः कार्यो निरन्तरः ।
मूलमन्त्रस्य यत्नेन, परलोकविदित्सया ॥ ३५

ध्यानकाले प्रथमतश्चन्द्रकान्तसमप्रभम् ।
पार्श्वनाथप्रभोर्बिम्बं, संस्थाप्य प्रविचिन्तयेत् ॥ ३६

आत्मनश्च प्रभोश्चापि नान्तरं चिन्तयेद् बुधः ।
दुग्धधाराप्रवाहैश्च, सिंच्यमानं विचिन्तयेत् ॥ ३७

मूलमन्त्रस्य बीजानि, षट्सु स्थानेषु योजयेत् ।
शिरसि वक्षकरयोः सृष्टिमार्गेण धीमतैः ॥ ३८

नादबिन्दुकलाभ्यासात् ज्योतिरुत्पद्यते पुनः ।
तत्प्राप्तौ च मनुष्याणां, जायते परमं पदम् ॥ ३९

परमेष्ठिमुद्रया च, सौभाग्यमुद्रयाथवा ।
ध्यायेत् परमबीजानि, साधकः सुसमाहितः ॥ ४०

दश त्रिंशद्विंशहितैः, सहस्रै र्लक्षयाथवा ।
जपेत् यः परममन्त्रं स प्राप्नोति शिवालयम् ॥ ४१

विद्यासौभाग्यमारोग्यपुत्रप्राप्तिविभूतयः ।
कल्याणं सफलं विद्धि करुणां च कुटुम्बिनः ॥ ४२

विधाय सकलां पूजां, प्रभोश्चिन्तामणेरपि ।
ढौकयित्वाथ नैवेद्यं जलताम्बूलसंयुतम् ॥ ४३

ततः कर्पूरफालिनि, घण्टानादपुरस्सरम् ।
आरात्रिकं विधायोचै, मङ्गलं च प्रभोः पुरः ॥ ४४

लवणाञ्जलमुत्तार्य स्तुयात् स्तोत्रैः सदण्डकैः ।
पञ्चाङ्गप्रणतिं कृत्वा, योजयेत् करसंपुटम् ॥ ४५

माता-पिता जगत्राता भ्राता स्वामी त्वमेव मे ।
त्वमेव जीवितं नाथ !, भूयाः जन्मनि जन्मनि ॥ ४६

श्रीमानतुङ्गशिष्येण धर्मघोषेण सूरिणा ।
रचितोऽनघकल्पोयं चिन्तामणिजगत्प्रभोः ॥ ४७

पू. आ. श्रीधर्मघोषसूरिविरचितः

## ५३. ॥ श्रीपार्श्वनाथमालामन्त्रस्तवः ॥

वरमन्त्र (धर्म) कीर्तितविद्यानन्दत्यपीह यन्नाम ।
तं नौमि नम्रपाश्र्वं पाश्र्वं देवेन्द्रनुतपार्श्वम् ॥ १

ॐमिति नमो भगवते पार्श्वतीर्थङ्कराय भवताते ।
धरणेन्द्रयुजा पद्मावत्या सहिताय चैह्येहि ॥ २

यक्षं सयक्षिणीकं राक्षसमनु राक्षसीं तथा भूतम् ।
भूतीं पिशाचमत्र पिशाचीं कुष्माण्डकुष्माण्ड्यौ ॥ ३

नागं नागीं ज्वरकं ज्वरीमपस्मारमप्यपस्मारीम् ।
प्रेतं च प्रेतीं ब्रह्मराक्षसं ब्रह्मराक्षसिकाम् ॥ ४

गन्धर्वं गान्धर्वीं भृङ्गरीटभृङ्गरीटिकासुभटम् ।
चामुण्डां चर्ममहाचण्डां.....सप्तमातृकिकाम् ॥ ५

दुष्टमहासप्तकमातृकां महारोहिणीं सरोहिणिकाम् ।
सूर्यग्रहं भृशं गृह्णि गृह्णि समहेश्वरग्रहकम् ॥ ६

लघु गृह्णि गृह्णि चैकाहिकज्वरं द्व्याह्निकं त्र्यहप्रभवम् ।
दुष्टं चातुर्थिकमपि विषमज्वरमर्द्धमासभवम् ॥ ७

मासिक-सांवत्सर-वात-पित्तिक-श्लेष्मसन्निपातभवान् ।
एह्येहि शीघ्रमिह हन हन दह पच पच च्छिन्द ॥ ८

छिन्दय भिन्दय भिन्दय मारय मारय च मङ्क्षु भक्षय च ।
भक्षय शोषय शोषय प्रज्वल संसम्प्रज्वलान्हाय ॥ ९

ॐ मन्तस्थं नामाग्निकुण्डगं बाह्यतोऽष्टसु दलेषु ।
ह्रीँमादिवर्णपूर्णं स्वाहावृतमस्यरपवो (?) दुष्टः ॥ १०

नागेन्द्रयुजा पद्मावत्या वेष्टितमिहाहि-भोगाभ्याम् ।
मुखनाशाश्वासाहितविहायसीत्यष्टदलकमले ॥ ११

ध्यायत शिवदं पार्श्वं शिवैरिव शिवङ्करैरिहाँ ह्रीँ श्रीँ ।
प्रैँ प्रौँ क्रौँ क्रीँ क्रूँ फट् स्वाहेति शिवप्रमितवर्णैः ॥ १२

इति तमसोऽन्तकृतेऽस्मै नमो नमो भगवते पार्श्वनाथाय ।
क्षेमङ्कराय पदं ह्रीँ नमतः स्वाहा भुजोऽपि स्युः ॥ १३

पू.आ.श्री धर्मघोषसूरिविरचितम्

## ५४. ॥ श्रीपार्श्वदेवस्तवनम् ॥

(शार्दुलविक्रीडितम्)

विध्वस्ताखिलकर्मजालविलसत्सज्ज्ञानसद्दर्शनं
ज्योतीरूपमरूपगन्धमरसं स्पर्शादिभिर्वर्जितम् ।
सिद्धावस्थमवस्थितातुलसुखं वर्यैकवर्यात्मकं
निस्सीमातिशयप्रभावभवनं श्रीपार्श्वनाथं स्तुवे ॥ १

क्वाऽयं ते जिनराज ! राजकिरणग्रामाभिरामः स्तवः
क्वाऽहं प्रातिभसौरभस्फुरदुरुप्रज्ञाविहीनः प्रभो ! ।
किन्तु त्वद्गुणराशिरक्तहृदयस्तत्र प्रवृत्तोऽस्म्यहं
शक्याशक्यविचारणासु विकलः प्रायो हि रागी जनः ॥ २

विध्वस्तामय ! निर्जितेन्द्रियहय ! प्रक्षीणकर्माश्रय !
श्रीलीलालय ! निर्मितस्मरजय ! स्याद्वादविद्यामय !

मिथ्यात्वप्रलय ! प्रहीणविषय ! स्फूर्जत्त्रिलोकीदय !
श्रीपार्श्व ! स्मयरोषदोषकुनयध्वंसिन् ! सदा त्वं जय ॥ ३

किं कारुण्यमयी किमुत्सवमयी किं विश्वमैत्रीमयी
किं वाऽऽनन्दमयी किमुन्नतिमयी किं सौख्यरेखामयी ? ।
इत्थं यत्प्रतिमां समीक्ष्य भविनश्चेतश्चिरं तन्वते
स श्रीपार्श्वजिनस्तनोतु विशदश्रेयांसि भूयांसि नः ॥ ४

आधिव्याधिविरोधिवारिधियुधि व्यालस्फटालोरगे
भूतप्रेतमलिम्लुचादिषु भयं तस्येह नो जायते ।
नित्यं चेतसि 'पार्श्वनाथ' इति हि स्वर्गापवर्गप्रदं
सन्मन्त्रं चतुरक्षरं प्रतिकलं यः पाठसिद्धं पठेत् ॥ ५

त्वं देवः शरणं त्वमेव जनकस्त्वं त्वं गुरुस्त्वं सुहृत्
त्वं बन्धुस्त्वमसि प्रभुस्त्वमसवस्त्वं मे गतिस्त्वं मतिः ।
तत् किं पार्श्वविभो ! पुरःस्थितमपि त्वं सेवकं किङ्करं
मामद्यापि लसद्दयारसिकया दृष्ट्यापि नो वीक्षसे ? ॥ ६

शस्योऽयं समयः क्षणोऽयमनघः पुण्या त्वियं शर्वरी
श्लाघ्योऽयं दिवसो लवोऽयममलः पक्षोऽयमर्चास्पदम् ।
मासोऽयं विशदः समाः स्फुटमिमाः श्रीपार्श्व ! विश्वप्रभो !
यत्र त्वद्वदनं व्यलोक्यत मया निःशेषसौख्यावहम् ॥ ७

धन्योऽहं कृतकृत्य एष नृभवस्तीर्णो भवाम्भोनिधि-
र्विध्वस्तान्तरवैरिवारविषयो लब्धस्त्रिलोकोदयैः ।
श्रीमत्पार्श्वविभो ! सदा त्रिजगतीविश्रामभूरप्यहो
यस्त्वं हंस इवाऽधुना विदधसे मन्मानसे संस्थितिम् ॥ ८

इत्थं त्वा सितधर्मकीर्त्तिभवनं स्तुत्वेदमभ्यर्थ्यते
श्रीमत्पार्श्वजिन ! त्वयापि हितदा यस्मै कृते तत्यजे ।
प्राज्यं राज्यमनिर्बला च कमला शुद्धान्तबन्ध्वादिकं
विद्यानन्दपदाय संस्पृहयति तस्मै मदीयं मनः ॥ ९

पू.आ.श्री धर्मसूरिविरचितम्

## ५५. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(शार्दुलविक्रीडित)

कस्तूरीतिलकं भुवः परिभवत्राणैककल्पद्रुमः
श्रेयःकन्दनवाम्बुदस्त्रिजगति वैडूर्यरत्नाङ्गदः ।
विघ्नाम्भोजमतङ्गजः कुवलयोत्तंसः स्ववंशश्रिया
नेत्राणाममृताञ्जनं विजयते श्रीपार्श्वनाथः प्रभुः ॥ १

उत्सर्पन्नयमङ्गलैकनिलय ! त्रैलोक्यदत्ताभय !
प्रध्वस्तामय ! विश्वविश्रुतदय ! स्याद्वादविद्यालय ! ।
उद्दामातिशय ! प्रसिद्धसमय ! प्रक्षीणकर्मोच्चय !
प्रोन्मुक्तस्मय ! भव्यकैरववनीचन्द्रोदय ! त्वं जय ॥ २

ये मूर्तिं तव पश्यतः शुभमयीं ते लोचने लोचने
या ते वक्ति गुणावलीं निरुपमां सा भारती भारती ।
या ते न्यञ्चति पादयोर्वरदयोः सा कन्धरा कन्धरा
यत्ते ध्यायति नाथ ! वृत्तमनघं तन्मानसं मानसम् ॥ ३

किं स्नात्रैरलमङ्गरागविधिभिः कार्यं किमभ्यर्चनैः
पर्याप्तं स्तुतिभिः कृतं प्रणतिभिः पूर्णं कलोद्गीतिभिः ।

वक्त्रेन्दौ तव चेच्चकोरयुवतिप्रीतिं दृशौ बिभ्रतः
स्वान्तं चेत्तव पादपङ्कजयुगे धत्तेलिलीलायितम् ॥ ४

कान्तिः कापि कपोलयोर्विमलयोः श्रीः कापि सौम्ये मुखे
छाया कापि विशालयोर्नयनयोर्भा काऽपि कण्ठेऽनघे ।
शोभा काऽप्युरसि स्थिरे सरलयोर्बाह्वोः किमप्यूर्जितं
त्रैलोक्यैकशरण्ययोश्चरणयोस्ते देव ! किं ब्रूमहे ॥ ५

किं पीयूषमयी किमुन्नतिमयी किं कल्पवल्लीमयी
किं सौभाग्यमयी किमक्षरमयी किं विश्वमैत्रीमयी ।
किं वात्सल्यमयी किमुत्सवमयी किं लब्धिलक्ष्मीमयी
दृष्ट्वेत्थं विमृशन्ति ते सुकृतिनो मूर्त्तिं जगत्पावनीम् ॥ ६

स्वामिन् ! दुर्जयमोहराजविजयप्राविण्यभाजस्तव
स्तोत्रं किं कमठोरुदर्पदलने श्रीपार्श्व ! विश्वप्रभो ! ।
तिग्मांशोर्यदि वा स्फुरद्ग्रहमहः सन्दोहरोहद्द्रुहः
खद्योतद्युतिसंहृ(धृ)तिश्रु(स्तु)तिपदे वर्त्तेत किं कोविदः ॥ ७

सश्रीकात् तव वक्त्रदुग्धजलधेरुद्भूतमत्यद्भुतं
मोहोच्छेदकतत्त्वसप्तकवचः पीयूषमित्यादृतः (पात्रं धृतः) ।
विश्वेभ्यः फणभृद्विभुः फणिमणिव्याजात् प्रफुल्लत्फणा-
पात्रीभिः पृथुभिर्विभाति परितः स्वामिन् ! प्रयच्छन्निव ॥ ८

किं मन्त्रैर्मणिभिः किमौषधगणैः किं किं रसस्फातिभिः
किं वा संवननैः किमञ्जनवरैः किं देवताराधनैः ।
जन्तूनामिह पार्श्वनाथ इति चेन्नित्यं मनोमन्दिरे
कल्याणी चतुरक्षरा निवसति श्रीसिद्धविद्याऽद्भुता ॥ ९

भास्वन्तं परमेष्ठिनं स्मररिपुं बुद्धं जिनं स्वामिनं
क्षेत्रज्ञं पुरुषोत्तमं गणविभुं सौम्यं कलाशालिनम् ।
योगीन्द्रं विबुधाधिपं फणिपतिं श्रीदं गिरामीश्वरं
ज्योतीरूपमनन्तमुत्तमधियस्त्वामेव संवेदते ॥ १०

रूपादौ विषये विदन् गुणवतां त्वं न्यायविद्यागुरु-
र्ब्रह्माद्वैतमुदाहरन्निह भवान् मीमांसकग्रामणीः ।
भावानां परिभावयन् क्षणिकतां बौद्धाधिपस्त्वं विदं-
स्त्वं कर्मप्रकृतीः पृथक् पुरुषतः कैवल्यमाशिश्रयः ॥ ११

त्वं कारुण्यनिधिस्त्वमेव जनकस्त्वं बान्धवस्त्वं विभु-
स्त्वं शास्ता त्वमचिन्त्यचिन्तितमणिस्त्वं देवता त्वं गुरुः ।
त्वं प्रत्यूहनिवारकस्त्वमगदङ्कारस्त्वमालम्बनं
तत् किं दुःस्थमुपेक्षसे जिनपते ! श्रद्धालुमेनं जनम् ॥ १२

शिष्यस्ते तव सेवकस्तव विभो ! प्रेष्यो भुजिष्यस्तव
द्वाःस्थस्ते तव मागधस्तव शिशुस्ते देव ! सौस्नातिकः ।
पत्तिः पार्श्वजिनेश ! ते नुत(ननु) तवायत्तोऽस्मि मामादिश
स्वामिन् ! किं करवाणि पाणियुगलीमायोज्य विज्ञापये ॥ १३

स्वःश्रीरिच्छति चक्रवर्त्तिकमलाभ्येति स्थितिः सेवते
कीर्त्तिः श्लिष्यति संस्तुते सुभगता पुष्णाति नीरोगता ।
नित्यं वाञ्छति खेचरत्वपदवी तीर्थेशलक्ष्मीरपि
त्वत्पादाब्जरजःपवित्रिततनुः सप्रश्रयं वीक्षते ॥ १४

नो कीर्त्तिं त्रिदिवाधिपत्यमपि नो नो चक्रवर्त्तिश्रियं
सौन्दर्यं न न पाटवं न विभवं नो विष्टपप्राभवम् ।

नो सर्वौषधिमुख्यलब्धिनिवहं नो मुक्तिमभ्यर्थये
किं तु त्वच्चरणारविन्दयुगले भक्तिं जिन ! स्थेयसीम् ॥ १५

इत्थं भूमिभृदश्वसेनतनय ! श्रीपार्श्व ! विश्वप्रभो ! ।
श्रीवामात्मज ! सुप्रवर्त्तितनय ! श्रीधर्मघोषस्तुत ! ।
ये कुर्वन्ति तव स्तवं नवनवं प्रीत्युल्लसन्मानसा-
स्तेभ्यस्त्वं नतवत्सलो निजपदं दद्यास्त्रिलोकीविभो ! ॥ १६

पू.आ.श्री विबुधविमलसूरिविरचितम्

## ५६. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(वंशस्थ)

श्रियायुतं पार्श्वजिनेश्वरं वरं,
सुरेन्द्रवृन्दस्तुतपादपङ्कजम् ।
गुणाकरं दोषविमुक्तमानसं,
मुदा स्तुवे तं जगदीशमच्युतम् ॥ १

स्तुतिं त्वदीयां गुरुवाक्यगोचरां,
प्रवक्तुमीशो जडधीरहं कथम् ? ।
न यस्य कार्ये हि विमृश्यकारिता,
स एव मूर्खो विदुषा प्रगीयते ॥ २

स्तवं विधायैव चितश्च मां विना,
भवेत्कृतार्थोऽयमगान वाङ्मुखे ।
ममेति मत्वा कृपयैव हि प्रसूः,
क्षणे स्तुते पार्श्वजिनेश्वरस्य किम् ? ॥ ३

अयं विमर्शो घटते न ते कदा,
त्वदागमे मातरिहैव शोभनम् ।
परोपकारे प्रकृतिर्ध्रुवं सतां,
धुरि स्थितः त्वं हि परोपकारिणाम् ॥ ४

स्तुवे कथं त्वां करुणासरित्पति-
मवस्थितध्यानधिया मनस्विनाम् ।
धृतं क्षणं मे न मनः स्थिरं हि कै-
श्चले जलेऽर्कप्रतिबिम्बमिष्यते ॥ ५

तथापि चेतःप्लवगप्रबन्धने,-
ऽमुकप्रयासः क्रियते मयाऽधुना ।
जिनेशपार्श्वस्मरणस्वरूपकः,
प्रतापिमोहक्रमशृङ्खलानिभः ॥ ६

जिनेन्द्रसत्पार्श्वरमेश्वरं वरं,
तथैव शङ्खेश्वरगोडिमण्डनम् ।
अवन्तिपार्श्वं कलिकुण्डठारणं,
भजेऽन्तरीकं वरकाणसञ्ज्ञकम् ॥ ७

नमामि पञ्चासरपार्श्वशङ्करं,
भटेवभाभो अमिभीडभञ्जनम् ।
मुढेरचिन्तामणिकोकथम्भणो
इतिहितं नाम ददत्सु बिभ्रतम् ॥ ८

अहो अरेऽस्मिन् विषमेऽपि पञ्चमे-
ऽश्वसेनवामातनुजोऽवलम्बनम् ।

भवोदधौ भीतिरतिप्रियभ्रमौ,
निमज्जतां प्राणभृतां त्वमीदृशाम् ॥ ९

सुतोऽसि मातुर्हरिभिः कृतस्तुतेः,
गुणैरनन्तैः परिपूर्णवर्ष्मणः ।
तव क्षितिख्यापितकीर्त्तिमण्डल-
स्त्वमेव मोहस्य रणाङ्गणेऽग्रणीः ॥ १०

तव प्रशंसाः क्रियते मया च काः,
न केवलज्ञानवतो विकर्मणः ।
प्रभो ! यदा छद्मदशाऽभवत्तदा,
भुजङ्गनाथे कमठे मनः समम् ॥ ११

स्वतीर्थसम्पत्प्रतिपादनक्षमे,
मनो मदीयं भवदीयपत्कजे ।
सदा वदान्ये हि रमस्व शाश्वते,
यतो न याचे भवतः पुरोऽधिकम् ॥ १२

नमस्कृतेरास्यविधोरभूदही,-
श्वरो विभो ! यस्य विहाय तं क्व चित् ।
भवादृशं स्वामिनमिष्टदायिनं,
जनाः क्व चान्यत्र सुखाद् भ्रमन्ति किम् ॥ १३

यथा कथायां नृपते रतिस्तव,
तथा प्रभोः पार्श्वजिनेश्वरस्य किम् ? ।
यथा व्यथायां वपुषो रतिर्भवे,
तथा कथं नाथ ! नुतिर्विधास्यते ? ॥ १४

गुणाय भक्तेष्टविधायिनस्तव,
सुसंस्तवो दूरतरेऽस्तु सेवना ।
त्वया विरोधः कमठस्य पाप्मनः,
सुदर्शनायाघविनाशकारिणे ॥ १५

अतीन्द्रियाऽऽस्ते गुणसन्ततिस्त्वयि,
प्रतीयते चर्मदृशा न सा कथम् ? ।
त्वदाकृती रूपमयी रमाश्रिता,
विमोहितानेकशचीशचीवरा ॥ १६

स्तुमोऽश्वसेनक्षितिरक्षिणं वयं,
क्षणे क्षणे तं हतशत्रुदुष्कृतम् ।
कुलाम्बरे यस्य विलक्षणो विधु-
र्भुजङ्गमाङ्कः समजायत प्रभुः ॥ १७

जगत्प्रशस्या जननी जगत्पितु-
र्महासती मन्दरशैलसन्निभा ।
त्वमेव वामे ! भुवि भानुरत्नसू-
र्नमोऽस्तु तुभ्यं नृपवासवार्चिते ! ॥ १८

समुद्धृताशेषजगन्निवासिको,
विभुश्च्युतो द्युर्दशमादवातरः ।
मधोश्चतुर्थीदिवसे सितेतरे,
प्रजापवित्रीकरणाय भूतले ॥ १९

मुनीश ! पौषीदशमी स्वदस्युहा,
न कस्य शस्या विशदापि शासिता ।

जिनोऽजनिष्टस्तिलकस्त्रिविष्टपे,
त्वमाशु यस्यां भुविसम्पदः सृजन् ॥ २०

प्रवर्तयाऽभीरिति तीर्थमार्हतं,
निशम्य लोकान्तिकदेवभारतीम् ।
सहस्यमासस्य दिने सिते शुभे,
त्रिशूलिसङ्ख्यातिथिगे व्रतं न्यधाः ॥ २१

मधोश्चतुर्थीतिथिरिन्द्रदिङ्मता-
ऽसिताप्यपूर्वा भविनां प्रकाशकृत् ।
विभोर्विवस्वानिव यत्र शाश्वतै-
रनन्तपादैरुदियाय केवलम् ॥ २२

शुभाष्टमी श्रावणमासवासिनी,
यथार्थसम्पूर्णविलासशंसिनी ।
बभूव शुभ्रा भुवनेऽहिलक्ष्मणः,
सुतीर्थनाथस्य हताष्टकर्म्मणः ॥ २३

अभूद्विशाखा ह्यशुभं श्यतीति सा,
विशेषतो भव्यशरीरिणां तदा ।
यदात्र वामातनुजन्मनः प्रभो-
र्बभूव कल्याणकपञ्चकं वरम् ॥ २४

विशाखतीयं रुचिरं वपुष्मतां,
भवेद्विशाखार्थयथार्थनामभृत् ।
अवाप यस्यां परमाः सुसम्पदो,
यतो जिनेन्द्र ! स्तुमहे वयं तु ताम् ॥ २५

शतं शमानां परिपाल्य जीवितं,
जगाम नाथोऽभयदोऽपुनर्भवम् ।
मनोहरानन्तचतुष्टयीश्रितं,
सुरद्रुचिन्तामणिकुम्भतोऽधिकम् ॥ २६

अपावि काशी भवता स्वजन्मना,
क्रमाम्बुजन्यासपवित्ररेणुकाः ।
महोदयोत्कण्ठितमानसा जना,
न तामनुञ्चन्नुचितं हि साम्प्रतम् ॥ २७

यदा जिन ! स्नानमकारि मन्दरे,
यदम्बुपूरैर्हरिभिस्तदाऽऽगमत् ।
सदाभिषेकोदकधारयैव सा,
नभःसरित्त्वामिह नाथ ! सेवितुम् ॥ २८

सुपर्वनाथैर्विदधे बृहन्मह-
स्त्रिविष्टपाद्यत्र परिच्छदैर्युतैः ।
अबोभवीत्सा नगरी गरीयसी
यदाददे पार्श्वजिनो महाव्रतम् ॥ २९

तिरस्कृतश्याममणिच्छविच्छवि-
ज्वलत्तडिद्दन्ततिद्युतिस्तनुः ।
सुदेशनागर्ज्जितनिःस्वना प्रभो-
र्घनागतिर्भव्यमनोरथास्पदे ॥ ३०

सुनिश्चलध्याननिलीनमानसः,
कृतोपसर्गः कमठेन पाप्मना ।

यदा तदाऽभूत्परमं हि केवलं,
तवेक्षमाणं भवचक्रनर्तनम् ॥ ३१

अशोकदिव्यध्वनिपुष्पचामरा-
तपत्रसिंहासनदुन्दुभिप्रभम् ।
अदोऽष्टकं ते प्रतिहाररूपकं,
सदा समीपं सुरपूज्य ! सेवते ॥ ३२

पुरातनं कर्म मया व्यधायि यद्
विपद्दशाऽदायि भवेऽत्र येन मे ।
अपाचरीकृद् ह्युपकारचेतसां,
शिरोमणिस्तज्जिन ! वावदीमि किम् ? ॥ ३३

रसातले कुण्डलिलोकवासिनां,
सुरालये नाकसदां क्षितौ नृणाम् ।
स्वकीयभार्याजनसंयुतैर्गणैः,
प्रगीयते ते गुणराशिरन्वहम् ॥ ३४

(शार्दूलविक्रीडित)

जाग्रद्योगदशा शुभाशयवतां सद्ध्यानयुक्चेतसां,
श्रीपार्श्वेश्वरसेविनां तनुमतां पार्श्वाभिधो यक्षराट् ।
कल्याणं कुरुतात्सदा गुणवती पद्मावती श्रीमती
सूरिश्रीविबुधाभिधानविमलैः स्तोत्रं कृतं तत्प्रभोः ॥ ३५

पू.आ. श्री रत्नशेखरसूरिविरचितम्

## ५७. ॥ श्रीनवखण्डापार्श्वजिनस्तवनम् ॥

(उपजाति)

जय प्रभो ! त्वं नवखण्डपृथ्वीप्रख्यातकीर्ते ! नवखण्डमूर्ते ।
भव्याब्जभानो ! ऽनवखण्डसंविद् !
विश्वेश्वर ! श्रीनवखण्डपार्श्व ! ॥ १

ते तत्क्षणेनाऽनवखण्डमुच्चैर्विघ्नानशेषानवखण्डयन्ति ।
ये त्वां स्तुयुर्दानवखण्डनार्च्य ! विश्वेश्वर ! श्रीनवखण्डपार्श्व !॥२

(इन्द्रवज्रा)

माधुर्यधुर्या नवखण्डजैत्री गीस्तेऽघकार्शानवखण्डवारि ।
भात्युद्यदादीनवखण्डमाना विश्वेश्वर ! श्रीनवखण्डपार्श्व ! ॥ ३

(इन्द्रवज्रा)

नवप्रमुक्ताऽऽनवखण्डलौघैर्भक्त्या कृतोच्चैर्नवखण्डगद्भिः ।
श्रितान् भवार्त्तानव खण्डमुर्व्या विश्वेश्वर ! श्रीनवखण्डपार्श्व !॥४

आम्नाति नो मानवखण्डनादौ दर्पेण येऽन्यानवखण्डयन्ते ।
(येऽन्यानव ! खं ऽयन्ते)
गिरोऽपि तैस्तेऽनवखण्डनीया विश्वेश्वर ! श्रीनवखण्डपार्श्व !॥५

वितन्वते ते नवखण्डतिं ये स्वभक्तितोऽर्हन्नवखण्डमाशु ।
ते नित्यनिम्ना(स्ता)नवखण्डभन्ते विश्वेश्वर ! श्रीनवखण्डपार्श्व ! ॥ ६

व्याधींस्तथाधीनवखण्डसे तत् त्वमेव विश्वे नवखण्डहीनः ।
मनीषिणां मानवखण्डनार्हो विश्वेश्वर ! श्रीनवखण्डपार्श्व ! ॥७

इति स्तुतः श्रीनवखण्डनामभृत् प्रसिद्धघोघापुरभूविभूषणः ।
पार्श्वःप्रभुः श्रीगुरुसोमसुन्दरस्फुरद्यशाः शाश्वतसम्पदेऽस्तुवः ॥८

पू.आ. श्री रत्नशेखरसूरिविरचितम्

# ५८. ॥ श्रीवामेयस्तवनं नवग्रहस्तवगर्भम् ॥

(आर्या)

पार्श्वः श्रियेऽस्तु भास्वानजस्थितेरुच्चतां परां बिभ्रन् ।
विश्वप्रकाशकुशलः कुतुकं त्वतुलाश्रयः सततम् ॥ १

पार्श्वः स जयति सोमः परमोन्नतिभृद् वृषप्रयोगेण ।
शैवे शिरसि निवासी चित्रं तु तमोग्रहग्रासी ॥ २

श्रीपार्श्वं सद्वृत्तं नवार्चिषं नमत मङ्गलात्मानम् ।
पृथ्वीनन्दनमद्भुतमवक्रमर्पितबुधमुदं च ॥ ३

वामाभूः श्यामाङ्गः सौम्यः स्तादमृतसिद्धियोगकृते ।
मैत्रीप्रयोगतो वः कुतुकं तु कलावदुल्लासी ॥ ४

जगति गुरुः श्रीपार्श्वः शुभदृष्ट्या दोषलक्षमपि मुष्णन् ।
पुष्णन् श्रियं च जीयान्न कुत्रचिच्चित्रमतिचारी ॥ ५

गुरुपदलाभादुच्चः श्रीपार्श्वः श्रेयसेऽस्तु सत्काव्यः ।
दोषाकरविद्वेषी न जातु यात्यस्तमिति तु नवम् ॥ ६

परसिद्धियोगमसितस्तनुतां पार्श्वः प्रयोगतो ब्राह्म्याः ।
धर्मं पुष्णन् धर्माश्रयेण न पुनः क्वचिन्नीचः ॥ ७

दुरितभिदे दोषाकरतमोरिपुग्रासलालसः पार्श्वः ।
कीर्त्या विधुन्तुदस्तान्न क्रूरः कौतुकं क्वापि ॥ ८

श्रीवामेयोऽनवमस्त्रिजगति केतुः श्रियां परमहेतुः ।
जयतु स्फुरत्फणर्द्धिर्नवरं नित्योदयी शुभदः ॥ ९

श्रीपार्श्वस्तवमेवं नवग्रहस्तवनगर्भमध्येतुः ।
श्रीसोमसुन्दरमतेरप्यशुभाः स्युर्ग्रहाः शुभदाः ॥ १०

पू.आ.श्री ज्ञानविमलसूरिविरचितम्

श्रीचारूपमहातीर्थमण्डन-

## ५९. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

श्रीचारूपमहातीर्थ-स्थितं पार्श्वजिनेश्वरम् ।
स्तुवेऽहं परया भक्त्या श्रीपार्श्वयक्षसेवितम् ॥ १

नमेस्तीर्थकृतस्तीर्थे वर्षे द्विकचतुष्टये (२२२२) ।
अषाढश्रावकः शुद्धो गौडदेशनिवास्यभूत् ॥ २

तेन सम्यक्त्वशुद्ध्यर्थं कारितं प्रतिमात्रयम् ।
ताश्च कालान्तरेऽम्भोधि-मध्यस्था देवपूजिताः ॥ ३

ततः कान्तिपुरीस्थेन धनेशव्यवहारिणा ।
यानेन व्रजताम्भोधौ तद्यानं स्तम्भितं ततः ॥ ४

तदधिष्ठायकामर्त्य-स्तम्भिते यानपात्रके ।
पूजितव्यन्तरेणापि प्रोक्ते तत्कारणे सति ॥ ५

तस्याधस्तात्समाकृष्टा तीर्थकृत्प्रतिमात्रयी ।
तत्रैकं बिम्बं चारूप-ग्रामे तीर्थं प्रतिष्ठितम् ॥ ६

तन्नाम स्थापितं पूज्यै-श्चारूपपार्श्वतीर्थकृत् ।
जयति कलिकालेऽपि चारूपे कज्जलद्युतिः ॥ ७

अन्या च प्रतिमाऽरिष्ट-नेमिनः श्रीजिनेशितुः ।
श्रीपत्तने समानीय प्रासादान्तःप्रतिष्ठिता ॥ ८

तृतीया प्रतिमा जैनी स्थापिता स्तम्भने पुरे ।
स्तम्भनपार्श्वनाथः स कलौ कल्पतरूपमः ॥ ९

इत्येवं बिम्बत्रितयं त्रिवेण्या इव सङ्गमम् ।
गौडदेशीयाषाढाख्य-श्राद्धकारितमुत्तमम् ॥ १०

चारूपपार्श्वनाथोऽपि स जीयाज्जगतीतले ।
श्रीनेमिस्तम्भनाभिख्य-श्रीपार्श्वप्रतिमे इव ॥ ११

ततश्चारूपपार्श्वेश-प्रभावाज्जगदुत्तमात् ।
भवन्तु भव्यलोकानां श्रीज्ञानविमलर्द्धयः ॥ १२

(शार्दूलविक्रीडित)

चारूपाभिधपार्श्वनाथजिनपश्चारूपपूःसंस्थित-
इत्येवं स्तुतिसंस्तुतो हि मयका पञ्चाब्धिवाहेन्दुके (१७४५) ।
सद्वर्षे शुभधीरधीरविमलान्तेवासिना सन्मुदा
श्रीज्ञानाद्विमलाख्यसद्व्रतभृता जीयाज्जगत्यां सदा ॥ १३

पू.आ.श्री ज्ञानसागरसूरिविरचितः

## ६०. ॥ श्रीघोघामण्डनपार्श्वजिनस्तवः ॥

(वसन्ततिलका)

अम्भोधिवीचिचयचुम्बितभूमिभागे
घोघापुरे प्रथितधार्मिकधर्मरागे ।
जीयाज्जिनेश ! नवखण्डकृतावतार
श्रीपार्श्व ! विश्वविदितप्रभुतैकसार ! ॥ १

सर्वज्ञ ! धर्मपरिपूतमतिस्त्वमीश !
जातोऽपि पोतनपुरे मरुभूतिविप्रः (१) ।
भ्रात्रा शठेन कमठेन हतस्त्वटव्यां
मर्त्यो बभूविथ(२) तदा द्विपभद्रजातिः ॥ २

तत्राऽरविन्दमुनिकुञ्जरगीःप्रबुद्ध-
स्त्वं कुर्कुटोरगविषव्यथितो विपद्य ।
स्वर्लोकमष्टममभीष्टसुखप्रपूर्णं
तूर्णं स्वपुण्यगणढौकितमाश्रितोऽसि (३) ॥ ३

च्युत्वा सुकच्छविजये भगवान्नरेन्द्र-
विद्याधरः किरणवेगसुनामधेयः (४) ।
प्रव्रज्य पुष्करगतः प्रतिमाप्रपन्नो
दष्टोऽहिनाऽच्युतमगात् (५)गुरुसाम्यशाली ॥ ४

जम्बूसुगन्धिविजये जितवैरिवर्गः
श्रीवज्रनाभनृपतिर्यतिताऽधिरूढः (६) ।
दुष्कर्मपूरितकुरङ्गकभिल्लविद्धो
ग्रैवेयकं(७)त्वमगमः समशत्रुमित्रः ॥ ५

प्राच्यां विदेहसुरपूर्वपुरे सुवर्ण-
बाहुर्भवानजनि(८)चक्रिरमाभिरामः ।
सिंहोपसर्गमधिसह्य मुनीन्द्रभावे-
ऽभूत् प्राणते दिविसुरो(९)वरभोगयोगः ॥ ६

दिव्यानुभावमनुभूय ततोऽवतीर्णो
वाणारसीपुरि जगत्प्रभुतां दधानः ।

कल्याणकैः कृतमहासुखसंविभाग-
लोकोत्तरातिशयराजिविराजमानः ॥ ७

इक्ष्वाकुवंशनृपतिप्रभुचाश्वसेन-
वामासुतः कमठदर्पमलापहारी ।
भोगीन्द्रलाञ्छन ! मनोरमनीलवर्ण !
पार्श्वप्रभो (१०) ! जय चिरं जनताशरण्य ! ॥ ८

पद्मावतीधरणराजनिषेव्यमाण
पार्श्वद्वयोत्तम जयाविजयाभिवन्द्य ! ।
अङ्गीकृतैकनवखण्डसुनामधेयोऽ-
प्याखण्डलानत ! सुखं विदधास्यखण्डम् ॥ ९

मिथ्यादृशोऽपि भगवन् ! भवदाधिपत्यं
दृष्ट्वा भवन्ति सुदृशो लघुकर्मकास्ते ।
म्लेच्छादिपामरजना बहुमानयन्ति
देवं भवन्तमनिशं प्रकटप्रभावम् ॥ १०

काले कलौ लसति सीदति साधुवर्गे
कामं खले प्रभवतीह समानुभावात् ।
दौस्थ्यादिदोषकलुषे क्षितिमण्डलेऽपि
त्वं जागरूकमहिमा जयसि प्रकामम् ॥ ११

कल्पद्रुमस्तव पुरः प्रथितोऽल्पदायी
चिन्तामणिः स खलु काममणुप्रभावः ।
सा कामधेनुरपि कल्पितकीर्त्तिमात्रं
स्वर्गापवर्गसुखदायक ! विश्वबन्धो ! ॥ १२

सत्पूजनस्तवनचिन्तनपुण्यकृत्यै-
र्योगत्रयं जिन ! वपुर्वचनं च चित्तम् ।
त्वत्पर्युपास्तिनिरतं कृतिनो ध्रुवं स्यात्
श्रद्धानुबोधचरणात्मकयोगशुद्ध्यै ॥ १३

देव ! त्वदीयचरणप्रणतोत्तमाङ्ग-
सङ्क्रान्तरेणुकणरक्षितसर्वगात्राः ।
पात्रं भवन्ति भविनो न मनागपीह
चोरारिमारिवधबन्धकदर्थनानाम् ॥ १४

मिथ्यात्वमोहपटलोपचयादनन्त-
वृद्ध्याविशुद्धिमुपगच्छत एव देव ।
प्राप्तोऽसि दर्शनपथं कथमप्यधीश !
माऽतः परं भवममान्तरितः कदाचित् ॥ १५

पुण्यामोघ सुघोष घोघनगरालङ्कारचूडामणे !
पार्श्व ! श्रीनवखण्डपिण्डित ! तमोनिर्नाशभानूदय ।
एवं बालकचापलं कलयता मौढ्यात् त्रिलोकीपित-
र्विज्ञप्तः किमपि प्रभो ! त्वमधुना मे बोधिलाभं कुरु ॥ १६

(शा.वि.)

पू.आ.श्री कल्याणसागरसूरिविरचितम्

चतुर्थपादावृत्तियुक्तम्

## ६१. ॥ श्रीअन्तरिक्षपार्श्वनाथस्तवनम् ॥

(इन्द्रवज्रा)

विश्वेश्वरं विश्वजनेशपूज्यं सर्वार्थनिष्पादनकामकुम्भम् ।
प्रख्यातिमन्तं महिमौघलक्ष्म्या पार्श्वं भजे संस्थितमन्तरिक्षे ॥१

कल्याणमालागृहमङ्घ्रिदेव–विद्याधराधीशनुतांह्रिपद्मम् ।
सर्व्वत्र राष्ट्रेषु विशालकीर्त्तिं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ २

रोगाधिचिन्तार्त्तिसमूहतापभैषज्यमाचारविचारसूरिम् ।
सन्नीलरत्नच्छविभूषिताङ्गं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ ३

संसारसिन्धौ वरयानपात्रं मुक्त्यङ्गनासक्तहृदं शरण्यम् ।
वामाङ्गजातं जगतीप्रदीपं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ ४

श्रीपार्श्वयक्षाधिपमद्वितीयं श्रीशालिनं सेरपुरावतंसम् ।
वाचासुधाकर्षितसभ्यलोकं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ ५

त्रैलोक्यकोटीरमनाथनाथं दारिद्र्यवाताहिमनन्तशक्तिम् ।
शास्त्रार्थनैपुण्यनिधिं दयालुं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ ६

पद्मावतीसेवितपादयुग्म–मंहोभरध्वान्तिदिनेशमाशु ।
लावण्यसौभाग्ययशोभिराढ्यं पार्श्वं भजे संस्थितमन्तरिक्षे ॥७

ज्ञानादिधर्माभरणं वरेण्यं सद्बोधदानादिकमार्गपान्थम् ।
आनन्दवल्लीततिवारिधारं पार्श्वं भजे संस्थितमन्तरिक्षे ॥ ८

कलशः । (स्रग्धरा)

इत्थं ये देववन्द्यं विविधसुखकरं चान्तरिक्षाख्यपार्श्वं
नित्यं ध्यायन्ति भक्त्या हृदयरतियुजो भाग्यवन्तो नरोऽपि ।
लक्ष्मीस्तेषां निकाय्ये वसति दृढतया सर्वदा कामकर्त्री
कल्याणश्रेणिकर्त्तुर्भुवि विदिततरा सर्वसम्पत्तिकान्ता ॥ ९

पू.आ.श्री कल्याणसागरसूरिविरचितम्
चतुर्थपादावृत्तियुक्तम्

# ६२. ॥ श्रीगौडिकपार्श्वनाथाष्टकम् ॥

(शार्दूलविक्रीडित)

वामेयं मरुदेशभूषणतरं श्रीपार्श्वयक्षार्चितं
कल्याणावलिवल्लिसिञ्चनघनं श्रीक्ष्वाकुवंशोद्भवम् ।
आराद्राष्ट्रसमागतैर्नरवरैः संसेवितं नित्यशः
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ १

नानासाधुजनौघपङ्कजवने मार्त्तण्डबिम्बायितं
विघ्नव्यूहनिवारकं कलियुगे प्राप्तप्रतापालयम् ।
विश्वस्मिन् प्रथितावदातनिकरं निर्दोषपुण्योज्वलं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ २

सम्पच्छ्रेणिसुदानकामकलशं त्रैलोक्यचिन्तामणिं
सद्वाचामृतरञ्जितामरनरं सद्धर्म्मबोधप्रदम् ।
सौभाग्याद्भुतकान्तिकीर्त्तियशसा सम्पूरिताशान्तरं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ३

मार्गे चान्तरभीतिवारिनिचिते क्षेमङ्करं सर्वदा
दारिद्र्याद्रिनिपातनात्तकुलिशं चिन्तार्त्तिरोगापहम् ।
दुःखत्राससमीरणौघभुजगं नागाङ्कमंहोमथं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ४

कारुण्याञ्चितचारुचित्तकमलं सत्त्वेषु संसारिषु
सद्धैर्यादिगुणैरलङ्कृततनुं लावण्यलीलास्पदम् ।
संसारार्णवपीतवारिधिसमं मुक्त्यङ्गनावल्लभं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ५

त्रैलोक्ये तिलकायितं निरुपमं भव्यैर्नृभिः पूजितं
दुष्टानां निजसत्त्वदर्शनपरं क्षिप्रं सतां कामदम् ।
नाम्ना ध्वस्तसमस्तवैरिनिचयं राद्धा(शब्दा)न्तनिर्देशकं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ६

भूयिष्ठामलभक्तिशक्तिकलितैर्देवैश्चतुर्द्धा नतं
सर्वाशाकरणैककल्पफलदं सर्वाङ्गिचूडामणिम् ।
शिष्टानन्तचतुष्टयीवरतरं श्रीमेरुतुङ्गं जिनं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ७

स्फाराकारनि(वि)राजिताङ्गमतुलं सद्वर्ण्यहेमाकरं
विश्वव्याप्ततरं प्रवास(मोद)सदनं गम्भीरतासागरम् ।
भासोद्योतितविश्वविश्वमवनौ कल्याणसिन्धौ विधुं
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं भजे ॥ ८
(अष्टभिः कुलकम्)

भिन्नमाले सदा श्रेष्ठे गुणवच्छब्दभूषिते ।
पुष्पमालेऽन्तराभिख्येऽनेकवीहारसंयुते ॥ (अनुष्टुप्) ९

श्रीमतः पार्श्वनाथस्य स्तवनं जगतोऽवनम् ।
कल्याणसागराधीशैः सूरिभी रचितं मुदा ॥ (अनुष्टुप्) १०

ध्येयं श्रीपार्श्वदेवं भजत किल जना गोडिकग्रामराजं
शश्वत्सर्वार्थसिद्ध्यै विहितशुभहितं विष्टपे चैत्रपूर्वे ।
सानन्दोल्लासलष्टाः कुशलगविबुधाः सर्वलोके विशिष्टा-
निर्दोषाचारपुष्टा जिनपतिषु रता आप्तकल्याणतुष्टाः ॥ ११
(स्रग्धरा)

पू.आ.श्री कल्याणसागरसूरिविरचितम्

## ६३. ॥ श्रीगोडीपार्श्वनाथस्तवनम् ॥

जयति जगति चन्द्रः पार्श्वनामा जिनेन्द्रो
विकचकमलदृष्ट्या नन्दितामर्त्त्यमर्त्यः ।
अकलितमहिमौघस्तीर्णसंसारसिन्धु-
र्भुजगकलितपादः पुण्यपीयूषपुष्टः ॥ (मालिनी) १

श्रीपार्श्वं गोडिकाख्यं भजत भविगणे कल्पवृक्षं सुगोत्रं
नानादेशेषु लब्धातिशयमहितताव्यूहवारं सुमूर्त्तिम् ।
श्रीमन्तं नीलरत्नाधिकतरवपुषं स्फारलावण्यशालं
मोहाम्भोराशिकुम्भोद्भवममरनुतं पार्श्वयक्षार्चितांह्रिम् ॥ २
(स्रग्धरा)

नमन्ति पार्श्वमङ्गिनो नरालसा धृतातपत्रचामरैः सुरैः स्तुतम् ।
अनन्तशक्तिशालिनं गतामयं विवेकरत्नरोहणं दयाकरम् ॥ ३
(विभावरी)

ऊरीकृतं व्रतमनुत्तरमङ्गिनेत्रा
दत्त्वाऽऽशु येन वरवार्षिकदानराशिम् ।
वामोद्वहेन मुनिनायकनायकेन
कल्याणकेलिनिलयेन शुभाशयेन ॥ (वसन्ततिलका) ४

मम नमोऽस्त्ववते परमात्मने
भगवते शिवशर्म्मविधायिने ।
अमितशौर्य्यतिरस्कृतमेरवे शुभदशीर्षकमण्डलमौलये ॥ ५
(द्रुतविलम्बित)

अमृतरसताधिक्याभीष्टान्नरोत्तमसङ्गताद्-
भुवनसुभगा-त्पार्श्वाभिख्याद्विनश्यति पातकम् ।
प्रसरति च वै कीर्त्तिर्दिक्षु प्रसूनवदुज्वला
प्रभवति पुनः शीघ्रं लीलाजयोन्नतिवर्द्धनम् ॥ (हरिणी) ६

आकृत्या नरदेवदेवमनुषां सन्तुष्टिकर्तुस्सदा
चेतोवल्लभकामसार्थददतः कर्मारिहर्तुर्भृशम् ।
आनन्दौघसरः प्रवृद्धिकरणे पानीयदातुर्मुदा
पार्श्वस्यास्ति नतिः समृद्धिजननी कल्याणविस्तारिणी ॥ ७
(शार्दूलविक्रीडित)

नरलक्षणभूषितवल्ल्युपुरे मुखनीरजरञ्जितविश्वजने ।
श्रुतदेशनदर्शितधर्मपथे जिननेतरि तिष्ठति भाग्यरमा ॥ ८
(तोटक)

सुराधीशचक्रैः स्तुत(तो) ज्ञानसिन्धो !
जगन्नाथ ! नेतः ! कृपालोकबन्धो ! ।
विभो ! पाहि मां सर्वदा भक्तिभाजं
स्मरन्तं चिरं त्वत्पदाम्भोजभृङ्गम् ॥ (भुजङ्गप्रयात) ९

स्तोत्रं पार्श्वजिनेश्वरस्य सततं ये प्राणिनो भावतः
सद्बुद्ध्यापि पठन्ति हृद्यमनसस्तेषां गृहे सम्पदः ।
स्युर्नित्यं स्थिरभावशोभनतरा धर्म्मार्थनिष्पादिकाः
कल्याणार्णवसूरिभिर्विरचितं माङ्गल्यमालाकरम् ॥ १०
(शार्दूलविक्रीडित)

सदा धार्य्यं चित्ते स्तवनमनवद्यं भयहरं
नरैर्नूनं सिद्ध्यै कुशलवनराजौ घननिभम् ।

अवन्ध्यं भक्तानां जिनगुणरतानां स्मृतिमतां
समेषां भव्यानां प्रमुदकरणं कामितकरम् ॥ (शिखरिणी) १२

पू.आ.श्री कल्याणसागरसूरिविरचितम्
चतुर्थपादावृत्तियुक्तम्

## ६४. ॥ श्रीदादापार्श्वनाथस्तवनम् ॥

(इन्द्रवज्रा)

कल्याणगेहं गुणरत्नराजं सद्देहकान्त्याजितनीलरत्नम् ।
स्तोष्ये मुदा शङ्करमङ्गिवन्द्यं दादाभिधं श्रीवरपार्श्वनाथम् ॥ १

सद्धर्मलीनाशयमाशु विज्ञं कर्म्माष्टदावानलवारिधारम् ।
संसारपाथोनिधिकर्णधारं दादाभिधं श्रीवरपार्श्वनाथम् ॥ २

आचारवल्लीततिवृद्धिनीरं सत्कीर्त्तिपुष्पव्रजवासिताशम् ।
नानार्थराद्धान्तविचारदक्षं दादाभिधं श्रीवरपार्श्वनाथम् ॥ ३

वैराग्यरङ्गार्पितचारुचित्तं सद्बोधिदातारमनीहसेव्यम् ।
नागेन्द्रसंसेवितपादपद्मं दादाभिधं श्रीवरपार्श्वनाथम् ॥ ४

त्रैलोक्यचूडामणिमृद्धिशोभं सौभाग्यभाग्यावलिपूर्णदेहम् ।
भव्यौघराजीवदिनेशमेकं दादाभिधं श्रीवरपार्श्वनाथम् ॥ ५

सर्वाङ्गिनेतारमभीष्टवाचं विश्वेश्वरं रञ्जितसभ्यलोकम् ।
लोकार्त्तिचिन्ताभ(म?)यदुःखवारं दादाभिधं श्रीवरपार्श्वनाथम्॥६

हृद्याकृतिं कृत्तजरादिदोषं नरामरेन्द्रं स्तुतमर्त्यसङ्घम् ।
सन्नागचिह्नं कुशलार्थकारं दादाभिधं श्रीवरपार्श्वनाथम् ॥ ७

सर्वत्र विख्याततरप्रतापं कारुण्यसत्रं भुवि शिष्टगोत्रम् ।
अज्ञानमिथ्यात्वतमिस्रदीपं दादाभिधं श्रीवरपार्श्वनाथम् ॥ ८

अष्टभिः कुलकम् ।

(शार्दूलविक्रीडित)

श्रीमच्छ्रीवटपद्रभद्रनगरे शृङ्गारहारोपमं
कल्याणाम्बुजभानुचन्द्रमसमं वामाङ्गजातं परम् ।
दादाख्यं जिनपार्श्वदेवमनघं ध्यायन्ति ये नित्यश-
स्तेषां धाम्नि रमा निवासमनिशं कुर्वन्ति कल्याणतः ॥ ९

पू.आ. श्री कल्याणसागरसूरिविरचितम्

चतुर्थपादावृत्तियुक्तम्

## ६५. ॥ श्रीकलिकुण्डपार्श्वनाथाष्टकम् ॥

(उपजाति)

विबुधादिराजैर्नतपादपद्मं
बहुभाग्यसौभाग्यलतौघमेघम् ।
कमठोपसर्गाचलधैर्य्यभित्तिं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ १

कमलाप्रदाने हरिचन्दनाङ्गं
सपयोधिदेशाद्भुतलब्धकीर्त्तिम् ।
रुचिराकृतौ रञ्जितविश्वविश्वं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ २

महिमावदातोत्तमनाममन्त्रं
समताभिरामं कमलाभिनेत्रम् ।
अभिलाषदं सिद्धिविलासयन्त्रं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ ३

दुरितान्धकारारुणसन्निकाशं
करुणाशयं दुःखवनेषु दावम् ।

नरदेवपूज्यं सुखदं सुमूर्तिं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ ४

कनकादिदातारमनन्तशक्तिं
वरनीलरत्नाधिकदेहवर्णम् ।
शिवशर्मराजं जनताभिवन्द्यं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ ५

अनघं सदा सद्गुणकेलिपालं
शुभलक्षणालङ्कृतवर्यगात्रम् ।
कुलभूषणं शत्रुतृणौघदात्रं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ ६

जगतीश्वरं कर्मविमुक्तसङ्गं
विषमायुधालग्नमनःस्वरूपम् ।
धरणेन्द्रपार्श्वार्चितपादयुग्मं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ ७

शुभसिन्धुवृद्धौ शशिनं वरेण्यं
वचसा सुधाभेन सहर्षसभ्यम् ।
श्रुतसूरिणं पुण्यविराजमानं
कलिकुण्डपार्श्वं सुचिरं भजेऽहम् ॥ (अ.कु.) ८

एवं स्तुतः श्रीकलिकुण्डपार्श्वः
कल्याणनाम्ना मयका नितान्तम् ।
ये प्राणिनः स्तोत्रमिदं पठन्ति
तद्धाम्नि लक्ष्मीर्विलसत्यवश्यम् ॥ (इन्द्रवज्रा) ९

पू.आ. श्री कल्याणसागरसूरिविरचितम्

## ६६. ॥ श्रीगोडीपुरपार्श्वनाथस्तवनम् ॥

(रागेण गीयते)

गौडिपुरप्रभुपार्श्वममन्दं दर्शनदर्शनपरमानन्दं
नमितसुरासुरवृन्दम् ॥ १

श्रीजिनशासनचारुशृङ्गारं अन्तरङ्गरिपुवृक्षकुठारं
सकलजगदाधारम् ॥ २

निरुपमरूपविराजितदेहं विदलितनानाजनसन्देहं
अमितगुणधनगेहम् ॥ ३

दुरितकाननभेदनदात्रं रुचिरलक्षणविभूषितगात्रं
वारितकुमतकुपात्रम् ॥ ४

अनघजिनवरगोत्रसुगोत्रं कामकुम्भमणिनिर्जरगोत्रं
संयमदृढतागोत्रम् ॥ ५

छेदितभवभयमरणारिष्टं प्रकटितमहिमातिशयवरिष्ठं
जगदैश्वर्यगरिष्ठम् ॥ ६

विहिताखिलभविजनकल्याणं पालितयथाख्यातकल्याणं
दत्तमार्गणकल्याणम् ॥ ७

आधिबन्धवधगदहर्त्तारं वाञ्छितकुशलसौख्यकर्त्तारं
भुवनत्रयभर्त्तारम् ॥ ८

विकटकष्टनिवारणशूरं आगमनयप्रकाशनसूरं
भारतीगङ्गापूरम् ॥ ९

धृतिकीर्तिबुद्धिलक्ष्मीगणविश्वं केवलयुगलालोकितविश्वं
प्राप्तजनेप्सितविश्वम् ॥ १०

सेवकमनोऽभीष्टदातारं रञ्जितदेवनरनेतारं
अनुभूतकुलत्रातारम् ॥ ११

इन्द्रनीलमणिवर्णसुवर्णं निखिलदेशविख्यातसुवर्णं
वाक्सुधासारसुवर्णम् ॥ १२

मुक्तिसीमन्तिनीसङ्गमलुब्धं चञ्चलविषयसुखसङ्गमलुब्धं
कर्मपराविप्रलुब्धम् ॥ १३

वन्दितामरमौलिकुटीरं विषमकषायदवानलनीरं
उत्कटपरीषहधीरम् ॥ १४

अञ्चलगणनीरधिसारङ्गं कीर्तिलतावर्द्धनसारङ्गं
दुर्ज्जनशलभसारङ्गम् ॥ १५

वन्देऽनन्तचतुष्टयिराजं पूजितसुरपतिमानवराजं
प्रवरतीर्थाधिराजम् ॥ (षो.कु.) १६

शिवतातिपार्श्वं वरदवरपार्श्वं मोहतमिस्त्रसवितारं
नागराजराजं त्रिभुवनपूज्यं लब्धभवोदधिपारम् ।
शुभसागरनित्यप्रथितगरिमाणं ये ध्यायन्ति विभुं मुदा
लक्ष्मीस्तान् समुपैति सत्परमतुला सर्वार्थसिद्धिप्रदा ॥ १७

पू.आ.श्री कल्याणसागरसूरिविरचितम्

## ६७. ॥ श्रीलोडणपार्श्वनाथस्तवनम् ॥

(अनुष्टुप्)

श्रीकरं कष्टहर्त्तारं विधिवादप्रकाशकम् ।
धिया तर्जितवागीशं परमात्मानमन्वहम् ॥ १

क्षमागारं कृपापात्रं गताधिव्याधिदूषणम् ।
छेकं तु सर्वकार्येषु श्रीप्रदं दलितामयम् ॥ २

धनधान्यकरं लोके रमाकेलिपदं परम् ।
मर्मतामदमानौघमूर्खतादोषवर्जितम् ॥ ३

आर्त्तिसन्तापभेत्तारं सूरिश्रेणिशिरोमणिम् ।
रिपुसारङ्गसारङ्गमङ्गिनाथनिषेवितम् ॥ ४

तेजसां मन्दिरं रम्यं वारिताशेषदुर्जनम् ।
निःसीमं सर्वगोत्राणां श्रीमन्तं गुणसागरम् ॥ ५

कथिताचारमार्गौघं कल्याणकमले विधुम् ।
प्रणताशेषदेवेशं शासनं कान्तभूघनम् ॥ ६

गदितागमसन्दोहं रसनामृतसुन्दरम् ।
सूराधिकप्रतापालिं रिक्थदं दमितेन्द्रियम् ॥ ७

नागेन्द्रविबुधैः सेव्यं लोकानां शान्तिकारकम् ।
जडताया विभेत्तारं नयनाह्लादकारणम् ॥ ८

पालकं सर्वसत्त्वानां पार्श्वयक्षेण पूजितम् ।
नाकिमानववन्द्यांह्रिं नाथनाथं जगत्प्रभुम् ॥ ९

क्रियासन्ततिनेतारं त्रासितानेकदोषकम् ।
कृतान्तार्थं विचारज्ञं तारतारुण्यराजितम् ॥ १०

संसारसागरे पोतं घस्मराधिविवर्जितम् ।
सर्वज्ञं मेघगम्भीरं हितं विश्वस्य सर्वदा ॥ ११

तेजोनिधिं मुदा पार्श्वं नवीमि लोडणाभिधम् ।
कल्याणसागराख्येन संस्तुतं ह्यादिमाक्षरैः ॥ (द्वा.कु.) १२

श्रीमल्लोडणपार्श्वनाथमवनौ विख्यातगोत्राभिधं
ये भव्या वरभावभक्तिसहिताः पूजन्ति सौख्यार्थिनः ।
ते सत्त्वाः सुखमानकीर्त्तिकलिताः कल्याणतुङ्गाः परा
जायन्ते भुवने प्रतापरुचिरा आदेयवाचः सदा ॥(शा.वि.) १३

पू.आ.श्री कल्याणसागरसूरिविरचितम्

चतुर्थपादावृत्तियुक्तम्

## ६८. ॥ श्रीसेरीशापार्श्वनाथाष्टकम् ॥

(इन्द्रवज्रा)

कामौघकर्त्तारमशेषदेवाधीशैस्सदा चर्चिततपादपद्मम् ।
कल्याणकारं वरनीलवर्णं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ १

सत्पुण्यवल्लीवनवारिधारं निःशेषभव्यावलिपूरिताशम् ।
त्रैलोक्यछत्रं भुवनाधिनाथं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ २

सारङ्गवाणीजितचित्तदार्ढ्यं सारङ्गगम्भीरनिनादकान्तम् ।
सारङ्गसाराम्बकयुग्मराजं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ३

विश्वेषु सत्त्वेषु कृपानिधानं सम्यक्त्वरत्नाभरणाङ्किताङ्गम् ।
दुःस्वाङ्गपर्शुं दलितारिवर्गं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ४

अपारसंसारसमुद्रपोतं सर्वज्ञमाचारपवित्रवंशम् ।
राद्धान्तशास्त्रार्थरहस्यदक्षं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ५

वाणीरसानन्दितविश्वविश्वं तीर्थंकरं नागपुरेशपूज्यम् ।
सर्वत्र विख्यातयशोभिरामं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ६

तेजोनिधिं कामितकामकुम्भं सौजन्यसौहार्दविलासपात्रम् ।
कल्याणसूर्यादिवितानहेतुं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ७

आदित्यचन्द्राधिकदेहभासं सत्प्रातिहार्य्याष्टकराजिराजम् ।
स्फाराकृतौ मोहितदेवदेवं सेरीशपार्श्वं नुथ लोडणाख्यम् ॥ ८

कलशः । (स्रग्धरा)

एवं कल्याणवन्द्यं त्रिभुवनतिलकं लोडणार्हं सुपार्श्वं
कृत्वैकाग्र्यं स्वचित्ते भवसफलकृते ज्ञानसम्पत्तिसिद्ध्यै ।
नित्यं ध्यायन्ति भव्या जिनसमयरताः शुभ्रलेश्याभिरामा-
स्तेषां हर्षात्प्रकामं भवति च सदने मञ्जुपद्मानिवासः ॥ ९

प.आ.श्री कल्याणसागरसूरिविरचितम्
चतुर्थपादावृत्तियुक्तम्

## ६९. ॥ श्रीरावणपार्श्वनाथाष्टकम् ॥

(इन्द्रवज्रा)

देवाधिदेवं कृतपार्श्वसेवं नागाधिराजेन नतांह्रिपद्मम् ।
पद्मावतीसंस्तुतनामधेयं सेवे सदा रावणपार्श्वनाथम् ॥ १

आनन्दकन्दोदयवृद्धमेघं मेघध्वनिध्वानविशेषराजम् ।
जितारिवृन्दं विगताधिमोहं सेवे सदा रावणपार्श्वनाथम् ॥ २

वामाङ्गजातं कुलनन्दिकारं ध्वस्तोपसर्गोत्कटदुष्टरोगम् ।
प्रख्यातिमन्तं भुवने प्रभावैः सेवे सदा रावणपार्श्वनाथम् ॥ ३

सन्नीलभासा हसितेन्द्रनीलं सत्कान्तकान्त्या रमणीयरूपम् ।
प्रावीण्यनानातिशयैः प्रधानं सेवे सदा रावणपार्श्वनाथम् ॥ ४

सम्भीतिहर्त्तारमंनतसौख्यं विश्वेश्वरं द्योतितविश्वलोकम् ।
पद्मार्थदाने सुररत्नवृक्षं सेवे सदा रावणपार्श्वनाथम् ॥ ५

अज्ञानमिथ्यात्वतमिस्रभानुं भामण्डलालङ्कृतमौलिपृष्ठम् ।
वाणीसुधामोदितसभ्यसङ्घं सेवे सदा रावणपार्श्वनाथम् ॥ ६

कौशल्यमाङ्गल्यनिवासगेहं पूर्णीकृताभीष्टपदार्थराशिम् ।
त्रैलोक्यदीपं वरसिद्धिभाजं सेवे सदा रावणपार्श्वनाथम् ॥ ७

संसाररत्नाकरयानपात्रं निःशेषदोषोज्झितधर्ममार्गम् ।
आदेयसौभाग्ययशः सुपात्रं सेवे सदा रावणपार्श्वनाथम् ॥ ८
अष्टभिः कुलकम् ।

अलवरपुररत्नं रावणं पार्श्वदेवं
प्रणतशुभसमुद्रं कामदं देवदेवम् ।
अमितगुणनिधाना ये नरः संस्तुवन्ति
जगति विदितसारा भाग्यवन्तो भवन्ति ॥ (मालिनी) ९

प.आ.श्री कल्याणसागरसूरिविरचितम्
चतुर्थपादावृत्तियुक्तम्

## ७०. ॥ श्रीमहुरपार्श्वनाथाष्टकम् ॥

(द्रुतविलम्बित)

विबुधमानवमानसनन्दनं
विभवदानविधौ हरिचन्दनम् ।
निखिलसभ्यजनैः कृतवन्दनं
भजत पार्श्वजिनं महुराभिधम् ॥ १

युगलकौशिकसाम्यतराशयं
भुवनभानुनिवासघनाश्रयम् ।
विषयवारणकेसरिसन्निभं
भजत पार्श्वजिनं महुराभिधम् ॥ २

अरुणकोटिविभाधिकभास्वरं
कुमुदबान्धवशुभ्रतराननम् ।
वरगभीरगुणोत्तमसागरं
भजत पार्श्वजिनं महुराभिधम् ॥ ३

भविकपद्मविभासनभास्करं
जगति भावप्रकाशनदीपकम् ।
नयनपाटवपावनतन्त्रकं
भजत पार्श्वजिनं महुराभिधम् ॥ ४

रचितकामठवारिदसञ्चयै-
रखिलधैर्यसमन्वितचेतसम् ।
विकटकर्मसमीरणभोगिनं
भजत पार्श्वजिनं महुराभिधम् ॥ ५

कमठनिर्म्मितपांशुकदम्बकैः
स्थिरतरोत्कटभावविराजितम् ।
जगति दुर्जनसर्पविषापहं
भजत पार्श्वजिनं महुराभिधम् ॥ ६

प्रशमभूषणभूषणभूघनं
सुभगभाग्यगुणावलिमन्दिरम् ।

धवलकीर्तियशोम्बरवासितं
भजत पार्श्वजिनं महुराभिधम् ॥ ७

सकलसङ्घसमीहितकर्तृकं
निचितविघ्नपराभवहर्तृकम् ।
अतिशयाद्भुतचारुचरित्रकं
भजत पार्श्वजिनं महुराभिधम् ॥ ८

महुरजिनपं नित्यं वन्दे शिवोदधिवर्द्धनं
शशिनमनिशं किण्वध्वान्ते दिनेशमहोदयम् ।
स्तवनभणने चिताह्लादैः कृतादरसेवके
विविधधनदं विश्वे विश्वे जिनेश नतानने ॥ (हरिणी) ९

महुरपार्श्वजिनेश्वरसंस्तवं
पठति यः सुधियोषसि नित्यशः ।
वसति तस्य गृहे कमलाऽखिला
स्थिरतरासुमतां वरदायिनी ॥ (द्रुतविलम्बित) १०

पू.आ.श्री कल्याणसागरसूरिविरचितम्

## ७१. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(तोटक)

भविकाम्बुजभासनभानुनिभं भवतापसमावनवारिधरम् ।
रचितागमशास्त्रविचारनयं जय मङ्गलकीर्तियशोनिचयम् ॥ १

कमलामलकेलिगृहं विमलं लसदाशयमुज्झितसन्तमसम् ।
शुभसागरवर्द्धनचन्दमसं सकलामरपूजितपादकजम् ॥ २

विकटोत्कटकर्म्ममृगेभरिपुं खगनागनरेश्वरदेवनतम् ।
तरसा जितमोहरिपुं विभयं यमसंवरसंहितसाधुहितम् ॥ ३

शुभलक्षणलक्षितहस्तयुगं गजराजगतिं गतविघ्नरुजम् ।
जडतामयभेषजमीशवरं दशनद्युतिद्योतितचारुमुखम् ॥ ४

कनकाचलधीरमभीष्टतरं रसनारसरञ्जितसर्वसभम् ।
भुवनत्रयमण्डलमोघतरं रुचिराकृतिमोहितदेवजनम् ॥ ५

अरिहन्तमनुत्तरतीर्थकरं रचितं वरबुद्धिधनं जिनपम् ।
पुरुषोत्तममस्मरमर्थनिधिं धृतिकान्तिनिकेतनमङ्गिनुतम् ॥ ६

निजवंशवतंसकमार्तिहरं रवनिर्जितमेघनदं शिवदम् ।
दयितं भुवि विश्वजनीनतमं नतभूतगणं जितलोभभटम् ॥ ७

शरणाश्रितपालकमुक्तिपदं दधतं वरशान्तरसं नवमम् ।
महसेन्द्रमणिप्रभदेहधरं धरणेन्द्रनिषेवितपार्श्वयुगम् ॥ ८

अममं नुतपार्श्वजिनं सततं तपसा हृतिसिद्धमनन्तबलम् ।
ललनाजनसङ्गविरक्तमलं मलवर्जितमुत्तरसौख्यधरम् ॥ ९

(नवभिः कु.)

सुरराजखेचरनागपुरन्दरधरणिराजसुसेवितं
श्रीपार्श्वजिनेश्वरं नमितसुरेश्वरपद्मावतीसंस्तुतम् ।
येऽनन्तभक्त्या विशुद्धशक्त्या संस्तुवन्ति जिनं मुदा
शुभसागरपठनाद्धविकरमासमेतं ते लभन्ति सुखं सदा ॥ १०

पू.आ. श्रीमेरुतुङ्गसूरिविरचितम्

# ७२. ॥ श्रीजीरावलापार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

ॐ नमो देवदेवाय नित्यं भगवतेऽर्हते ।
श्रीमते पार्श्वनाथाय सर्वकल्याणकारिणे ॥ १

ह्रीँरूपाय धरणेन्द्र–पद्मावत्यर्चिताङ्घ्रये ! ।
शुद्धातिशयकोटीभिः सहिताय महात्मने ॥ २

अट्टे मट्टे पुरो दुष्टविघट्टे वर्णपङ्क्तिवत् ।
दुष्टान् प्रेतपिशाचादीन् प्रणाशयति तेऽभिधा ॥ ३

स्तम्भय स्तम्भय स्वाहा–शतकोटीनमस्कृतम् ।
अधिमत्कर्मणां दूरादापतन्ती विडम्बना ॥ ४

नाभिदेशोद्भवन्नाले ब्रह्मरन्ध्रप्रतिष्ठिते ।
ध्यातमष्टदले पद्मे तत्त्वमेतत्फलप्रदम् ॥ ५

तत्त्वमत्र चतुर्वर्णी चतुर्वर्णविमिश्रिता ।
पञ्चवर्णक्रमध्याता सर्वकार्यकरी भवेत् ॥ ६

क्षिप ॐ स्वाहेति वर्णैः कृतपञ्चाङ्गरक्षणः ।
योऽभिध्यायेदिदं तत्त्वं वश्यास्तस्याखिलश्रियः ॥ ७

पुरुषं बाधते बाढं तावत्क्लेशपरम्परा ।
यावन्न मन्त्रराजोऽयं हृदि जागर्ति मूर्तिमान् ॥ ८

व्याधिबन्धवधव्यालानलाम्भःसम्भवं भयम् ।
क्षयं प्रयाति श्रीपार्श्वनामस्मरणमात्रतः ॥ ९

यथा नादमयो योगी तथा चेत्तन्मयो भवेत् ।
तदा न दुष्करं किञ्चित् कथ्यतेऽनुभवादिदम् ॥ १०

इति श्रीजीरिकावल्लिस्वामिपार्श्वजिनस्तुतिः ।
श्रीमेरुतुङ्गसूरेः स्तात् सर्वसिद्धिप्रदायिका ॥ ११

जीरापल्लिप्रभुं पार्श्वं पार्श्वयक्षेण सेवितम् ।
अर्चितं धरणेन्द्रेण पद्मावत्या प्रपूजितम् ॥ १२

सर्वमन्त्रमयं सर्वकार्यसिद्धिकरं परम् ।
ध्यायामि हृदयाम्भोजे भूतप्रेतप्रणाशकम् ॥ १३

श्रीमेरुतुङ्गसूरीन्द्रः श्रीमत्पार्श्वप्रभोः पुरः ।
ध्यानस्थितं हृदि ध्यायन् सर्वसिद्धिं लभेद् ध्रुवम् ॥ १४

पू.आ.श्री नयचन्द्रसूरिविरचितम्

## ७३. ॥ श्रीस्तम्भनपार्श्वनाथस्तवनम् ॥

(इन्द्रवज्रा)

सेढीतटस्तम्भनकप्रतिष्ठः श्रीपार्श्वनाथः सुगुणैर्गरिष्ठः ।
पायादपायादलिनीलकायः सिद्ध्यङ्गनासङ्घटनाभ्युपायः ॥ १

तस्याहमुच्चैर्हरिशब्दवाच्यैः स्तोत्रं नवं षोडशभिर्विधास्ये ।
वाचं विचित्रां(च तत्र) प्रथमं निधास्ये
यथाक्रमं ताश्च तथाभिधास्ये ॥ २

(तोटक)

हयवायुजनार्दनसिंहविधूरगभेककपीन्द्रशुकार्कयमैः ।
घृणिपिङ्गभवाम्बुधिनीलगुणैर्हरिशब्दभवैः प्रणवीमि जिनम् ॥३

जय मुक्तिमहापुरमार्गहरे ! जय विघ्नघटो(ना)घननाशहरे ! ।
जय मन्मथकैटभघातहरे ! जयमोहमतङ्गजभङ्गहरे ! ॥ ४

जय सङ्घसमुद्रविबोधहरे ! जय सप्तफणामणिकान्तिहरे ! ।
जय गाढजडत्वनिषेधहरे ! जय पापलताफलपातहरे ! ॥ ५

जय मानमहीधरदारहरे जय योगमहासहकारहरे ! ।
जय भव्यजनाम्बुजबोधहरे ! जय रागरिपुप्रलयैकहरे ! ॥ ६

जय शून्यशशिप्रतिमासिहरे ! जय भीमभवाम्बुधिपारहरे ! ।
जय लोभसमीरणपानहरे ! जय बालपलाशफलाशहरे ! ॥ ७

प्रशमरससमुद्रः कीर्तिभारैरमुद्रः
कुमतितिमिरचन्द्रः साधुसिद्धावतन्द्रः ।
सुगतिनगरपन्था दुःखदौर्भाग्यमन्था
घनभवदवपाथः पातु वः पार्श्वनाथः ॥ (मालिनी) ८

इत्थं स्तम्भनमण्डन ! खण्डन ! कमठोपसर्गवर्गस्य ।
नयचन्द्रसूरिसंस्तुत ! मार्गः स्वर्गापवर्गस्य ॥ (गाथा) ९

इति श्रीऋषिबाणाक्षिविधौ (१२५७) संवत्सरे मुदा ।
वादिश्रीदेवसूरीणां गच्छे विरचितः स्तवः ॥ (गाथा) १०

पू.आ.श्री हेमचन्द्रसूरिविरचितः
केवलज्ञानप्राप्तनन्तरशक्रेन्द्रसंदृब्धः

## ७४. ॥ श्रीपार्श्वनाथजिनस्तवः ॥

(अनुष्टुप्)

सर्वत्रापि भवद्भूत-भाविभावाऽवभासकृत् ।
भवतां केवलज्ञान-मिदं जयति निर्मलम् ॥ १

अस्मिन्नपारे संसार-पारावारे शरीरिणाम् ।
यानपात्रं त्वमेवाऽसि, निर्यामोऽपि त्वमेव हि ॥ २

सर्ववासरराजोऽयं, वासरस्त्रिजगत्पते ! ।
त्वत्पाददर्शनमहो-त्सवो यत्राऽजनिष्ट नः ॥ ३

विवेकदृष्टिलुण्टाक-मज्ञानतिमिरं नृणाम् ।
त्वद्देशनौषधिरसं, विना न हि निवर्तते ॥ ४

नद्यामिव नवं तीर्थं, तव तीर्थं भवेऽधुना ।
उत्तारणाय भवति, प्राणिनामहहोत्सवः ॥ ५

सिद्धाऽनन्तचतुष्काय, सर्वाऽतिशयशालिने ।
औदासिन्यनिषण्णायै-कप्रसन्नाय ते नमः ॥ ६

अत्यन्तोपद्रवकरे, प्रतिजन्म दुरात्मनि ।
मेघमालिनि करुणा, करुणा कुत्र ते न हि ॥ ७

तिष्ठतो यत्र कुत्रापि, गच्छतो यत्र कुत्रचित् ।
त्वत्पादपद्मशरणं, माऽपयातु हृदो मम ॥ ८

पू.आ. श्री भुवनसुन्दरसूरिप्रणीतम्
श्रीजीराउलीमण्डन-

## ७५. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(वसन्ततिलका)

श्रीणां पदं सपदि दुर्विपदं विजेतुं
'पार्श्वप्रभुं' सकलमङ्गलकेलिहेतुम् ।
जीराउलीनगरमण्डनतारहारं
तं संस्तुवे त्रिजगदभ्युदयावतारम् ॥ १

वन्दारुसादरसुरेश्वरमौलिमौलि-
माणिक्यमांसलमरीचिचयाम्बुभासि ।
देव ! त्वदीयचरणाम्बुरुहे मदीयं
चेतो मधुव्रतकलां कलयत्यजस्रम् ॥ २

सौवर्णपूरुषसुरद्रुमहाप्रभाव-
धिक्कारकारिणि सुवारिणि दुःकृताग्नौ ।
त्वद्दर्शने भवति तीर्थकरे हितार्थ-
सार्थस्तरुर्मम फलेग्रहिरद्य भावी ॥ ३

श्रीमज्जिनेश्वर ! तव स्तवनप्रभावा-
ल्लप्स्येऽहमुज्ज्वलगुणप्रभवां प्रतिष्ठाम् ।
प्रातः सहस्रकिरणारुणकान्तियोगात्
प्रोत्फुल्लमुल्लसति पङ्करुहं न किं वा ? ॥ ४

रागादिवैरिनिकरः परितोऽपि पीडा-
व्रीडावहो मम समस्ति जगत्त्रयेश ! ।
तत्त्रायकस्त्वदपरो नहि कोऽपि विश्वे
त्वामेव देव ! तदहं शरणं श्रितोऽस्मि ॥ ५

अन्येऽप्यमी हरिहरप्रमुखा जिनेन्द्र !
सन्त्येव तेषु न मनो मम लालगीति ।
चिन्तामणावनणुदातरि वाऽऽप्यमाने
कः काचखण्डमुररीकुरुते मनस्वी ॥ ६

मुक्तिं न दातुमलमन्यसुरास्त्वमेव
तद्दानशौण्डमतिरस्यखिलाङ्गभाजाम् ।

त्वत्सेवकोऽहमपि देव ! ततस्तदर्थी
त्वामेव विश्वजनवत्सलमाश्रयामि ॥ ७

विश्वप्रभौ सकलदातरि विद्यमाने
देवे भवत्यपि परे परमार्थशून्याः ।
दुर्देवतान्यपि भजन्त्यथवा विहाय
द्राक्षावणानि करभाः कलयन्ति निम्बम् ॥ ८

त्वद्दर्शने भवति भास्वरधर्मवृद्धि-
र्धर्मप्रवृद्धिवशतस्तव दर्शनं च ।
स्वर्भूर्भुवः प्रणतपादपयोरुहेत्यन्-
योन्याश्रयं मम निराकुरु देवदेव ! ॥ ९

लोकेशताह्वयगुणं प्रगुणं स्वयम्भू-
र्मृत्युञ्जयत्वमपि शङ्कर एष देवः ।
लक्ष्मीपतिश्च पुरुषोत्तमतामवापु-
स्त्वत्पूजनस्तवनसंस्मृतितो जिनेन्द्र ! ॥ १०

सच्चित्रवल्लिसुरधेनुसुपर्ववृक्ष-
स्वःकुम्भमुख्यशुभकारिपदार्थसार्थैः ।
आराधितैर्य इह सौख्यभरो नृणां स्यात्
त्वन्नामसंस्मरणतः स भवेदनन्तः ॥ ११

रागादयः प्रबलकष्टकरा हि तावत्
तावच्च संस्सृतिपरिभ्रमणं महीयः ।
पीयूषवृष्टिकलया तव देव ! दृष्ट्या
स्पृष्टो न यावदयमङ्गिगणः सहेलम् ॥ १२

इन्दुः सुधानिधिवपुः कलकान्तिकान्तं
भानुः समग्रजगतीतलभासकत्वम् ।
इन्द्रादयोऽपि परमेश्वरतामवापुस्-
त्वद्ध्यानतः सकलवाञ्छितदानरक्ष ! ॥ १३

ते चक्रिणः स्फुटचतुर्दशदीप्ररत्न-
भास्वन्निधानतुरगेभसमृद्धिवृद्धाम् ।
यत्प्राज्यराज्यकमलां विमलां लभन्ते
तत्तावकीनचरणार्चनजः फलांशः ॥ १४

नारायणा हलधरप्रमुखाश्च भूपा
रूपातिशायिवपुषः सुखसन्ततीद्धाः ।
भोगप्रयोगसुभगं सुखमाप्नुवन्ति
तत्ते मताश्रयणजोऽतिशयांश एव ॥ १५

गङ्गाजलेषु विलुठन्तु पठन्तु वेदान्
ध्यायन्तु किञ्चिदथ भान्तु तपस्क्रियाभिः ।
देवान् नमन्तु विरमन्तु भवात् तथापि
त्वद्ध्यानशून्यहृदयेषु विभो ! न मुक्तिः ॥ १६

तेपे तपो न समयोऽपि समो न पेठे
नेमे न तीर्थमथ दानगुणे न रेमे ।
कश्चिन्नरैरलसमूर्त्तिधरैस्तथापि
त्वद्ध्यानतः शिवपदं जिनराज ! लेभे ॥ १७

स्वान्यप्रकाशकरणप्रवणस्वरूपं
यल्लक्षणं निजगदे जगदेकनाथ ! ।
भास्वत्प्रमाणयुगलस्य जिन ! त्वयेदं
बाभाति सत्यमपरं तु न युक्तियुक्तम् ॥ १८

मच्चेतसस्तव गिरश्च सदाप्यभाव-
मन्योन्यपूर्वकमपास्य जगन्नमस्य ! ।
तादात्म्यमेव कुरु येन विभो ! भजेयं
तत्तावकीनपदमभ्युदयावदातम् ॥ १९

यास्यत्ययं कुगतिमेव कुकर्मकृत्त्वा-
दित्येष हेतुरिह लक्षणलक्षिताङ्गः ।
सिद्धोऽप्यसिद्धपदवीमयते यतीश !
त्वद्ध्यानबन्धुरतरस्य नरस्य सद्यः ॥ २०

भास्वत्प्रमाणयुगलोज्ज्वललोचनश्री
र्देव ! त्वया सदसदात्मकवस्तुरूपः ।
स्याद्वाद एष निहितः प्रणिहन्ति सद्यः
कण्ठीरवः कठिनवादिमदद्विपेन्द्रान् ॥ २१

कालाद्यभेदवशतो युगपत् समग्रा-
देशात्मिका निगदिता खलु सप्तभङ्गी ।
स्वामिन् ! प्रमाणवचनं भवतेयमाशु
वादे ददाति विजयश्रियमेव पुंसाम् ॥ २२

वस्त्वंशमात्रकथनादसमग्रभावा-
देशात्मिका नयवचः शुचिसप्तभङ्गी ।
स्यादेवकारकलिता भवता न्यगादि
या सापि देव ! कुमतद्विपराजिसिंही ॥ २३

एकत्र वस्तुनि जनिस्थितिनाशरूपैः
कालत्रयेण गुणितैः स्वपरत्वयुक्तैः ।

भङ्गैस्त्वयोक्तमवगच्छति वस्त्वनन्त-
धर्मात्मकं प्रवरधीधन एव नाऽन्यः ॥ २४

उच्चारितेऽपि तव नाम्नि विपद्विनाशः
सम्पद्यते सपदि सम्पदपि प्रकृष्टा ।
मुक्त्यङ्गनाऽपि वृणुते तदयं जनौघो
रात्रिंदिवं स्मरति देव ! तदेव हर्षात् ॥ २५

जन्मक्षणे तव विभो ! सुरसुन्दरीणां
नाट्यत्रुटत्प्रवरहारलताच्युतैस्तैः ।
सद्रत्नमौक्तिकगणैर्महिलेव मेरो-
र्भूः काञ्चनीसुभगतां समवाप सद्यः ॥ २६

ब्रह्मात्मकं परमसौख्यमयं प्रधानै-
श्वर्यं कुकर्मरहितं सहितं गुणौघैः ।
त्वद्रूपमेव समवेक्ष्य निजस्वरूपं
ते योगिनस्तव पदं भगवंल्लभन्ते ॥ २७

त्वद्गोत्रमन्त्रवरवर्णततिं स्वकीये
हृत्पङ्कजे प्रवरपत्रततौ निधाय ।
यो ध्यायति त्रिजगदीश्वर ! तस्य पुंसो
वश्या भवन्ति सकला अपि सिद्धयस्ताः ॥ २८

सालत्रयान्तरतिशुभ्रतरातपत्रं
सिंहासनस्थममरेश्वरसेव्यमानम् ।
त्वां भासुरातिशयमाशयदेशमध्ये
ध्यायन्नरो भवति भाजनमीशतायाः ॥ २९

निःस्पर्शरूपरसगन्धमजन्ममृत्युं
सिद्धं निरञ्जनमनन्तचतुष्टयाढ्यम् ।
यश्चिन्तयत्यविरतं तव रूपमीदृग्
देव ! ध्रुवं पदमसौ लभते क्रमेण ॥ ३०

चौरा इव प्रबलरोगगणा जिनेन्द्र !
त्वद्ध्यानभानुवशतः प्रलयं प्रयान्ति ।
पद्माकरा इव शुभप्रकराः श्रयन्ति
प्रोल्लासमाशु पुरुहूतनमस्कृताङ्घ्रे ! ॥ ३१

श्रीसोमसुन्दरगुरुत्तमसूरिराज-
शिष्याणुना भुवनसुन्दरसूरिणा त्वम् ।
देव ! स्तुतः प्रवरभक्तिभरेण दद्याः
सानन्दशाश्वतपदाभ्युदयस्य लक्ष्मीम् ॥ ३२

पू.आ.श्री भुवनसुन्दरसूरिविरचितम्
श्रीजीराउलीमण्डन-

## ७६. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(शिखरिणी)

श्रियः क्रीडागेहं रुचिरुचिरदेहद्युतिभरं
त्रिलोकीविख्यातप्रकटपटुमाहात्म्यविभवम् ।
स्तुवे जीरापल्लीयुवतिगुरुमल्लीयमुकुटं
प्रभुं श्रीवामेयं प्रणवमयताध्येयमनिशम् ॥ १

तव ध्यानं स्वामिन् ! विदधति सदा येऽधिमनसं
न सन्देहस्तेषाममरनिकरः किङ्कर इव ।

भुजिष्यीभावं सा भजति नृपतिश्रेणिरपि च
प्रभो ! ह्रींकारात्मन् ! जनततिरतस्त्वां श्रितवती ॥ २

सुपर्वद्रुश्रेणीसुरवरगवीनामनुपमः
सुधाभुक्कुम्भादेरपि च महिमा विश्वविदितः ।
भवेत् खद्योतश्रीर्यदुरुमहिमादित्यपुरतः
प्रभो ! श्रीबीजात्मन् ! स भव भविनां त्वं सुखकरः ॥ ३

सदाप्यर्हन्तं त्वाममरपतिसंसेव्यचरणं
चतुस्त्रिंशत्प्रौढातिशयकमलोल्लासनरविम् ।
स्फुरद्रत्नस्वर्णप्रकरमयसिंहासनजुषं
श्रयन् भव्यः प्राणी भजति भगवँस्तत् तव पदम् ॥ ४

नमस्कुर्वे सर्वेहितसुखकरं त्वां त्रिजगती-
शरण्यं सार्वश्रीयुवतिहृदये हारसदृशम् ।
सुपर्वस्वाम्यालीस्फुटमुकुटकोटीतटलुठन् -
मणिज्योतिर्द्योत्यप्रवरचरणाम्भोजयुगलम् ॥ ५

प्रतिष्ठां पुष्यन्ते हरिहरविरञ्चिप्रभृतयः
सुपर्वश्रेणीशा अपि च यदवापुर्जिनपते ! ।
तव स्वामिन् ! पद्मनिलय ! कमलाभाङ्घ्रियुगली-
सपर्या वर्यासौ सततविहिता हेतुरिह तत् ॥ ६

निषिद्धा सिद्धान्ते सकलममता यद्यपि विभो !
तथापि त्वं स्वामी जिनवर ! सदा मे नहि परः ।
मयेत्थं निर्णिन्ये तदियमुचिता तेऽपि भगवन् !
ममानुग्राह्योऽसाविति च करुणा सन्ततमपि ॥ ७

अकुण्ठाः श्रीकण्ठाच्युतविधिमुखानामपि चिदो
नदीयन्ते तेऽस्मिन् प्रवरतरविज्ञानजलधौ ।
त्वमेव ध्येयोऽतस्त्वमसि शरणं त्वं च सुखकृत्
ततस्त्वामेवाहं शरणमभजं दैवतनत ! ॥ ८

अहं याचे मुक्तिं न च हरिविरञ्चप्रभृतयः
समर्थास्तां दातुं तदहममलं ते पदयुगम् ।
श्रितस्तत्त्वं विश्वाधिप ! सकलकर्मामयमलं
मलं हत्वा सद्यो वितर तरसा तां श्रितवते ॥ ९

प्रभूता भूताद्याः प्रबलतररोगा अपि तथा
तव स्वामिन् ! नाम स्मरणवशतो यान्ति विलयम् ।
प्रचण्डे मार्तण्डे स्फुरति यदि वा द्योतितदिशा-
समूहेऽतिव्यूहस्तिमिरनिकरस्य प्रभवति ॥ १०

प्रियप्राप्तेर्हेतुः सततमबलानामपि धरा-
वनश्रीशोभाकृत् प्रवरसुमनः शालिफलदः ।
सदालिप्रोल्लासी सुखिततमपुंस्कोकिल ! लस-
द्रसालाभो देवस्त्वमसि सुरभिः प्रीतभुवनः ॥ ११

लसद्यादोनाथो रचयसि मुदं सोमरुचिभिः
प्रतापश्रीपोषं प्रबलजडताशोषमपि च ।
मरुच्चक्रासेव्यः परिमललसच्चम्पकतति-
र्जगद्धौक्याम्रौघौ जयसि भगवंस्त्वं तपऋतुः ॥ १२

जिन ! त्वत्तो रम्या प्रभवति सरस्वत्यमृतदा
निमित्तं शस्यानां त्वमपि सकलानां जिनपते ! ।

त्वदायत्तः सर्वो भुवनजनतायाः सुखभरः
पयोदस्त्वं चित्रं हरसि सकलं मेऽघपटलम् ॥ १३

सदाशालिस्फातिर्भवति सफला साशु कविभिः
श्रिता त्वत्तः स्वामिन् ! प्रवरवृषपोषैकनिपुण ! ।
स्फुरत्पद्मोल्लासिन् ! सकलभुवनानां कलुषतां
निराकर्तुस्तत्त्वं जयसि शरदस्तुल्यमहिमा ॥ १४

सदा पुन्नागश्रीः प्रभवति विभो ! दुर्भगतमा
लभन्ते सौभाग्यं प्रसरति हिमाली जनततौ ।
जनः प्रौढज्योतिः पटलपरिषेवी स्फुटतमा-
नुभावाद् यस्यासौ त्वमसि गुरुहेमन्तविभवः ॥ १५

पलाशानां पातं विदधति सदा पादपततौ
रुचिं स्वामिन् ! दोषाकरगुरुगवां नो प्रथयति ।
सदानालीकालीर्दहति विलसत्कुङ्कमततौ
स्फुरत्कुन्दामोदे त्वयि शिशिरताऽसौ समुचिता ॥ १६

जरासिन्धून्माथी नरकरिपुहा कामजनकः
स्फुरन्मायास्थानं प्रवरगुणगोपीवरतमः ।
सदानन्दोल्लासी जिनवर ! यशोदायकधनो
जगन्नाथोऽपि त्वं तदधिकगुणो रागहरणात् ॥ १७

अनात्मानो भूमिरुह इह विना कर्म यदि भोः
श्रयन्ते वृद्ध्यादीन् फलामुखभुजां भाग्यवशतः ।
तदा वर्णिन्योऽपि स्वपतिकृतपुण्यातिशयतो
भजन्तामुत्पत्तिप्रभृतिसमयुक्तीक्षणवशात् ॥ १८

तदीया भर्त्तारोऽप्यथ च महिलाकर्मवशतो
जुषन्तां जन्मादिस्वकृतवृषजन्त्वादिविकलाः ।
सदापीत्थं यूथ्याः परमतगता युक्तिरहिता
विडम्बन्ते येषां त्वमसि नहि शास्ताऽस्तकुमते ! ॥ १९

हराद् भूतो ब्रह्मा रचयति जगन्तीह किमसौ
हरेरेतानि प्राग् यदुरुजठरे सन्ति सततम् ।
बहिश्चेदेतानि प्रणयति हरिस्तन्न जगता-
मभिव्याप्तेत्येवं त्वदपपरकथा नाथ ! वितथा ॥ २०

जगद्विश्रामार्थं यदि पशुपतिः संहृतिविधा-
वदृष्टं संरुन्द्धे प्रसतकरुणास्तन्न कुरुते ।
कुतो दुष्टादृष्टव्यथितवपुषः स्वक्रमजुषो
जनान्नित्यानन्दाननृतमिति नाथाऽन्यवचनम् ॥ २१

समर्थः संहारे यदि पुररिपुश्चेतनमनाः
ककुप्कालाणूनां किमु न कुरुते संहृतिमसौ ।
स्वभावादुत्पतिस्थितिविलयिताभिस्त्रिपदिका
त्वयोक्ता या साऽतस्त्रिभुवनपतेऽर्थेषु घटते ॥ २२

त्वया सादर्धं स्पदर्धां दधदतिगभीरत्वरमया
बभूवाभिक्षारक्षततनुरिहाद्योऽम्बुधिरतः ।
अयोग्यत्वात् क्षिप्तो बहिरपि जगत्याः स विधिना
जनैरित्युक्तस्तत् प्रबलजडधीरूपभृदयम् ॥ २३

यथा दुग्धः शण्डः स तरुरवकेशीव शरदो-
ऽम्बुदो यद्वद् वन्ध्या युवतिरिव काशे कुसुमवत् ।

परे देवाः सेवाकृति नरि फलं नैव ददते
श्रितस्तत्त्वां स्वामिन्नभिमतविधाने सुरतरुम् ॥ २४

विभो ! कल्याणात्मन् ! सकलभुवनोत्कृष्टगरिमन् !
क्षमारामारम्याभरण ! शरण ! त्वं सुमनसाम् ।
जिन ! प्रोद्यज्जन्मावसरसुरक्लृप्तोत्सवततिः
सुखाभोगाश्लेषी जयसि सततं मन्दरगिरिः ॥ २५

मया स्पर्द्धि प्रौढ्या तव गुरुहृदातोऽभवमघात्
घनश्यामं तन्मां कुरु जिनपते ! सुन्दरवपुः ।
किलेत्थं विज्ञप्त्यै ग्रहततिरियं प्रैषि नभसा
त्वदङ्घ्र्योः सा लग्ना सकलमनुजैर्वीक्ष्यत इह ॥ २६

विभो ! त्वामेव श्रीनिकरमुरुभावात् प्रददतं
गुरुकृत्य प्रौढामरतरुगणः शिष्य इव यः ।
सदभ्यस्तीचक्रे प्रवरतरदानं कथमसौ
प्रदातृत्वात् तुल्यो भवति भगवंस्ते सुरनत ! ॥ २७

यतो लोकः सर्वो भवति कलितः शस्यरमया
श्रयन् नव्यां भूषां विलसति सदा मोदकतया ।
स्फुरज्ज्ञानज्योतिः पटलकृतनीराजनविधि-
र्जिनेश ! त्वं दीपोत्सव इव जयस्येष गुणवान् ॥ २८

अशोकः शोकार्त्ति हरति कुरुते चाद्भुतसुखं
सदा पौष्पी वृष्टिः किमु नु सुखसृष्टिस्त्रिजगतः ।
ध्वनिर्दिव्यः श्रोत्रेष्वमृतरसदानैकरसिकः
शरच्चन्द्रज्योत्स्नाधवलचमराली गतमला ॥ २९

स्फुद्रात्नं सिंहासनमुरुरुचां मण्डलमिदं
जनाल्हादि प्रोद्यन्मधुरिमगुणो दुन्दुभिरवः ।
सितज्योतिश्छत्रत्रितयमिति रम्या अतिशया-
स्तव स्वामिन् ! ध्याता अपि विदधते मङ्गलततिम् ॥ ३०

प्रौढश्रीगुणरत्नरोहणगिरे ! श्रीपार्श्व ! विश्वप्रभो !
त्रैलोक्याम्बुधिसोमसुन्दरगुरो ! देवेन्द्रवृन्दस्तुत ! ।
श्रीजीराउलिनामध्येयनगरीश्रुङ्गारहार ! प्रभो !
भूयास्त्वं भुवनस्य वाञ्छितविधौ चिन्तामणिः सर्वदा ॥ ३१

(शार्दूलविक्रीडित)

पू.आ.श्रीभुवनसुन्दरसूरिप्रणीतम्

श्रीजीराउलिमण्डन-

## ७७. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(उपजाति)

श्रियोऽभिवृद्धिं विजयोत्सवांश्च
यस्यानुभावाल्लभते जनोऽयम् ।
जीराउलीमण्डनपार्श्वनाथं
स्तोष्ये प्रभुं तं किमपि स्वभक्त्या ॥ १

प्रह्वो भवेन्नैव सहस्रजिह्वो
न वाक्पतिः सन्मतिभाजनं सः ।
त्वद्वर्णनायां तदपि प्रभो ! मां
भक्तिस्तवैषा तरलीकरोति ॥ २

रमापतिः प्रागरमोऽपि भाग्यै-
स्त्यक्तोऽपि भाग्याभ्युदयप्रधानः ।
आरोग्यवान् रोगयुतोऽपिसद्यस्-
त्वद्दर्शनादेव भवेन्नरोऽयम् ॥ ३

अकीर्त्तिरप्युज्ज्वलकीर्त्तिलक्ष्मीं
रूपश्रियं रूपविवर्जितोऽपि ।
अबुद्धिरप्यद्भुतबुद्धिसिद्धि-
मासादयेद् देव ! तव प्रसादात् ॥ ४

कल्पद्रुलम्भः शुभकामकुम्भ-
श्चिन्तामणिर्नाम महामणिश्च ।
यन्नैव दातुं प्रभवो भुवोऽपि
ददासि सद्यस्तदपि प्रभो ! त्वम् ॥ ५

तवैव भक्तिर्जिन ! भुक्तिमुक्ति-
हेतुर्नरेष्वेव च सा समग्रा ।
ध्यात्वेति देवा मनुजावतारं
मनोहरं न स्पृहयन्ति के के ? ॥ ६

प्रभो ! त्वदाज्ञावरहारवल्ली
विभूषणं यस्य हृदो बभूव ।
सौभाग्यभङ्गीसुभगं वृणीते
तं सिद्धिलक्ष्मीरपि दुर्लभा सा ॥ ७

तदेव वर्षं गुरुहर्षहेतुः
स एव मासः सुश्वसन्निवासः ।

दिनं घनांहोमथनं तदेव
त्वं वीक्ष्यते यत्र विभो ! जितात्मा ॥ ८

रत्नानि रोहणगिरेः कनकानि मेरो
रुप्यानि न प्रवररुप्यगिरेर्गृहीत्वा ।
सालत्रयं प्रवररत्नमयं नु यस्यां
देवैस्तवेश ! रचितं निचितं महोभिः ॥ (वसन्ततिलका) ९

यस्यां तवोपरि परिस्फुटचन्द्रकान्त-
चन्द्रेशचन्द्रकरशुभमदभ्रमूर्ति ।
छत्रत्रयं प्रवरमौक्तिकरत्नराजि
विभ्राजि राजति तवोज्ज्वलकीर्त्तितुल्यम् ॥ १०

तापप्रचारशमनः सुमनोनिषेव्यः
पादैः पवित्रितधरो नृसुरप्रमोदी ।
स्कन्धश्रिया प्रवरयाऽतिविराजमान-
श्चैत्यद्रुमस्त्वमिव देव ! विभाति यस्याम् ॥ ११

भास्वन्मणीमयमुदारतरप्रभाम्भः-
पद्मीभवत्प्रणतदेवकिरीटकोटि ।
भाति त्वदीयवपुषांशुपुषा हि यस्यां
सिंहासनं स्फुररुचा मणिनेव मौलिः ॥ १२

सुरासुरैर्निर्मितदण्डमण्डितः
सच्चामरैः शुभ्रतरैः प्रवीजितः ।
त्वं राजसे यत्र जगत्पते ! यथा
सौदामिनी दामविराजिताम्बुदः ॥ १३

तेजः श्रिया निर्जितभानुमण्डलं
त्वद्रूपलक्ष्म्याः किल कर्णकुण्डलम् ।
प्रमोदिताखण्डलमण्डलं मुहु-
र्भामण्डलं राजति यत्र ते विभो ! ॥ १४

सुरनिकरकराग्रस्त्रस्तमन्दारजाति-
प्रमुखकुसुमवृष्टेर्दम्भतः सेवितुं त्वाम् ।
उडुततिरवतीर्णा किं नु यत्र त्वदीय-
स्फुरदुरुतरकीर्त्या स्फूर्त्तिमत्या जितेयम् ॥ (मालिनी) १५

अयमिव जिनभर्त्ता दुःखहर्ता सुसम्प-
न्मयशिवपदकर्त्ता वर्ततेऽन्यो न कश्चित् ।
इति वदति नभःस्थो दुन्दुभिस्ते पुरस्ता-
ज्जिन ! जलधरगर्जि तर्जयन् यत्र नादैः ॥ १६

विलसदमृतधाराः किं पिबाम्येष हर्षा-
न्मधुरतरपयो वा कामधेनुस्तनोत्थम् ।
इति जननिकरेण ध्यायताऽपायि यस्यां
पुलकिततनुभाजा नाथ ! गौस्तावकीना ॥ १७

मोहाह्वभूपतिरयं जगतामसाध्यो-
ऽसाधि त्वया मदनमुख्यभटैर्युतस्तत् ।
उत्तम्भितस्तव पुरः सुरसेव्य ! यस्या-
मिन्द्रध्वजस्य मिषतो विजयध्वजोऽयम् ॥ (वसन्ततिलका)१८

धैर्येणाधरितेन मेरुगिरिणा सर्वंसहत्वेन वा
पृथ्व्या निर्जितया स्वरत्ननिचयः प्रादायि यस्ते विभो ! ।

तेजःश्रीभिरपाकृतैर्दिनकरैर्यद्वा रूचां मण्डलं
तैरेतद् विदधे किमित्यविरतं यत् तर्क्यते कोविदैः ॥ १९
(शार्दूलविक्रीडित)

तद्धर्मचक्रं भगवंस्तवाग्रे
देदीप्यते दीप्तिविराजि यत्र ।
श्रीतीर्थलक्ष्मीललनाललाटे
ललामशोभां प्रथयत् सदापि ॥ (यु) २०

मणिमयकपिशीर्षकालिरुद्य-
त्किरणगणागुरुवप्रशीर्षसंस्था ।
मुकुरति गगनस्पृशां सुरीणां
वदनविलोकविधौ सदापि यत्र ॥ २१

मणिमयभुवि बिम्बितं निरीक्ष्या-
ऽमरनिकरं किमु नः पुरीर्जिघृक्षुः ।
प्रचलति सुरसार्थ एष इत्याकुल-
हृदयोऽजनि यत्र दैत्यवर्गः ॥ २२

यत्रेन्दुकान्तमयभूमिषु चन्द्रकान्त्या-
श्लेषाद्रवामृतरसैर्वचनैश्च तेऽर्हन् ! ।
पद्भ्यो हृदोऽपि च चलन्मृगलोचनानां
रागः प्रयात्यविकलो मलवज्जलेन ॥ (वसन्ततिलका) २३

द्वारेषु मौक्तिकमयीः प्रतिबिम्बभाजो
माला विलोक्य मणिभूषु सितेतरासु ।
स्रस्ता किमस्मदुरूहारलतेति यस्या-
मत्याकुला मृगदृशो हृदयं स्पृशन्ति ॥ २४

तोरणस्थशितिरुङ्मणिमालां बिम्बितां स्फटिकभूमिषु यत्र ।
वीक्ष्य वातचपलां चलतोऽहेर्भीतितोऽतितरला महिलाः स्युः॥२५

स्फटिककुट्टिमकोटितटीलुठद्विविधनीलमणीननणीयसः ।
समवलोक्य हरित्तृणवाञ्छया यदुपरि त्वरिता हरिणा न के ॥२६

हर्षोत्कर्षवशप्ररूढरभसप्रारब्धनाट्यक्रिया-
भ्रश्यन्निर्मलहारमौक्तिकगणं यं पातयाञ्चकुषी ।
पौलोमी पुलकोल्लसत्तनुलता विश्वेश्वर ! त्वत्पुर-
स्तस्या यत्र स एव बीजति महानन्दद्रुमोद्भूतये ॥ २७

(शार्दूलविक्रीडित)

भक्त्याविष्कृतभावभासुरनरस्वर्वासिनां सन्तते-
रुद्गच्छत्पुलकप्रवर्द्धिततनौ चित्तेऽपि यस्यां मुहुः ।
स्वामिंस्तेऽङ्घ्रितिविष्टविस्फुटनखप्रोद्यद्रुचां मण्डलं
व्याहाराश्च मनोहराः सततमप्युद्द्योतमातन्वते ॥ २८

इति विविधविकल्पांस्तन्वती कोविदानां
समवसरणभूमिः कस्य न स्यान्मुदे सा ।
जिनवर ! तव यस्याः श्रीविशेषावलोकाद्-
भवति तदपि नूनं स्वर्विमानं विमानम् ॥ (मालिनी) २९

(शार्दूलविक्रीडित)

किन्नर्यो गिरिकन्दरेषु महिला भूवल्लभानां क्षितौ
पाताले दनुजस्त्रियः सुरवधूवृन्दानि देवालये ।
व्यन्तर्यो विविधाश्रयेषु भगवन् ! सङ्ख्यातिगांस्ते गुणान्
वीणावेणुवरक्वणातिमधुरं गायन्ति रात्रिन्दिवम् ॥ ३०

मोहद्रोहकदाग्रहग्रहमदोन्मादप्रमादस्फुर-
ल्लोभक्षोभमुखान्तरारिनिकरैः पीडां परां प्रापितः ।
स्वामिंस्त्वां शरणं श्रितोऽस्मि जगतां दुःखक्षयायैव य-
न्मुक्तिस्थोऽप्यवतीर्णवानसि युवं त्वं विश्वविश्वेश्वरः ॥ ३१

निर्नीरेऽम्बुरूहं मरौ सुरनदीदौस्थ्ये सुरद्रः कुहू
तम्यां पूर्णनिशाकरो हिमभरे मध्याह्नभानूदयः ।
भृत्येऽप्यद्भुतराज्यमापदि महासम्पत्प्रकर्षः कलौ
कालेऽस्मिन्नपि यज्जगत्त्रयपते ! त्वद्दर्शनं देहिनाम् ॥ ३२

(स्रग्धरा)

सौधे लक्ष्मीरगण्या पटुकरटिघटा वाजिनः स्वर्णभूषा
आयुः प्रौढं प्रभुत्वं विमलतरयशो व्यापदः सम्पदाल्यः ।
रूपं चातुल्यरूपं त्वदमलचलनोपासना कल्पवल्लेः
पुष्पाण्येतानि विश्वाधिप ! शिववनितास्वमितह्नं फलन्तु ॥ ३३

श्रीजीरापल्लिदेव ! त्रिजगदधिपते ! प्राज्यराज्यादिलक्ष्मी-
दातस्तात ! त्वदीयामलचलनयुगोपासनावासनातः ।
स्तुत्वैव प्रार्थये त्वां महिमदिनकरज्योतिरुद्योतिताशं
यस्मात् त्वं प्रार्थितार्थस्फुटघटनविधौ कल्पवृक्षाधिकश्री ॥ ३४

पू.आ. श्री विद्यासागरसूरिविरचितम्

# ७८. श्रीगौडिपार्श्वप्रभुस्तवनम्

(संस्कृत-उर्दू)

(मालिनी)

सकलभविकचेतः कल्पनाकल्पवल्ली,
गहनवनवितानं प्रोद्भवद्वारिवाहम् ।
फणिपतिकलितांह्रीं चारुगौडीपुरेश-
मनणुगुणनिधानं पार्श्वनाथं नमामि ॥ १

विबुधनतविभो ते खूब दीदार पाया,
सुगुरुभिरपि सम्यक् देव तूं ही बताया ।
जिन तव परिकर्मी आज हो ताजकीमें,
परिरमति मनो मे पासकी आस कीजे ॥ २

शिरसि मम सिना चेत् जो होवे दोस्त तेरा,
भुवनजनचमत्कृत् तौ खुलै वख्त मेरा ।
जयति जयिप्रतापः पासजी का दुनीमें,
चतुरनिकरवक्त्रात् सिफ्त तेरी सुनी मैं ॥ ३

त्वमसि मम विधाता तूं हि मादर पिदर तुं,
कुरु मदुपरि तूणं दोस्त सीधी निजर तुं ।
कलयति मनुजन्मा यार तारीफ केती,
तव त्रिभुवनराजो जो भुजांएकसेती ॥ ४

अनिमिषप्रणतांह्रे मात वामाके नंदा,
त्वमसि मम शरण्यस्तें प्रभूजी हुं बंदा ।

त्वमपि यदि मदियां अर्ज दिलमें न ल्यावैं,
भवतस कतमोऽन्यो दाद जिस पास जावैं ॥ ५

नहि नहि विहितास्ते कछु गुनेहकी कमीमें,
सहन उत त्वदाभो नांहि अस्मान् जमीमें ।
परमतम - कृपालो गुनह बगसीस कीजैं,
नृपतिमहिमजैत्री मौज महाराज दीजैं ॥ ६

स्थलपति पुरतोऽहो और को देव कैसा,
जनयति किल वादं क्या रुपैये सुपैसा ।
लसति भुवनभर्तुर्नूर आफ्ताब जैसा,
स्फुरति तव तरस्ते मर्दगा जी हमेशां ॥ ७

समुदितनवतेजः श्रीधवलधिंगदेवा,
भृशमुपतनुतते नाथ हररोज देवा ।
मयि जिनप घनत्विट् किजीए ऐसी नेकी,
अलमहमिह दद्यां जैसी नौबत फत्तेकी ॥ ८

इत्थं श्रीपुरुहूतवन्दितपयो गोडीपुरालङ्कृति-
र्वामाकुक्षिसरः सरोरुहसमः श्रीपार्श्वनाथप्रभुः ।
श्रीमत्पारकराख्यराष्ट्रसुदरीसिंहः कृपाणां निधि-
र्विश्वाहर्मणिरश्वसेनतनुभूर्विद्यार्णवः संस्तुतः ॥ (कलशः) ९

(शार्दूलविक्रीडित)

तार्किकशिरोमणि पू.आ. श्री विद्यानन्दसूरिविरचितम्

## ७९. ॥ श्रीपुर-पार्श्वनाथस्तोत्रम् ॥

यः श्रीपादं तवेश श्रयति सपदि सः श्रीपुरं संश्रयेत
स्वामिन् पार्श्वप्रभो त्वत्प्रवचन-वचनोद्दीप्र-दीप-प्रभावैः ।
लब्ध्वा मार्गं निरस्ताऽखिल-विपदमतो यत्यधीशैः सुधीभिः
वन्द्यः स्तुत्यो महांस्त्वं विभुरसि जगतामेक एवाऽऽप्तनाथः ॥१

(स्रग्धरा)

अन्ये नाऽऽप्ता विरोधाच्छ्रुतिरपि न ततः कोऽप्ययं वेत्ययुक्तिः
सम्यङ्निर्णीति-बाधा-प्रमिति विरहतः कश्चिदेवास्ति वन्द्यः ।
नाशं दोषावृती यत्क्वचिदपि भजतो दृष्ट-हानि-प्रकर्षात्
निःशेषं हेम्नि यद्वन्मलमिति भवतो निष्कलङ्कत्वसिद्धिः ॥ २

(स्रग्धरा)

सूक्ष्माद्यर्थः समक्षोऽनुमिति-विषयतः कस्यचिद्वाऽनलादिः
स त्वं निर्द्धूत-कर्म-क्षितिधर-निवहो दृष्ट-निःशेष-सत्त्वः ।
न्यायाबाध्याऽऽगमोऽर्हन्नसि खलु भवतः सा ह्यनेकान्तदृष्टिः
प्रत्यक्षाद्यैरबाध्या भवति न नियतैकान्तयुक्तिप्रभाढ्या ॥ ३

(स्रग्धरा)

तावत्प्रत्यक्षमेव प्रथयति तदनेकान्तवाद-प्रसिद्धिं
यद्वा स्कन्धस्य वर्णाद्यवकर-निचितैकात्मनः स्यात्प्रतीतिः ।
अन्तश्चित्तस्य सौख्याद्यनुमित-चिदसङ्कीर्णभावस्य दृष्टेः
सामान्यं वा विशेषो यदि न हि घटतेऽन्योन्यविश्लेष्यवृत्त्या ॥४

(स्रग्धरा)

तदनेकान्तात्मकं यत्सदनुनयवशं सर्वमर्थक्रियाकृत्
प्रमिति - प्रव्याप्त-रूपं स्फुट-निज-विषयाकार-संवित्तिवद्वा ।
अपि वा सिद्धं त्रिकालत्रय-समय-गतानन्तपर्याय-पुष्यत्
परिणामे तत्प्रतीतात्मनि हृत-नियतैकान्तिकेऽध्यक्षसिद्धेः ॥५

(महास्रग्धरा)

स्यात्तादात्म्यमुपाश्रितैरधिगतानन्तैर्भविष्यद्भवद् -
भूतैः सत्क्रम-यौगपद्य-विधिभिर्यत्पर्ययैर्वा गुणैः ।
सङ्कीर्णाङ्गमदद्रवत् द्रवति वा द्रोष्यत्यथो द्रव्यमि-
त्येतद्धर्मिणि धर्मिता तदपरेष्वेवं भवेत्प्रक्रिया ॥ ६

(शार्दूलविक्रीडित)

नश्यत्युत्पित्सु तावद्भवति नशनवत्स्थास्नु सम्पद्यते वा
स्थास्यत्युत्पत्स्यते सा स्थितिरसकृदलं नङ्क्ष्यति स्थास्यतीत्थम्
नंक्ष्यत्युत्पत्स्यते तन्नशनमपि तथोत्पत्स्यते स्थास्यते य-
न्नंक्ष्यत्युत्पत्तिरेवं त्रिविधमिति भवेत्तत्त्वमर्हन् तवेष्टम् ॥ ७

(स्रग्धरा)

तदतद्रूपाः पदार्थाः स्व-पर-विधि-दिशाऽपेक्ष्य सर्वस्य सर्वा-
करणात्क्षीराद्यवार्सि विदधदिह घटाद्यास्तु नैते पटाद्याः
न च पौरस्त्यः स पश्चाद्भवति न च पुरा निर्व्यपेक्ष-स्वभावः
तदनेकाकारमेकं सदसदभिमतं तादृगेतन्न तादृक् ॥ ८

(महास्रग्धरा)

स्याद्वादे सप्तभङ्गीनयजुषि विधि-निर्द्धारणाभ्यां हि वस्त्वा-
रूढं सत्वेतरात्मक्रमनियमदिशा लक्ष्यतेऽर्थक्रियाकृत् ।

स्वर्णादेर्वा कथञ्चित्सत इह भवति स्यात्स्वरूपान्तरास्ति:
प्राय: पूर्वोत्तराकृत्यपगम–जनन–द्रव्ययुक्तं हि वस्तु ॥ ९
(स्रग्धरा)

स्यादस्ति स्व–चतुष्टयादितरत: स्यान्नास्त्यपेक्षा क्रमात्
तत्स्यादस्ति च नास्ति चेति युगपत्सा स्यादवक्तव्यता ।
तद्वत्स्यात्पृथगस्ति नास्ति युगपत्स्यादस्तिनास्त्याहिते
ऽवक्तव्ये गुण–मुख्य–भाव–नियत: स्यात्सप्तभङ्गी–विधि: ॥१०
(शार्दूलविक्रीडित)

स्याद्वाद: स्वपरावतारविषयेणोद्दीप्तसत्वेतरा–
द्याकाराद्यदनन्तधर्मनिलयस्योच्चै: सतो धर्मिण: ।
सम्यङ्न्यायबलात्समर्थवदनं य: सप्तभङ्गीनया–
पेक्ष: प्रश्नवशाद्विधीतरकृतेरेकत्र निर्बाधत: ॥ (शा.वि.)११

सम्यङ्न्यायमतोदयेन सुनयैस्तस्यैकदेशैरथो
निक्षेपैश्च तदर्पणार्पणपरैर्व्यक्तीकृतप्राभव: ।
नि:शेषावरण–क्षय–क्षण–भवत्सर्वार्थ – सम्पद्विभा–
भाजा नाथ जिन त्वयाऽध्यवसित: स त्वं समाश्रीयसे ॥ १२
(शा.वि.)

जीव: कर्माणि भाव: शुभमशुभमतस्तत्फले पुण्यपापे
सौख्यं दु:खं तथा दृक् स्वधिगमचरितान्यागम: शब्दवार्धौ ।
हेयादेयौ प्रमेय: प्रमितिरधिकृत: कालदेशादिमोक्ष
सर्वं सिद्ध्यै तवैव प्रभवति भगवन् शासनेऽतो भजाम: ॥१३
(स्रग्धरा)

देव श्रीपुरपार्श्वनाथ भुवनाधीशार्च्यपादाम्बुज
प्रध्वस्ताऽखिलकर्मजात विपुलज्ञानप्रभाभासुर
श्रेयोमार्गनिदर्शने हि भवता नान्यो विनाऽस्ति क्षमः
तस्माद्वन्द्यपदत्वमेव महतां निःशेषतत्त्वार्थवित् ॥ १४

(शार्दूलविक्रीडित)

देवः श्रीमानशेष-त्रिदशपरिवृढ-प्राच्र्य पादारविन्दो
बाह्यान्तर्विग्रहादि-प्रभवदतिशयो धर्मतीर्थस्य नाथः ।
इत्येतद्वास्ति मायाविषु सुरविभुषु ख्यात-बुद्धादिकेषु
द्वेषाद्यावेशवत्सु प्रतिहतविषयान्योन्य वैताथ-वाक्षु ॥ १५

(स्रग्धरा)

त्वदन्येऽध्यक्षादि-प्रतिहत वचो युक्ति विषया
विलुप्ताभा लोक-व्यपलपन-सम्बन्ध-मनसः ।
भजन्ते नाऽऽप्तत्वं तदिह विदिता वञ्चन-कृतिः
विसंवादस्तेषां प्रभवति तदर्थापरिगतेः ॥ (शिखरिणी) १६

नाऽत्यक्षे जैमिनिर्वा श्रुतिसमयबलः सम्यगर्थाविबोधात्
नैतादृक्षस्य दोषावरण-विगमनाभावतोऽतीन्द्रियार्थे ।
ज्ञानं श्रुत्या सदर्थावगतिरथ ततः सत्यतेत्येष दोषो
न प्रामाण्यं स्वतोऽस्याः किल घटवदचैतन्यतः सिद्धमेतत् ॥१७

(स्रग्धरा)

आप्तोक्तं चेत्प्रमाणं व्यपनयतु तदर्थावदानान्न साप्ता-
नुक्तेः स्याद्वक्तृ दोषो यदि तदपगमान्नैवमित्यप्रतीतिः ।

क्वैवं सिद्ध्येद्विभागोऽभ्युपगमविगमैः पौरुषेयत्वमन्यत्
वा सुस्थं नैव कर्तृस्मरणविलयनान्नेति नाप्तत्वमन्यत् ॥ १८
(स्रग्धरा)

सुखदुःखादि - विचित्र-भाव-नियतेनैकस्वभावेश्वरः
प्रभवो नैव भवो न कारणलवात्कार्यस्य नानाकृतिः ।
यवबीजाङ्कुरवत्तथाऽपरिणतेऽनर्थक्रियासम्भवः
स्वभवावस्थितदेशकालिकभिदाभाजां स कर्ता कथम् ॥ १९
(मत्तेभविक्रीडित)

इच्छा वा नियतेतरा न लभते सम्बन्धमीशेन तत्
कर्मप्राभवतः सुखादिविभवः पर्याप्तमेतेन हि ।
भेत्ता कर्ममहीभृतां सकलविन्नानादिसिद्धस्ततो
यत्काणाद-हताक्षपादगदितं तत्स्यात्कथं श्रेयसे ॥ २०
(शार्दूलविक्रीडित)

सत्सर्वं क्षणिकं यदिच्छति पृथक्कालक्षणानां यतः
कार्यं कारणमित्यतश्चिरतरातीतेषु वा वासनाः ।
तच्च क्व क्षितिकर्तृभोक्तृरचनासम्यक्त्वसंज्ञादिकं
जल्पन्सिद्धिपदं विशुद्धधिषणः शौद्धोदनिः स्यात्कुतः ॥ २१
(शार्दूलविक्रीडित)

यदयं सर्वत्र सर्वं प्रकृतिरविकृतिः सप्त तस्या विकाराः
महदाद्याः षोडशोच्चैर्गण इति पुरुषस्तद्विकृत्यप्रयुक्तः ।
स्वयमन्यो न प्रभूतिक्रममखिलकलाबन्धहीनस्य जन्तोः

विलपन्मुक्तिः कुतः स्यात्स चपलकपिलो धीमतां दे[ध्ये]य-
भावः ॥ (महास्रग्धरा) २२

प्रतिभासे प्रतिभासितार्थविषयं दृश्यं प्रपञ्चे सति
प्रतिबिम्बादि तथा सदेव न हि निष्पर्यायवस्तुस्थितिः ।
ननु कस्यादिगतिं रुणद्धि भुवने सिद्धां क्रियाकारक-
प्रकृतिव्युज्झितसाध्यसाधनगतिब्रह्मा कथं भासते ॥ २३
(मत्तेभविक्रीडित)

यदेकं वाऽध्यक्षे मितिरिति च निर्वाच्यमखिलं
तथा तत्त्वं चोपप्लुतमिति विचारं न सहते ।
प्रमाणादन्यस्मात्प्रथितवचनाद् युक्तिभजनात्
विना नैतत्सिद्धिर्विधिनियमयोरर्थनियतेः ॥ (शिखरिणी) २४

भावो भावादभावः समयनियमतः सद्विवर्तादसद्वा
ग्राह्योक्तेर्द्वैतमुद्यद्गुण-गुणिविवृतेरोघतो द्वैतबुद्धिः ।
नित्यं पूर्वापरान्तात्क्षणिकमनुवृतेरैक्यमन्यत्ववृत्तेः
नानात्वं वृत्तिदोषान्न भवति भगवन् स्यादनेकान्तसिद्धिः ॥२५
(स्रग्धरा)

एषोच्चैर्वाक् तव शिवपदावाप्ति-निःश्रेणि-भूता
धीमद्ध्येया जगति जनताऽऽनन्द-सन्दान-धीरा ।
अस्माद्धातृ-प्रभृतिवचनाकर्णनाज्जातकम्पा-
ऽशेष-प्राणि-प्रणयन-विधौ जायते या शरण्या ॥ २६
(मन्दाक्रान्ता)

विदधदतिशयममित-मति मुनिनाथ-मान्यमनन्यभाङ्
नमित-सुर-रवि-भुवन-परगुरु-तीर्थकृत्त्व-सनामयत् ।
उदय-पथ-गत-तदनु विसृतिरशेष - तत्त्व विभासिनी
जयति जिन जिन विजित मनसिज भारती तव भासुरा ॥२७

जय जय जगती-नत श्रीपद श्रीपुरी-निलय
नियत-भास्यतारुण्य कारुण्य पुण्याकर [?] ।
परमपुरुष पार्श्वनाथाधिनाथासनाथाहंस
विनतवर दमाभिरक्षाज रक्षाद्य रक्षाक्षय ॥ २८

शरण्यं नाथाऽर्हन् भव भव भवारण्य-विगति-
च्युतानामस्माकं निरवकर-कारुण्य-निलय ।
यतोऽगण्यात्पुण्याच्चिरतरमपेक्ष्यं तव पदम्
परिप्राप्ता भक्त्या वयमचल-लक्ष्मीगृहमिदम् ॥ २९
(शिखरिणी)

एभिः श्रीपुर-पार्श्वनाथ-विलसन्माहात्म्य-पुष्यत्सुधा-
ऽऽकूपारो हि निदर्शितः प्रविसरद् ? वाङ्मार्ग-चातुर्यतः ।
तस्मात्स्तोत्रमिदं सुरत्नमिव यद्यत्नाद् गृहीतं मया
विद्यानन्द-महोदयाय नियतं धीमद्भिरासेव्यताम् ॥ ३०
(शार्दूलविक्रीडित)

पू.आ.श्री भावप्रभसूरिविरचितम्

## ८०. ॥ श्रीशङ्खेश्वरपार्श्वनाथाष्टकम् ॥

(उपजाति)

श्रीसद्म पद्मापतिपूजिताङ्गं, स्नात्राम्भसो जातजयं जरान्तात् ।
सत्प्रातिहार्येण सदा सनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ १

लीलागृहं मङ्गलबालिकायाः, सुखाऽऽसिकायाः प्रवरं वदान्यम्।
यमीश्वरं निर्मलयोगनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ २

गलत्प्रभावं कमठस्य कष्टं, व्यालस्य बाल्येऽपि कृतं हि येन ।
तं नित्यसेवाऽऽगतनागनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ३

मुखश्रिया निर्जितचारुचन्द्रं, सद्भूषणाभूषितदिव्यदेहम् ।
प्रभावतीप्रेमरसैकनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ४

अनेकदेशाऽऽगतयात्रिकाणां, मनोऽभिलाषं ददसे समक्षम् ।
गम्भीरताहारितसिन्धुनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ५

कल्पद्रुचिन्तामणिमुख्यभावा इच्छाफलं देहभृतां फलन्ति ।
यन्नामतस्तं श्रितनाकिनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ६

रोगा वियोगा रिपवो गरिष्ठाः, शोकाग्नितोकादिभवाः प्रयान्ति ।
नाशं यतः शान्ततयोडुनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ७

भावप्रभेणाभिहितं यदिदं, स्तुत्यष्टकं दुष्टविघातकारि ।
तत्त्वं सदाऽभिष्टदपार्श्वनाथं, नमामि शङ्खेश्वरपार्श्वनाथम् ॥ ८

पू.आ.श्री भावप्रभसूरिविरचितम्

## ८१. ॥ श्रीबृहच्छ्यामलपार्श्वनाथस्तुत्यष्टकम् ॥

(शार्दुलविक्रीडित)

श्रीमत्कान्तिकलापमङ्गललसल्लब्ध्यैकलीलाऽऽलयः
सेव्यः पार्श्वजिनेश्वरो विजयते सच्छ्यामलाख्यो महान् ।
हैमैर्हारि-विभूषणैश्च कुसुमैः सम्पूजितः सुन्दरै-
र्वृक्षौघैरहमञ्जनाग(गि)रिरयं मन्ये विचित्रोद्भवैः ॥ १

प्रोद्यद्दीपकमालिकाप्रतिमिदं पार्श्वप्रभोराननं
तेजः पुञ्जविराजमानमनघं दृष्ट्वेति शङ्कां दधे ।
चञ्चच्चञ्चलितं नभोदपटलं नव्यप्रभाभूषितं
किं वा काञ्चनभूधरैरभिनवैः कालोदधी(धा)वुद्गतम् ॥ २

सज्जात्यादिसुमोत्करैर्धवलभैर्गात्रं प्रभोरर्चितं,
शुद्धं सूर्यसुताजलप्रभसमं संलक्ष्यते सज्जनैः ।
एतत् किं गगनं दिवाऽपि यदहो ! ताराश्रितं भास्वरं,
किं वा नूतनपुण्डरीककलितो गम्भीरनीराशयः ॥ ३

वक्त्रेणाशु जितो विधुर्विधुरितः खेटोऽभवत्खेदतः,
कार्ष्ण्यं सन्दधदन्तरेव सकले लोके कलङ्की ततः ।
नेत्राभ्यां कमलोत्करोऽपि च जितो यातो जले भीतितः,
किं ते नौमि नवीनपुण्यवपुषः सर्वं हि सत्प्रभावम् (?) ॥ ४

श्रीमत्पत्तनपत्तने प्रवरके ढण्ढेरके पाटके,
गच्छे स्वच्छगुणान्विते सदयने श्रीपू(पौ)र्णिमीयाभिधे ।
पूज्यश्रीललितादिमप्रभगुरोः पादाम्बुजोपासकः
प्राप्तः श्रेष्ठिपदं प्रभाकरसमो वीराह्वयो वीर्यवान् ॥ ५

चैत्ये दौष्यकमुख्यकेन विधिना तेनोच्चकैः कारिते,
बिम्बं पार्श्वजिनेश्वरस्य सुखदं श्रीश्यामलाख्यं महत् ।
सार्धं श्राद्धजनैर्महोत्सवभृतं संस्थापितं चा(सा)ऽऽदरं,
यत् पूर्वं हि कुमारपालनृपतेश्चैत्यस्य बिम्बं त्विदम् ॥ ६

श्रीश्रीमालविशालवंशकमले जातो मरालोपमः,
श्रीवीराह्वयसन्ततौ दिनमणिर्यस्तेजसीश्रेष्ठिराट् ।
श्रीभावप्रभसूरिणा स्वगुरुणा सङ्घैः समं चाधुना
चैत्ये तेन महाजनाधिपतिना संस्थापितः श्रीप्रभुः ॥ ७

विषमकलियुगेऽस्मिन् म्लेच्छतो भीतिमाप्य,
परमसमयविद्भिः पूर्वमुत्तारितं यत् ।
पुनरपि जिनबिम्बं स्थापितं चैत्यगर्भे,
वसुतुरगतुरङ्गोर्वीप्रमाणेऽत्र वर्षे ॥ (१७७८) ८

निहितनभसि मासे चन्द्रवारे चतुर्थ्यां,
विमलतरविलग्ने श्राविका केसराख्या ।
विहितजिनपभक्तिर्जोइती तत्सुता श्री-
रिव कथयति भद्रं सूरिभावप्रभाख्यः ॥ ९

पू.आ. श्री सोमदत्तसूरिरचितम्

## ८२. ॥ श्रीकुङ्कुमलोलपार्श्वजिनस्तवनम् ॥

(द्रुतविलम्बित)

कुवलयालिकुलायरकज्जल द्युतिधरं धरणेन्द्रनिषेवितम् ।
सकलकल्पितकल्पतरूपमं नमत कुङ्कुमलोलमलोलकम् ॥१

फणिमणिच्छविराजिविराजितं कमठशाग्रशठैरपराजितम् ।
सुगतिदङ्गनदन्तिनमानमत् सुरवरं रवरञ्जितसज्जनम् ॥ २

विपुलमङ्गलमङ्गलतालसं घनकलङ्ककलङ्कमलीमसं ।
सुनयनं नयनन्दितविष्टपं, जिनवरं नवरङ्गधरं श्रये ॥ ३

क्षतिवतः स्मर विड्वरडंवरा नव शठे कमठे व्यसवत्पुर ।
जनमनोरमनोरमकामिनीसुरतरङ्गतरङ्गरतं नव ॥ ४

क्षयमुपैति विपन्नगपन्नगप्रभवभैरभरैरभराश्रितः ।
त्व नमतां नमतां भवतः, क्रमात् विपुलसंविलसन्ति च संपदः॥ ५

एवं कुङ्कुमलोलाह्वः श्रीपार्श्वसकलकलौ ।
श्रीसोमदत्तसूरि व्युदच्छ्रितां श्रेयसे भूयात् ॥ ६

पू.आ. श्री पद्मसुन्दरसूरिविरचिता

## ८३. ॥ श्रीपार्श्वजिनस्तुतिः ॥

(अनुष्टुप्)

त्वमेव जगतां धाता, त्वमेव जगतां पिता ।
त्वमेव जगतां त्राता, त्वमेव जगतां विभुः ॥ १

नूनं त्वद्वचनाऽर्केण नृणामन्तर्गतं तमः ।
विलीयते न तद् भानुभानुभिः सततोद्गतैः ॥ २

अस्नातपूतस्त्वं विश्वं, पुनासि सकलं विभो ! ।
स्नापितोऽस्यद्यतन्नूनं, जगत्पावित्र्यहेतवे ॥ ३

पूतस्त्वं जगतामेव, पवित्रीकरणक्षमः ।
उद्योतवान् शशाङ्को हि, जगदुद्योतनक्षमः ॥ ४

अवामनसलक्ष्मं त्वां श्रुतिराह स्म तन्नसत् ।
दिष्ट्या नः परमं ज्योतिस्त्वं दृग्गोचरतामगाम् ॥ ५

अभूषणोऽपि सुभगोऽनधीतोऽपि विदांवरः ।
अदिग्धोपि सुगन्धाग्रः संस्कारो भक्तिरेव नः ॥ ६

यथा ह्याकरजं रत्नं संस्काराद् द्योततेतराम् ।
गर्भजन्मादिसंस्कारैस्तथा त्वं विष्टपत्रये ॥ ७

एकोऽपि त्वमनेकात्मा, निर्गुणोपि गुणैर्युतः ।
कूटस्थोऽथ न कूटस्थो दुर्लक्ष्यो लक्ष्य एव नः ॥ ८

नमस्ते वीतरागाय नमस्ते विश्वमूर्तये ।
नमः पुराणकवये, पुराणपुरुषाय ते नमः ॥ ९

निःसंगाय नमस्तुभ्यं, वीतद्वेषाय ते नमः ।
तितिक्षागुणयुक्ताय, क्षितिरूपाय ते नमः ॥ १०
द्रवरूपाय शुद्धाय, नमः सलिलमूर्तये ।
निःसंगतागुणाढ्याय, दधते पावनीं तनुम् ॥ ११

शुक्लध्यानाग्नये तुभ्यं, नमः कर्मेन्धनप्लुषे ।
रजः सङ्गवियुक्ताय, विभवे स्वात्मने नमः ॥ १२

सर्वक्रतुस्वरूपाय, यजमानात्मने नमः ।
नमः सोमस्वरूपाय, जगदाह्लादिनेऽस्तु ते ॥ १३

अनन्तज्ञानकिरणस्वरूपायार्कतेजसे ।
अष्टमूर्तिस्वरूपाय, नमो भावि जिनाय ते ॥ १४

दशावताररूपाय, मरुभूत्यात्मने नमः ।
नमो गजावताराय, नमस्ते त्रिदशात्मने ॥ १५

विद्याधरावतारायाच्युतदेवाय ते नमः ।
वज्रनाभिस्वरूपाय, ग्रैवेयकसुरात्मने ॥ १६

कनकप्रभरूपाय, नमस्ते प्राणतर्भवे ।
नमः श्रीपार्श्वनाथाय लोकोद्द्योतकराय ते ॥ १७

कमठासुरदर्पाग्निजलदाय नमो नमः ।
अनेकान्तस्वरूपाय, नमस्ते सर्वदर्शिने ॥ १८

चरमेऽप्यवतारे ते, परमश्रीर्महोदया ।
जजृम्भेऽस्तु नमस्तुभ्यमश्वसेनसुतात्मने ॥ १९

स्तुत्वा त्वां भगवन्नेवं वयमाशास्महे फलम् ।
भवे भवे भवानेव, भूयान्नः शरणं जिनः ॥ २०

पू.आ. श्री पद्मसुन्दरसूरिकृतम्

## ८४. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

त्वं स्वयम्भूः परं ज्योतिः प्रभविष्णुरयोनिजः ।
महेश्वरस्त्वमीशानो, विष्णुर्विष्णु रज़ोः रजः ॥ १

भवानिव जगल्लोकमशोकं कुरुते तरुः ।
अशोकोऽपि निजच्छायासंश्रितं त्वदुपास्तितः ॥ २

उदस्तहस्तैस्ते दक्षैर्यक्षैरुद्धतचामराः ।
धुनन्ति स्मेव भव्यानां रजांसि प्रचितान्यपि ॥ ३

तव च्छत्रत्रयं भाति, मुक्ताजालविलम्बितम् ।
लीलास्थलमिवाऽऽपाण्डु जगल्लक्ष्याः समुच्छ्रितम् ॥ ४

सुरास्त्वयि वितन्वन्ति, नभस्तः सुमनोऽञ्जलीन् ।
स्वर्गश्रियेव निर्मुक्तान् प्रमोदाश्रुकणानिव ॥ ५

अप्रत्नरत्नरचितं, तव सिंहासनं विभो ! ।
त्वदास्यायै समानीतं, मेरोः शृङ्गमिवामरैः ॥ ६

जगत्त्रयपवित्रत्वविधानायेव यस्यति ।
तव वर्ष्मप्रभाभाराक्रान्तं शालत्रयं विभो ! ॥ ७

तव यो दुन्दुभिध्वानडम्बरो व्यानशेऽम्बरम् ।
शब्दब्रह्मात्र विश्रान्तमितीव जगतां जगौ ॥ ८

तव वाक्किरणौघोऽयमनन्तज्ञानभास्वतः ।
प्रसर्पन् व्यधुनोद् ध्वान्तं, जगज्जनमनोगतम् ॥ ९

अहार्यं याति हार्याणि, नान्यसाधारणानि ते ।
स्वयं प्रकाशयन्त्येव, जगत्साम्राज्यवैभवम् ॥ १०

सत्यामिन्द्रियसामुह्यां त्वयि ज्ञानमतीन्द्रियम् ।
जागर्त्यचिन्तनीया हि, प्रभूणां खलु शक्तयः ॥ ११

तव कल्पद्रुमस्येव, भक्तिः शक्तिगरीयसी ।
दभ्राऽपि पम्फुलीत्येव, फलसम्पदमद्भुतम् ॥ १२

भवद्वागमृतास्वादादेव ! देवामरा वयम् ।
सुधान्धसामपि सुधा, मुधाऽद्य प्रतिभाति नः ॥ १३

देवाधिदेवस्त्वं स्त्रष्टा, परमेष्ठीपुरुः परः ।
शुम्भुः स्वयंभूर्भगवांस्त्वं पुमानादिपुरुषः ॥ १४

त्वं विश्वतो मुखो विश्वराड्विराड्विश्वदृग् विभुः ।
विश्वव्यापी विश्वयोनिः, वियोनिर्विश्वभुक् प्रभुः ॥ १५

त्वमनादिरनन्तश्च, परमात्मा परापरः ।
हिरण्यगर्भोऽधिज्योतिस्त्वमिनस्त्वमयोनिजः ॥ १६

त्वमक्षरोऽजरोऽक्षय्योऽनक्षरोऽनक्ष ईश्वरः ।
त्वमच्युतो हरो भव्यबन्धुस्त्वं भव्यभास्करः ॥ १७

त्वं शंभुः शंभवः शम्बदः शरण्यश्च शंकरः ।
त्वं पुराणकविर्वाग्मी, त्वं स्याद्वादवदांवदः ॥ १८

योगीश्वरो योगविदांवरस्त्वं धर्मतीर्थकृत् ।
त्वं धर्मादिकरो धर्मनायको धर्मसारथिः ॥ १९

धर्मध्वजो धर्मयतिः कर्मारातिनिबर्हणः ।
त्वमर्हन्नरिहा सार्वः, सर्वज्ञः सर्वदर्श्यसि ॥ २०

त्वं बुद्धस्त्वं स्वयं बुद्धस्त्वं सिद्धःपुरुषोत्तमः ।
सूक्ष्मो निरञ्जनोऽव्यक्तो, महनीयो महानपि ॥ २१

अणीयांश्च गरियांश्च, स्थवीयानुत्तमो जनः ।
अनुत्तरोऽनश्वरस्त्वं स्थास्नुभूष्णुर्भूर्भवान्तकः ॥ २२

ब्रह्म ब्रह्मविदां ध्येयः शान्तस्त्वं तारकः शिवः ।
आप्तः पारगतोऽपारश्चिद्रूपोऽनन्तदर्शनः ॥ २३

निर्मदस्त्वं हि निर्मायो, निर्मोहो निर्ममः स्वराट् ।
निर्द्वन्द्वो वीतदम्भस्त्वं, निष्कलो निर्मलो जयी ॥ २४

वीतरागोऽनन्तवीर्योऽनन्तज्ञानलोचनः ।
निष्कलङ्को निर्विकारो, निराबाधो निरामयः ॥ २५

त्वमेव परमज्योतिश्चिदानन्दमयः स्वयम् ।
नाम्नामष्टोत्तरशतं, नीत्वा स्वस्मृतिगोचरम् ॥ २६

संस्तौमि त्वां जगत्स्तुत्यं श्रीमत्पार्श्वजिनेश्वरम् ।
वामेयं महिमाऽमेयमश्वसेननृपाङ्गजम् ॥ २७

नमस्तेऽनन्तसौख्यायाऽनन्तज्ञानात्मने नमः ।
नमोऽनन्तदृशेऽनन्तवीर्याय भवते नमः ॥ २८

जय त्वं त्रिजगद्बन्धो ! जय त्वं त्रिजगद्धित ! ।
जय त्वं त्रिजगत्त्रातर्जय त्वं त्रिजगत्पते ! ॥ २९

त्वद्ध्यानात् पूतचित्तोऽहं, त्वन्नुतेः पूतवागहम् ।
त्वन्नतेरस्मि पूताङ्गो धन्यस्त्वद्दर्शनादहम् ॥ ३०

त्वत्पादनखरप्रांशुकिरणाम्बुनिमज्जनैः ।
मूर्धाऽभिषिक्त इव मे, भाति नमस्य पावनैः ॥ ३१

तव स्तोत्रार्जितात् पुण्यादेवाऽऽशास्महे फलम् ।
भूयान्नः कर्मरजसां त्वयि भक्तिरवावरी ॥ ३२

इदं ते पावनं स्तोत्रमश्रान्तं यः स्मेरत् सुधीः ।
लभते स सदानन्दमङ्गलश्रीपरम्पराम् ॥ ३३

पू.आ. श्री शिवसुन्दरसूरिविरचितम्
गतप्रत्यागतयमकाङ्कितम्

## ८५. ॥ श्रीपार्श्वनाथलघुस्तवनम् ॥

(स्रग्धरा)

शान्तानम्रोकरक्षा रतिपरवचन क्ष्मालसन्नाम धीरो
तापासिव्याधिपः स्वो नवनयमतगः क्षीरकल्पोऽशयोभूः ।
रायादच्छो गजव्यासमलमदमुगक्षोभिचित्ताङ्गरन्ता
क्षापः सुसावविज्ञो विभवनततमस्तोयदस्वो विरोधी ॥ १

धीरो विश्वोदय स्तोमततनवभविज्ञो विवसासुपक्ष्मा
तारङ्गत्तां चिभिक्षो गमुदमलमसव्याजगच्छोदयारा ।
भूयोऽशल्पोकरक्षी गतमयनवनस्वोपधिव्याप्तिपाता
रोधी मन्नासलक्ष्मा न च वरपतिरक्षारकम्रोनताशाम् ॥ २
(वृत्तगतप्रत्यागतम्)

जाते रुद्रो मनस्वी शययमलवरः स्वीयभक्तावकोऽसौ
नेता प्रक्षारवर्जी भुवि समहि मसद्वामनव्यो भगी भोः ।
भोगी भव्यो नमद्वा समहि मसविभुर्जीवरक्षाप्रताने
ऽसौ को वक्ता मयस्वी रबलमय यशस्वी नमद्रोरुतेजाः ॥ ३
(अर्धगतप्रत्यागतम्)

भीशोकच्छेदनस्थो दुररिहतिरसः श्रीमयः सोद्यमोरो
रोमोद्यः सोऽयमः श्रीसरतिहरिरदुस्थो नदच्छेकशोभी ।
जीयादुत्पादकर्त्ता हहममसन-नष्टो ममत्तो विरोधा
धारो वित्तामनष्टो नसममहहता कदत्पादुयाजी ॥ ४
(पादगतप्रत्यागतम्)

एवं गतागतैः काव्यैः संस्तुतः श्रीजिनेश्वरः ।
क्षेमङ्करः श्रिये भूयादपूर्वः शिवसुन्दरः ॥ (अनुष्टुप्) ५

पू.आ. श्री तरुणप्रभसूरिविरचितम्

## ८६. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(उपजाति)

श्रीस्तम्भन ! स्तम्भनपार्श्व ! नेतः ! प्रतिष्ठितारिष्टघटापनेतः ! ।
मृगारिनागारिमहाविनेत ! - र्जय प्रणम्रात्मशिवप्रणेतः ! ॥ १

वामेतराङ्घ्रौ धरणोरगेण वामे च पद्मासनपद्मया त्वम् ।
निषेव्यमाणोऽष्टदले मदीये हृत्पुण्डरीके निविशस्व पार्श्व ! ॥२

पदोस्तले नागकुलानि यस्याधिमस्तकं ब्रह्म परं स नन्द्यात् ।
दुर्वर्ण सू... रत्न ... शालश्रीशोभन ! स्तम्भनपार्श्वनाथ ! ॥ ३

अर्हं परब्रह्म रविस्फुलिङ्ग ॐ ह्रीँ नमः श्रीँ नमदिन्द्रवृन्द !॥
प्रणम्यसे पार्श्व ! विषं हरत्वं जिनर्षभ ! श्रीँ भवते नमो ह्रीँ ॥४

दले दले मन्त्रपदादधस्ताद् वर्णोऽनुमानां रुचिरस्वराणाम् ।
सयागवाहैर्युगलैः प्रकीर्त्यः श्रीपार्श्वचिन्तामणिमन्त्र एष ॥ ५

द्वितीयपङ्क्तौ वलयच्छदेषु तस्यौं पदाद्यं परमेष्ठिनाम ।
रत्नत्रयस्यापि च नाम नित्यं स ह्रीँ नमोऽन्तं प्रयतः स्मरामि ॥६

दलस्थिताभिर्वलये तृतीये सभाजितः षोडशदेवताभिः ।
तुर्ये चतुर्विंशतिदेवमातृस्वनामभिः पत्रगतैः समर्च्यः ॥ ७

दिगष्टके दिक्पतयः सखेटा देव्योऽन्तरे श्रीअपराजितान्ताः ।
जयाजिता श्रीविजया च जम्भा
मोहा च वीरा र(स)हिता महन्ति ॥ ८

अयस्वभावः प्रकटप्रभावो गुरूपदेशेन विना न गम्यः ।
ध्यानं च कर्मक्षयहेतुरस्याभीष्टप्रदं निर्विषये विधेयम् ॥ ९

कृत्वा चेतः स्वतन्त्रं त्रिदिवशिववशीकारसंस्कारतन्त्रं
सम्मोहापोहमन्त्रं त्रिभुवनजनताभाग्यसौभाग्यतन्त्रम् ।
दुर्गालीभङ्ग्यन्त्रं मदमदनरिपुध्वंसतन्त्रं सुयन्त्रं
ये ध्यायन्ति मिमेसां (?) मुदितहृदि सदाध्यक्षलक्ष्योऽस्ति
पार्श्वः ॥ (स्रग्धरा) १०

इति मया तरुणप्रभया चितं परिणुतः प्रभुपार्श्वजिनेश्वरः ।
त्रिजगतीबलिराजसभाजितः स्वचरणं... मम यच्छतु ॥ ११
(आर्या)

पू.आ.श्री कविकुलप्रभसूरिविरचितम्
मन्त्राधिराजापराभिधानम्

## ८७. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(आर्या)

नत्वोपासितचरणं कमठेन प्राप्तबोधिना पार्श्वम् ।
कमठोपदिष्टमन्त्राक्षरगर्भां तन्नुतिं करवै ॥ १

वन्दे श्रीपार्श्वजिनं प्रथमं परमेष्ठिनां सदा ध्येयम् ।
यन्नामस्मरणमपि प्रशमयति दुरन्तदुरितानि ॥ २

षट्कोणयन्त्रमध्ये जन्मजरामृत्युनाशनं पार्श्वम् ।
पुनरुक्त्या च प्रणवं ह्रीँकारं दोषविनिकारम् ॥ ३

मायाबीजं हुँ ह्रः सनाथमथ यः समस्तसुखदक्षः ।
किञ्च त्रैलोक्यसखं ध्वनिसारं फट् फट् स्वाहा ॥ ४

एकान्ते सुदृढमना ऐन्द्रीहरिदभिमुखः पवित्राङ्गः ।
श्रीपार्श्वनाथचरणाम्बुजसेवामधुकरः सुकृती ॥ ५

ध्यानविधौ निष्णातो ब्रह्मस्थः सद्गुरूपदेशेन ।
यो ध्यायति त्रिसन्ध्यं तस्याऽवन्ध्यो भवेदेषः ॥ ६

नारिर्न हरिर्न करी नाऽहिर्नाग्निर्न सागरो न गदः ।
न क्ष्मापतिर्न दस्युर्न रुजा नाकालमरणमपि ॥ ७

तस्य भयाय प्रभवति हृदये जागर्त्ति यस्य पार्श्वेशः ।
पवनेरिताम्बुदा इव किन्त्वेते झटिति विघटन्ते ॥ ८

दुष्टसुरशाकिनीग्रहमुद्गलवेतालराक्षसप्रमुखाः ।
विलुठन्ति किङ्करा इव पदयोः पार्श्वक्रमध्यातुः ॥ ९

स कविर्वादी वैद्यो दैवज्ञो मन्त्रतन्त्रनिष्णातः ।
सकलकलानां निलयो भवति हृदि स्मरति यः पार्श्वम् ॥ १०

एवं कमठाधिष्ठितसुमन्त्रगर्भं जिनेन्द्रपार्श्वस्य ।
यः पठति स्तवमनिशं स कविकुलप्रभतया घटते ॥ ११

पू. आ.श्रीजयसागरसूरिरचितम्

## ८८. ॥ श्रीस्तम्भनकपार्श्वजिनस्तवनम् ॥

(स्रग्विणी ?)

योगात्मनामप्यपरं परं परं भिन्दानमेनः सकलं कलंकलम् ।
वामेयमाहुः सदयो दयोदयो मुदे स मेऽदभ्रमहा महा महा(:)॥१

अहो ! तवास्थाचरणे रणेऽरणे यदद्भुताकारधरा धराधरा ।
सुराङ्गनास्वान्तमना मना मना (?),
न यद्विकारं नवभा वभा वभा ॥ २

विभो ! तवासेवनयानयानया, निवारितावाच्यमया मया मया ।
अतः प्रसादाद्भवतोऽवतो वतो (?),
तीर्णोऽस्मि दुःखात् परमार ! मारमा (?) ॥ ३

यन्मौलिदेशे त्वमदा मदा मदा, वाञ्छार्थसम्पत्तिकरं करं करम्।
न तन्मनोऽरंस्त हरौ हरौ हरौ, मायामयेनापि भवे भवे भवे ॥४

दिष्ट्या स्तम्भनकेशपार्श्वभगवन् ! नानागुणग्रामणी-
रेषा श्रीजयसागरेण रचिता स्वल्पाक्षरापि स्तुतिः ।

तर्कव्याकरणादिशास्त्रविदुषां यायादुपादेयतां ।
सौवर्णाभरणं सुरत्नखचितं यद्वा न कस्य प्रियम् ॥ ५
(शार्दूलविक्रीडित)

पू.आ.श्री अजितसिंहसूरिरचितम्
(अट्टे मट्टे मन्त्रगर्भितम्)

## ८९. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

ॐ नमो भगवते श्रीपार्श्वनाथाय ह्रीँ प्रगे ।
धरणेन्द्रपद्मावती-सहिताय सदा-श्रिये ॥ १

अट्टे मट्टे तथा क्षुद्रविघट्टे क्षुदमेव हि,
स्तम्भय स्तम्भय क्षुद्रान् स्वाहान्तैरेभिरक्षरैः ॥ २

पद्ममष्टदलोपेतं मायाङ्कं जिन लाञ्छितं ।
पद्ममध्यान्तरालेषु पत्रोपरि यथाक्रमम् ॥ ३
अष्टावष्टौ तथैवाष्टौ विन्यस्ताक्षरमण्डलम् ।
तथाष्टशतजापेन, ज्वरमेकान्तरादिकम् ॥ ४

रिपु-चोर महिपाल-शाकिनी-भूत-सम्भवाम् ।
अरण्ये देहिजां भीतिं, हन्ति बद्धं भुजादिषु ॥ ५

पुष्पमालां जपित्वा च, मन्त्रेणाष्टशताधिकम् ।
प्रक्षिप्तापात्रकण्ठेषु, भूतादीन् स्तम्भयेत्ध्रुवम् ॥ ६

गुग्गुलस्य गुटिकां च, शतमष्टोत्तरं हुतम् ।
दुष्टमुच्चाटयेत् सद्यः, शान्तिं च कुरुते गृहे, ॥ ७

देवस्याजितसिंहस्य, नीलवर्णस्य संस्तवात्,
लभन्ते श्रेयसीं सिद्धिं, कवयो वाञ्छितैः सह ॥ ८

श्रीअश्वसेनकुलपङ्कजभास्करस्य,
पद्मावतीधरणराजनिषेवितस्य ।
वामाङ्गजस्य पदसंस्तवनाल्लभन्ते,
भव्याःश्रियं शुभगतामपि वाञ्छितानि ॥ (वसन्ततिलका) ९

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

## १०. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तुतिः ॥

श्रीशंखेश्वरपुरवरसमलङ्करणं शरण्यमघहरणम् ।
सुरसंसेवितचरणं श्रीपार्श्वं स्तौमि जयधरणम् ॥ (आर्या) १

(तोटकं)

रणनिर्जितमारबलं सबलं, बलवस्त्रसमानशरीरविभम् ।
विभयं भगवन्तमिभेन्द्रगतं गतदुर्मतिदुर्गतिदूरतरम् ॥ २
तरणाय भवाम्बुनिधौ तरणिं तरणीन्दुसमद्युतिसौम्यकलम् ।
कलकल्पितकल्पतरुं गुणिनं गुणिनन्दिकरं करणैरजितम् ॥ ३

जितपञ्चमकालविलासफलं फलवत्तरपादपयोजनुतिम् ।
नुतिसंस्तुतितत्परनाकपतिं पतिताखिलभव्यसमुन्नतिदम् ॥ ४

नतिदं कमठस्य शठस्य कलं कलभावमुपेयुष ईतिहरम् ।
हरधातृहरिभ्रमभेदबुधं बुधलक्षणलक्षितलक्ष्यपरम् ॥ ५

परमात्मजलप्रतिबिम्बतुला–तुलितं यतियोगिगुणैरमलम् ।
मलशालिनिभालनतो विमुखं मुखदीप्तितिरस्कृतपूर्णविधुम् ॥६

विधुरोपि जनस्मृतिसौख्यकरं करणत्रयशुद्धविशुद्धहृदम् ।
हृदयङ्गमसङ्गमरङ्गधरं धरणेन्द्रसदाश्रितलोकभरम् ॥ ७

भरतान्तरवर्तिनि काशिपुरे पुरतः कृतकृत्यजनेषु चरम् ।
चरणोद्यमिनां दमिनां प्रवरं वरिवश्वरिकर्मि जिनाधिपतिम् ॥८

श्रीशंखेश्वरमण्डन ! खण्डन ! घननिघ्नविघ्नराशीनाम् ।
श्रीपार्श्व ! पार्श्वचन्द्रप्रणत ! सदा जयकरो भूयाः ॥(आर्या) ९

पू.आ.श्री पार्श्वचन्द्रसूरिविरचितम्

## ११. ॥ श्रीपार्श्वजिनेन्द्रस्तवनम् ॥

राग – भैरव

प्रमुदितमुदितसूरसमभासं,
विहितसकलजनकमलविकासम् ॥ १

भजत भजत भविका जिनराजं,
गुणमणीरञ्जितराजसमाजम् ॥ (आंकणी) २

वसुखनभोवनिलक्षणधारं,
स्वामिनमेनं जगदाधारणम् ॥ (भजत०) ३

शठतरकमठमानतरुनागं,
हेलावारितवनितारागम् ॥ (भजत०) ४

चरमपयोनिधिमिव गम्भीरं,
वृन्दारकगिरिवरसमधीरम् ॥ (भजत०) ५

अश्वसेनवामासुतरत्नं,
करुणाकर्मणि कृतघनयत्नम् ॥ (भजत०) ६

पार्श्वजिनं श्रीमहिमागारं,
पार्श्वचन्द्रसेवकसुखकारम् ॥ (भजत०) ७

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

## ९२. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(भुजङ्गप्रयात)

जगन्मण्डले मल्यमालाभिधाने
प्रधाने सुदेशेऽवतीर्णः सुरद्रुः ।
कृपालुः स्थितो जालपादे पुरेऽस्मिन्
मनोवाञ्छितार्थप्रदः पार्श्वनाथः ॥ १

प्रभुस्त्वं मया वीक्षितो भक्तिभाजा-
धुनालोचना नन्दराकेयराजा ।
विजेजीयसे तीर्थनाथः सुपाथ-
स्तमः पङ्कसंहारिणे शुद्धगाथः ॥ २

जिनाधीश ! ते मूर्तिरेषेन्दुरेखा-
यशःशालिनी पन्नताशेषलेखा ।
प्रमोदं विधत्तेऽनिशं नाथ ! चेत-
श्चकोरस्य मेऽत्यद्भुतं दृष्टमेतत् ॥ ३

प्रभुस्त्वं गुरुस्त्वं पिता त्वं त्वमम्बा
सखा त्वं सुबन्धुः शरण्यो वरेण्यः ।
भवात्तारको वारकोऽमित्रभीते-
स्त्वमेव त्वमेव त्वमेव त्वमेव ॥ ४

जनोयं तवादेशवर्ती पुरस्थो
नियोज्यस्ततो नो वियोज्यः कदापि ।
सदा किङ्करस्ते प्रभो ! पार्श्वचन्द्रः
करोतीति विज्ञप्तिमेतां वितन्द्रः ॥ ५

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

श्री फलवर्द्धिपुरमण्डन-

## १३. ॥ श्रीपार्श्वनाथस्तुतिः ॥

यो देवमर्त्यासुरनागवृन्दै, र्नमस्कृतो न्यत्कृतभावशत्रुः ।
अनल्पसंकल्पितकल्पवृक्षः, श्रीपार्श्वनाथं तमहं नमामि ॥ १
(उपजाति)

इक्ष्वाकुवंशविमलार्च्यशिरोवतंसः,
श्रीअश्वसेननृपमानसराजहंसः ।
श्रीपार्श्वसंज्ञमरुता वरिवस्यमानः,
श्रीपार्श्व एष जयति प्रभुताप्रधानः ॥ (वसन्ततिलक) २

सत्पौषमासस्य तिथौ दशम्यां,
प्रासूत वामेश ! सुतं भवन्तम् ।
निशातमो विद्रुतमेक्ष्य नेशु,-
स्तमांसि सर्वाणि तदन्तराणि ॥ (उपजाति) ३

अवासतीर्थाधिपजन्मरत्ना,
हीनानि तेनासुमतां हितेन ।
संजातहर्षा इति खेदवन्ति,
वृद्धिं निशा हानिमहानि चापुः ॥ (उपजाति) ४

इन्द्रा वितन्द्राः शिखरे सुमेरो,-
र्जन्माभिषेकं व्यधुरीश ! ते ते ।
इत्थं शिशुत्वे घनवारिधारा,-
पातेऽपि धीरः किमु वार्द्धकेऽसौ ॥ (इंद्रवज्रा) ५

तारुण्यलीलाकलितः कलाब्धिः,
ख्यातः कलाकेलिरिति क्षमायाम् ।
कामान्न वाञ्छन् वररत्नकामः,
सत्यापनार्थं किल भोगमुक्तेः ॥ (इन्द्रवज्रा) ६

षड्जीवकायप्रतिपालनाय,
प्रव्रज्य पृथ्व्यां विहरञ् जिनो यः ।
संप्राप्य सत्केवलमालिलिङ्ग,
श्रेयः श्रिये सोऽस्तु सुखप्रदो मे ॥ (इन्द्रवज्रा) ७

नासाग्रविन्यस्तदृशं निरीहं,
पद्मासनस्थं परमात्मदेहम् ।
दृष्ट्वा परोक्षं श्रुतनिःकषायं,
प्रत्यक्षरूपेण जिनं प्रपद्ये ॥ (इन्द्रवज्रा) ८

चित्तार्तितापहरणौ करणौ रमायाः,
रक्तोत्पलार्चिररुणौ धरणौ प्रभायाः ।
भक्ताङ्गिभद्रभरणौ शरणौ विमोहे,
नाथ ! त्वदीयचरणौ शरणं श्रितोऽहम् ॥ (वसंततिलका) ९

सुरगिरिवरधीरः सत्सरस्वद्गभीरः,
प्रहतमदनवीरः प्राप्तसंसारतीरः ।
सुखकरणवितन्द्रः सौम्यभावेन चन्द्रः,
स जयति जयदः श्रीपार्श्वनामा जिनेन्द्रः ॥ (मालिनी) १०

इत्थं स्तुतो जिनः पार्श्वः, फलवर्द्धिपुरीप्रभुः ।
श्रीसाधुरत्नशिष्येण, पार्श्वचन्द्रेण भक्तये ॥ (अनुष्टुप्) ११

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

## १४. ॥ श्रीस्तम्भनाधीशपार्श्वनाथस्तुतिः ॥

मनोऽर्तिहर्त्रे शिवसौख्यदात्रे
संसारमज्जज्जनभीतिपात्रे ।
संमोहवल्लीवनराजिदात्रे,
श्रीस्तम्भनाधीश ! नमोऽस्तु तुभ्यम् ॥ (उपजातिः) १

ये त्वां जगन्नाथ ! जनाः प्रभाते,
उत्थाय चित्तोद्यमिनो(मतो)नमन्ति ।
ते स्तम्भनाधीश ! तव प्रसादा,-
द्विश्वत्रयीराज्यरमां लभन्ते ॥ (इन्द्रवज्रा) २

(उपजाति)

जिनेन्द्र ! मुक्तिं समलञ्चकार,
भवानिहाशापरिपूरणं कः ।
करोति भक्त्या नमतां जनानां,
मन्ये स च प्राग्भव एव भावः ॥ ३

त्वद्बिम्बदत्तेक्षणयामलस्य,
जनस्य ते भावयतः स्वरूपम् ।
एकाग्रचित्तस्य तु पार्श्वदेव !,
त्वमेव सर्वेप्सि(हि)तदायकोऽसि ॥ ४

मूर्त्तिस्तवेष्टे तरणेः समाना,
तमस्तमोध्वंसनसावधाना ।
विकासयन्ती भविकाम्बुजानि,
संशोधयन्ती दुरितापगाम्भः ॥ ५

स्वामिन् ! ममानन्दभरस्तु तादृशः,
संजायते यो गदितुं न शक्यते ।
त्वद्दर्शनाच्चक्रचकोरबर्हिणां,
मार्त्तण्डशीतांशुघनेक्षणादिव ॥ (इन्द्रवंशा) ६

रत्नाकरः क्षारजलः शशांकः,
साङ्कः सतापस्तपनः सुराद्रिः ।
कठोरभावो गतचित् सुरद्रुः,
कथं स(क्ष)मस्तैर्जिन ! आश्वसिमि (सेने !) ॥ ७

उत्तम्भनस्तम्भनपार्श्वदेव !
स्तोतुः(स्खलत्)पदस्याहनि वा क्षपायाम् ।
मम त्वमेवासि च यत्र तत्र,
प्रसद्य तद् देहि करावलम्बम् ॥ ८

माता पिता भ्रातृजनस्त्वमेव,
सखा गुरुः स्वामिजनस्त्वमेव ।
ममापहर्ता विपदस्त्वमेव,
श्रीपार्श्व ! भूयाश्शरणं त्वमेव ॥ ९

शिरोऽक्षिदन्तश्रवणोरुकण्ठ-
जिह्वाभुजाद्यङ्गविशेषरोगाः ।
नश्यन्ति ते दर्शनतस्तवाशु,
स्वामिन् ! मृगारेश्च यथा मृगाद्याः ॥ १०

एवं स्तुतः प्रभुः पार्श्वः, पार्श्वचन्द्रेण भक्तितः ।
स्तम्भनाख्ये महातीर्थे, चिन्तितार्थप्रदः सदा ॥ (अनुष्टुप्) ११

पू.आ. श्रीपार्श्वचन्द्रसूरिविरचितम्

## ९५. ॥ श्रीफलवर्द्धिमण्डनपार्श्वनाथस्तोत्रम् ॥

फलवर्द्धिपुरीसंस्थं, पार्श्वं स्तौमि जिनाधिपम् ।
यस्य दर्शनमात्रेण, प्राप्यते मनईप्सितम् ॥ (अनुष्टुप्) १

मूर्तिरियं कल्पलता, सामान्यं ते बिभर्ति नो मन्ये ।
इह लोकार्त्तिहरेशे, -ह परत्र सुखजननी नाथ ! ॥(आर्या:) २

शिरसि फणिपतीरे, यो विधुसमवदनं भेजे ।
किरणमधुकराल्या, **भुजगशशभृता** तुल्यम् ॥ ३
(भुजगशशभृता:)

श्रीपार्श्वो दुरिताहिसंचयं, विव्याधायमहो विशेषतः ।
कामक्ष्वेडहरो विराजते, दिवः **शुद्धविराडि**वोदितः ॥ ४
(शुद्धविराट्)

केवलं लेभे सुरनरनाथैः पूजितपादो गलितविषादः ।
आगममेनं स्म वदति सद्यः **सान्द्रपदं** श्री जिनवरनाथः ॥(सांद्रपदं) ५

सुमनसः प्रभुपार्श्वजिनेश्वरं,
विपिनगं तु निरीक्ष्य सुरासुराः ।
विरचयन्ति मनोहरमीक्षणे,
**द्रुतविलम्बित**सौख्यसुताण्डवम् ॥ (द्रुतविलम्बित) ६

तव गीर्विभोरमृतसारवापिका,
जनतातते‌रमृतभावदायिका ।
श्रवणाञ्जलिग्रहणदुःखहारिणी,
सततं हि सा जयति **मञ्जुभाषिणी** ॥ (मञ्जुभाषिणी) ७

क्षितितलममलं भगवति विदिते,
विहरति समजनपतिसुरमहिते ।

प्रभुपदभजतान्तररिपुहृदये,
प्रभवति निशित**प्रहरणकलिका** ॥ (प्रहरणकलिका) ८

त्रिभुवनजनघनशिवसुखकरण !
स्मयगिरिविदलनपविबलधरण ! ।
अजयमदनमदकरणकृतिहर !
जय जय जिनवर ! **गुणमणिनिकर** ! ॥(गुणमणिनिकर) ९

पार्श्वजिनेश्वरस्य गतिरलमुपमिता,
देशत एव सेति गदति विबुधजनता ।
सर्वत उत्तमं सकलमिदमुपमितं,
मानसं हंसश्च **ऋषभगजविलसितम्** ॥(ऋषभगजविलसित)१०

सुदेवः श्रीपार्श्वश्चरणनतलोकस्य सततं,
सुखं दत्तां नित्यं हरतु दुरितं भूरि जनितम् ।
यदीयप्रासादे न खलु भवसिंधौ वतरणी
धरित्री संजाता जगति महतीयं **शिखरिणी** ॥(शिखरिणी)११

स्वामिन् ! श्रीपार्श्व श्रितसविधभूमण्डलाखण्डलाली-
संसेव्य प्राप्तानुपमितसमताभावनाभिः प्रभावः
श्रीपार्श्वोऽर्हन् भोगिफणमणिभाद्योतितश्यामलाङ्ग-
स्त्वं जीयाः शश्वत् **कुसुमितलतावेल्लिता**ङ्गोपमानः ॥ १२
(कुसुमितलतावेल्लिता)

इत्थं श्रीफलवर्द्धिनामनगरीसंस्थं जिनाधीश्वरम्,
श्रीपार्श्वं सततं प्रणामनिरतः स्तौति स्म भक्त्यान्वितः ।
अभ्यर्णेन्दुरिहागमप्रमुदभृत्कर्माष्टकारिद्विप-
श्रेणीकुम्भविदारणप्रभुतया **शार्दूलविक्रीडितम्** ॥ १३
(शादूलविक्रीडित)

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

सेरीसकमण्डन–

## १६. ॥ श्रीलोडणपार्श्वनाथस्तुतिः ॥

(उपजाति)

इक्ष्वाकुवंशोदधिपूर्णचन्द्रं, जगत्त्रयस्योद्धरणे वितन्द्रम् ।
नमज्जनानन्दकरं जिनेन्द्रं, सेरीसके पार्श्वमहं नमामि ॥ १

दुष्टाष्टकर्मारिबलं जिगाय, यो हेलया मुक्तिसुसाधनाय ।
अतुल्ययोधं च जगत्त्रये तं, सेरीसके पार्श्वमहं नमामि ॥ २

नत्वा यमात्मा रमते जनानां, भव्यात्मनां नान्यमहासुरेषु ।
रागादिरक्तेषु च तं विरागं, सेरीसके पार्श्वमहं नमामि ॥ ३

यस्य प्रसादादखिला खलाली, विलीयते मंक्षु हतप्रतापा ।
द्रव्येण भावेन च यो न भिन्नः, सेरीसके पार्श्वमहं नमामि ॥४

यदीयभक्त्यर्थप्रभानिरस्तं, ततं तमो नश्यति दूरतस्तत् ।
समुद्यतः सोत्कलिकं सहर्षं, सेरीसके पार्श्वमहं नमामि ॥ ५

यस्याभिधानं जगति प्रसिद्धं, श्रीलोडणेति प्रसृतं विशुद्धम् ।
तं सुप्रभूतातिशयप्रकृष्टं, सेरीसके पार्श्वमहं नमामि ॥ ६

इति सेरीसके पार्श्वः, प्रसिद्धो लोडणाख्यया ।
ध्यातुश्चित्ते स्थिरो भूयात्, पार्श्वचन्द्रेण संस्तुतः ॥(अनुष्टुप्) ७

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-
परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

# स्तोत्रसंदेशमाला


१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोत्रयमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २